CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरु-गङ्गेश्वर-ग्रन्थमालायास्त्रयोदशं पुष्पम्

शुक्लयजुःसंहितासमन्वयभाष्यम्

द्वितीयोऽध्यायः

भाष्यकाराः
स्वामिश्रीगङ्गेश्वरानन्दोदासीनाः

सम्पादकाः
श्रीसुरजनदासस्वामिनः, एम्. ए., आचार्याः

सहसम्पादकौ
स्वामिश्रीगोविन्दानन्दो वेदान्ताचार्यः
स्वामिश्रीआनन्दभास्करश्च

गुरुगङ्गेश्वर चतुर्वेद प्रकाशन संस्थान,
योगेश्वर गुरुगङ्गेश्वर चैरिटेबिल ट्रस्ट
दिल्ली-बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरु-गङ्गेश्वर-ग्रन्थमालायास्त्रयोदशं पुष्पम्

शुक्लयजुःसंहितासमन्वयभाष्यम्

★

द्वितीयोऽध्यायः

वेददर्शनाचार्य-महामण्डलेश्वर-
श्री १०८ स्वामिश्रीगंगेश्वरानन्दोदासीनकृत-
समन्वयभाष्यसमलङ्कृतः

★

सम्पादकाः
श्रीसुरजनदासस्वामिनः, एम्. ए., आचार्याः

सहसम्पादकौ
स्वामिश्रीगोविन्दानन्दो वेदान्ताचार्यः,
स्वामिश्रीआनन्दभास्करश्च

28-1-98
विद्या भवन, नई दिल्ली

गुरुगंगेश्वर चतुर्वेद प्रकाशन संस्थान,
योगेश्वर गुरुगंगेश्वर चैरिटेबिल ट्रस्ट
दिल्ली-बम्बई

Bharatiya Vidya Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya
1031

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूल्यम् : रूप्यकपञ्चकम्

प्रथमावृत्ति : वि० सं० २०३२
मुद्रक : हितशरण अग्रवाल,
सरस्वती प्रेस, मथुरा, उ०प्र० (भारत)

1031

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रास्ताविकम्

अयि वेदपारावारपारदृश्वानो विद्वद्धौरेयाः !

अद्य द्वितीयाध्यायस्य समन्वयभाष्यमिदं सदसद्व्यक्तिहेतूनां सतां पुरतः समुपस्थापयन्तो वयममन्दमानन्दमनुभवामः। समन्वयभाष्यविषये यत्किमपि वक्तव्यमासीत्तदुक्तं प्रथमाध्यायसमन्वयभाष्यप्रस्तावनायामतोऽत्र तद्विषये नाधिकं किञ्चित् प्रस्तूयते, केवलं माध्यन्दिनीयशुक्लयजुर्वेदसंहिताद्वितीयाध्यायस्य विषयाणां समासत उल्लेखो विधीयते।

अत्र द्वितीयेऽध्यायेऽष्टाविंशतिकण्डिकान्तं दर्शपूर्णमासविषयका मन्त्राः, ऊनत्रिंशत्कण्डिकामारभ्य आऽध्यायसमाप्ति च पिण्डपितृयागे विनियुक्ता मन्त्रा वर्तन्ते। तत्र च स्रुगादान-स्रुच्याघार-ब्रह्मार्षमन्त्रक-स्रुग्व्यूहादि-स्रुग्ग्रह-याजमान-पैतृकाभिधाः सप्तानुवाकाः। एष्वनुवाकेषु षट्कण्डिकात्मके प्रथमे स्रुगादानानुवाके चतुर्विंशत्या मन्त्रैः इध्मप्रेक्षणादिहृदयालम्भनान्ताः द्वाविंशतिः क्रियाः, कण्डिकात्रयात्मके द्वितीये स्रुच्याघारानुवाकेऽष्टभिर्मन्त्रैरग्निसम्मार्जनादिध्रुवाज्यसमञ्जनान्ता अष्टौ क्रियाः, पञ्चकण्डिकात्मके तृतीये ब्रह्मार्षमन्त्रकानुवाके नवभिर्मन्त्रैराशीःप्रार्थनाद्यग्निसम्मार्जनान्ता नव क्रियाः, पञ्चकण्डिकात्मके चतुर्थे स्रुग्व्यूहाद्यनुवाके सप्तदशभिर्मन्त्रैः पौर्णमासयागे जुहूव्यूहनादिवेद्यालम्भनान्ताः सप्तदश क्रियाः, चतुष्कण्डिकात्मके पञ्चमे स्रुग्ग्रहानुवाके अष्टभिर्मन्त्रैः स्रुक्स्रुवग्रहणाद्युत्करे कणप्रक्षेपान्ता अष्टौ क्रियाः, पञ्चकण्डिकात्मके षष्ठे याजमानानुवाके पञ्चदशभिर्मन्त्रैः पूर्णपात्रनिनयनादिकर्मसमापनान्तास्त्रयोदश क्रियाः, षट्कण्डिकात्मके सप्तमे पैतृकानुवाके च षोडशभिर्मन्त्रैरग्निदेवत्यां मेक्षणाहुतिमारभ्य पिण्डोपर्यवनेजननिषेकान्ता दश क्रियाः प्रतिपादिताः। एवं चतुस्त्रिंशत्कण्डिकासु सप्तनवत्या मन्त्रैः सप्ताशीतिक्रिया निरूपिता अस्मिन्नध्याये।

अत्रापि मन्त्रेषु तत्प्रतिपादितक्रियासु च वैषम्यस्येदमेव मूलं यत् कासुचित् क्रियासु एकाधिकमन्त्रविनियोगः। तथाहि प्रथमे स्रुगादानानुवाके द्वितीयकण्डिकास्थैः 'भुवपतये स्वाहा' 'भुवनपये स्वाहा' 'भूतानां पतये स्वाहा' इति त्रिभिर्मन्त्रैः स्कन्नहविरभिमर्शनरूपैकैव क्रिया प्रतिपादिता। एवं षष्ठे याजमानानुवाके विष्णुक्रमरूपैकैव क्रिया पञ्चविंश्यां कण्डिकायां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पठितैः 'दिवि विष्णुः' 'अन्तरिक्षे विष्णुः' 'पृथिव्यां विष्णुः' इति त्रिभिर्मन्त्रैः सप्तमे पैतृकानुवाके च पिण्डाभिजपरूपैका क्रिया 'अत्र पितरो मादयध्वम्' 'अमीमदन्त पितरः' इति द्वाभ्यां मन्त्राभ्यां, पुटाञ्जलिनमस्काररूपा क्रिया च द्वात्रिंश्यां कण्डिकायां पठितैः 'नमो वः पितरः' इत्यारभ्य 'पितरो नमो वः' इत्यन्तैः षड्भिर्मन्त्रैर्निरूपिता। यद्यपि याजमानानुवाके एव सूर्य-प्रदक्षिणरूपैका क्रिया पञ्चविंश्यां षड्विंश्याञ्च कण्डिकायां वर्तमानाभ्यां 'सूर्यस्यावृतमन्वार्ते' इति, समानरूपाभ्यां मन्त्राभ्यां प्रतिपादिता तथापि तत्रोपस्थीयमानदेवतयोः सूर्यगार्हपत्याग्न्यो-र्भेदेन तत्र क्रियाद्वयाभ्यङ्गीकार एव समुचितं प्रतिभाति।

अत्र संशोधनादिकार्येषु श्रीमहेशदत्तशुक्लमहोदयैर्मुद्रणादिकार्येषु च सरस्वतीमुद्रणा-लयाध्यक्षैः श्रीहितशरणअग्रवालमहोदयैर्यन्महत् साहाय्यमाचरितं तदर्थमहमतिशयकृतज्ञता-मावहामि।

बुद्धेर्मान्द्याद्वा, प्रमादाद्वा, त्वरितमुद्रणवशाद्वात्र जातानि स्खलितानि गुणैकपक्षपातिभिः सद्भिः संशोध्यानि संसूचनीयानि च येनागामिनि संस्करणे तेषां संशोधनं विधीयेतेति शम्।

विदुषां विधेयः
—सुरजनदासः स्वामी

नववर्षारम्भः
वि० सं० २०३२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माध्यन्दिनीय-

शुक्लयजुःसंहितासमन्वयभाष्यम्

द्वितीयोऽध्यायः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलाचरणम्

वन्दे रामं रमानाथं विनयोत्साहदानतः ।
सत्यसन्धं महाधीरं हिन्दूभावनिदर्शनम् ॥
कृष्णावसनविस्तारिकृष्णं कृष्णसखं भजे ।
कल्पद्रुमं प्रपन्नानां सात्वन्मानसमन्दिरम् ॥
विश्ववन्द्यपदो वन्दे विबुधान् देवविश्रुतान् ।
पञ्च हेरम्बवैकुण्ठशक्तिशङ्करभास्करान् ॥
हंसाप्रहंसविज्ञानं हंसं हंसविदुत्तमम् ।
औदास्यप्रथमाचार्यं कुमारं वैधसं भजे ॥
वेदिवंशसमुद्भूतो वेदमार्गप्रवर्तकः ।
भक्तिवित्तिसमुच्चेता श्रीचन्द्रः पातु नः सदा ॥
हार्दं तमो निराकुर्वन् वेदविज्ञानभानुना ।
सर्वं समीहितं देयाद् रामानन्दो दिवाकरः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ हरिः ॐ ॥

शुक्लयजुःसंहितासमन्वयभाष्यम्

अथ द्वितीयोऽध्यायः

स्रुगासादनानुवाकः

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥ १ ॥

१. इध्मप्रोक्षणम्, २. वेदिप्रोक्षणम्, ३. बर्हिःप्रोक्षणम् ।

देवयाजिपक्षभाष्यम्

अस्यां प्रथमकण्डिकायां त्रयो मन्त्राः । 'कृष्णोऽसि' इत्यादिरिध्मप्रोक्षणः प्रथमः । अस्यासुरी उष्णिक् छन्दः, इध्मो देवता । 'वेदिरसि' इत्यादिर्वेदिप्रोक्षणो द्वितीयः । अस्यासुरी अनुष्टुप् छन्दः, लिङ्गोक्ता देवता । 'बर्हिरसि' इत्यादिर्बर्हिःप्रोक्षणस्तृतीयः । अस्य प्राजापत्या उष्णिक् छन्दः, लिङ्गोक्ता देवता । परमेष्ठी प्राजापत्य ऋषिः समानः (श० ब्रा० १. ३. ३. १-२; का० श्रौ० २. ७. १६[१]) ।

अथोत्पूताः प्रोक्षणीरप आदाय ताभिः प्राग् विस्रस्तानामिध्मानां यज्ञियसमिधां प्रोक्षणं चिकीर्षन्निध्मं सम्बोधयति—हे इध्मपूलक ! त्वं 'कृष्णः' कृष्णमृगाकारो यज्ञः, 'यज्ञो ह देवेभ्यो-ऽपचक्राम स कृष्णो भूत्वा चचार' (श० ब्रा० १. १. ४. १) । कृष्णशब्दो द्विविधः ।

१. इध्मं प्रोक्षति विस्रंस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद् ग्रन्थि 'कृष्णोऽसि' इति प्रति-मन्त्रम् । (का० श्रौ० सू० २. ७. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्तोदात्तः कृष्णवर्णवचनः 'कृष्णस्याऽमृगाख्या चेत्' (फिट्सू० १. ११), मृगभिन्नेऽर्थे वर्ण-वाचिनि कृष्णशब्देऽन्तोदात्तत्वं भवतीति सूत्रार्थः । मृगवचनः कृष्णशब्दोऽत एवाद्युदात्तः । अत एव मन्त्रे आद्युदात्तस्य कृष्णशब्दस्य पाठादिह कृष्णमृगोऽर्थोऽभ्युपगम्यते । 'असि' । यज्ञ-साधनत्वादिध्मेष्वपि यज्ञत्वोपचारः । कीदृश इध्मः ? 'आखरेष्ठः' आ समन्तात् खरे कठिनत्वचि वृक्षे तिष्ठतीत्याखरेष्ठः । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० ९२८) इत्यतः 'सुपि स्थः' (पा० ३. २. ४) इति कर्तरि कः प्रत्ययः । 'स्थे च भाषायाम्' इति लोके सप्तम्या अलुग्निषेधाद् वेदेऽलुक्, 'पूर्वपदात्' (पा० ८. ३. १०६) इति षत्वम् । यद्वा आ समन्तात् खं स्वर्गं राति ददातीत्याखरः आहवनीयस्तत्र तिष्ठतीत्याखरेष्ठः । 'अग्नये' 'त्वा' त्वां 'जुष्टं' प्रीतं प्रियमित्यर्थः । 'जुषी प्रीतिसेवनयोः' (तु० आ० १२८९) ततः क्तः । 'रुच्यर्थानां प्रीयमाणः' (पा० १. ४. ३३) इति सूत्रेणाग्निशब्दाच्चतुर्थी । शुष्केध्मा अग्निं प्रीणन्ति प्रज्वलयन्तीति यावत् । 'प्रोक्षामि' सिञ्चामि, 'उक्ष सेचने' (भ्वा० प० ६५७) । इध्मास्तावदिह पलाशादिवृक्षाणामरत्निमात्र्योऽष्टादश समिधः ।

इध्मं प्रोक्ष्य वेदिं प्रोक्षितुमुपक्रमते—हे वेदे ! त्वं 'वेदिः' निखिलपृथिवीलाभरूपा 'असि' । 'तेनेमां सर्वां पृथिवीं समविन्दन्त, तद्यदेनेनेमां सर्वां समविन्दन्त तस्माद् वेदिर्नाम' (श० ब्रा० १. २. ५. ७) । 'विद्लृ लाभे' (तु० उ० १४३३) । अत एव 'बर्हिषे' बर्हिषां स्तरणार्थं 'जुष्टम्' अनुरूपां 'त्वा' त्वां 'प्रोक्षामि' सिञ्चामि, मेध्यां करोमीति भावः ।

तृतीयेन 'बर्हिरसि' इति मन्त्रेण बर्हींषि प्रोक्षति—हे दर्भ ! त्वं 'बर्हिः' वेदिबृंहणसमर्थः 'बर्हिः परिबर्हणात्' (निरु० ८. ८) 'असि', 'त्वा' त्वां 'स्रुग्भ्यः' स्रुचां धारणाय 'जुष्टं' प्रीतम् अनुरूपमित्यर्थः, 'प्रोक्षामि' सेचनेन शोधयामीति ।

आत्मयाजिपक्षभाष्यम्

हे प्राण ! 'प्राण एवास्येध्मः' (श० ब्रा० ११. २. ६. २) 'प्राणा वै समिधः' (श० ब्रा० १. ५. ४. १), त्वं 'कृष्णः' विष्णुरूपः 'आखरेष्ठः' आ समन्तात् खरे देहवृक्षे स्थितः, यद्वा खं ब्रह्मानन्दं राति ददातीति खरो हार्दाकाशस्तत्र समन्तात्तिष्ठतीत्याखरेष्ठः 'असि' । 'अग्नये' आत्माग्नये, 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. २०) 'जुष्टं' प्रियं 'त्वा' त्वां 'प्रोक्षामि' । हे मनः ! त्वं 'वेदिः' विद्यते लभ्यत इति वेदिः । कामाद्यसुरेभ्यो जीवात्मना प्रतिलब्धत्वाद् वेदिः 'असि' । 'बर्हिषे' मनुष्यलोकाय, 'अयं लोको बर्हिः' (श० ब्रा० १. ४. १. २४) 'जुष्टं' जुष्टां प्रियां 'त्वा' त्वां 'प्रोक्षामि' । हे इन्द्रियसमूह ! त्वं 'बर्हिः' आत्मनः प्रजा 'प्रजा वै बर्हिः' (श० ब्रा० २. ६. १. २३) 'असि' । 'स्रुग्भ्यः' वागादिभ्यः 'वाग् वै स्रुक्' (श० ब्रा० ६. ३. १. ८) 'जुष्टं' प्रियं 'त्वा' त्वां 'प्रोक्षामि' इति ।

सात्वतपक्षभाष्यम्

प्रथमाध्यायप्रथमकण्डिकायां अस्मिन्निति यो गोपतिः साधकैरनन्यभावेन चिन्तनीयतया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'ध्रुवा अस्मिन् गोपतौ स्यात'—इत्येवमुक्तः सः त्वं 'कृष्णः' कृष्णनामधेयः समस्तगोपीजनप्रियः समस्तचित्ताकर्षको वा 'असि' वर्तसे। ननु 'कृष्णस्यामृगाख्या चेत्' इति फिट्सूत्रेण मृगभिन्नवाचिनः कृष्णशब्दस्यान्तोदात्तत्वविधानेनात्र च कृष्णशब्दस्याद्युदात्तत्वेन मृगवाचित्वमस्य शङ्कनीयमिति चेन्न, मृगवाचिनोऽपि कृष्णशब्दस्य मृगवत् त्वरितगतिगुणयोगात् तत्सदृशलोचनवत्त्वधर्मयोगाच्च भगवति प्रयोगसम्भवात्। अतस्तद्वत् त्वरितगतिमान् मृगसमानलोचनो वेत्यर्थः। अपि च 'आखरेष्ठः' 'आ' समन्तात् 'खरे' कठोरे कुशकण्टकाद्याकीर्णे व्रजप्रदेशे स्वभक्तप्रणयवशात्तिष्ठतीति तादृशः। किञ्च त्वं 'वेदिः' चेतयिता वोधयिता, गीतामुखेन धर्मब्रह्मणोस्तत्त्वमाख्याता। 'स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता' (भाग० १०. ३३. २८) इति वचनात्। अपि वा निवासो जगतां, जगदाधार इति यावत् 'विद चेतनाख्याननिवासेषु' (चु० आ० १७०६) आकुष्मीयत्वादात्मनेपदी, तत इनि साधुः। 'वर्हिषे' प्रजायै 'प्रजा वै वर्हिः' (कौ० ५. ७) इति श्रुतेः। दुर्जननिहननेन स्वरक्षणात् 'जुष्टं' प्रियम्। अपि च 'वर्हिः' वर्धक उन्नमयिता प्रजानाम् 'असि' वर्तसे। अथवा 'आत्मा वै पुत्रनामासि' इति वचनात् स्वात्मभूतपुत्रत्वेन भावनात् प्रजारूपोऽसि। पुत्रनिर्विशेषं प्रजापालकः। अतिशयेन प्रजावत्सल इति भावः। अलं बहुना। 'स्रुग्भ्यः' एभ्यः सर्वेभ्यः लोकेभ्यः 'इमे वै लोकाः स्रुचः' (तै० ३. ३. १. २) इति श्रुतेः। शिष्टं समानम्।

अदित्यै व्युन्दनमसि विष्णोः स्तुपोऽस्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यो भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ॥ २ ॥

१. बर्हिर्मूलेषु प्रोक्षणीनिनयनम्, २. प्रस्तरग्रहणम्, ३. वेदिसंस्तरणम्. ४-६. स्कन्नाभिमर्शनम्।

देवयाजिपक्षभाष्यम्

अस्यां द्वितीयकण्डिकायां षण् मन्त्राः सन्ति। 'अदित्यै' इत्यादिर्वर्हिर्मूलेषु प्रोक्षणीशेषनिनयनः प्रथमः। अस्य प्राजापत्या गायत्री छन्दः, आपो देवताः। 'विष्णोः' इत्यादिः प्रस्तरग्रहणो द्वितीयः। अस्य दैवी पङ्क्तिश्छन्दः, प्रस्तरो देवता। 'ऊर्णम्रदसम्' इत्यादिस्तृतीयो मन्त्रो वेदिसंस्तरणार्थः। अस्यासुरी गायत्री छन्दः, वेदिर्देवता। अथ 'भुवपतये स्वाहा' 'भुवनपतये स्वाहा' 'भूतानां पतये स्वाहा' इति त्रयो मन्त्राः स्कन्नाभिमर्शनार्थाः। तत्र 'भुवपतये' इत्यस्य दैवी जगती छन्दः, 'भुवनपतये' 'भूतानाम्पतये' इत्यनयोः प्राजापत्या गायत्री छन्दः। त्रयाणामेषां मन्त्राणामग्निर्देवता। सर्वेषां षण्णां मन्त्राणां समः परमेष्ठी प्राजापत्य ऋषिः (श० ब्रा० १. ३. ३. ४-१७; का० श्रौ० २. ७. १७-२३)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमायाः कण्डिकायास्त्रिभिर्मन्त्रैः यथाक्रममिध्मवेदिबर्हिषां प्रोक्षणं विधाय प्रोक्षणीनामपां शेषं बर्हिर्मूलेषु निषिञ्चति। तदेवाह—हे प्रोक्षणशेष उदक ! त्वम् 'अदित्यै' अदित्याः पृथिव्याः, षष्ठ्यर्थे चतुर्थी, 'इयं वै पृथिव्यदितिः' (श० ब्रा० १. ३. ३. ४), 'व्युन्दनं' विशिष्टमुद्यते क्लेद्यतेऽनेन 'उन्दी क्लेदने' (रु० प० १४५८) करणे ल्युट्, क्लेदनसाधनम् 'असि'।

अथाध्वर्युः प्रणीतासु पवित्रे निधाय बर्हिःसंनहनरज्जुं विस्रंस्य बर्हिषः पूर्वभागात् प्रस्तरं कुशमुष्टिं गृह्णाति—हे कुशमुष्टे ! त्वं 'विष्णोः' यज्ञपुरुषस्य 'स्तुपः' केशसंघातः शिखेति यावत्। 'ष्टचै स्त्यै शब्दसंघातयोः' (भ्वा० प० ९१०, ९११) औणादिकः डुपः प्रत्ययः 'असि'। वेदिं प्रस्तरेण संस्तृणाति—हे वेदे ! 'ऊर्णम्रदसम्' ऊर्णमिव म्रदो मार्दवं यस्यास्ताम्, 'मृद क्षोदे' (क्र्या० प० १५१६), बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः। यद्वा ऊर्णामिव म्रदसं म्रदीयसीम् अतिमृद्वीम्। अतिशयेन मृदुं म्रदीयसीम्, छान्दसो वर्णलोपः। 'उपमानानि सामान्यवचनैः' (पा० २. १. ५५) इत्युपमानसमासे 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमाना०' (पा० ६. २. २) इति पूर्वपदप्रकृतिस्वरः। दर्भैराच्छादिता वेदिः काठिन्याभावादुपवेष्टुं म्रदीयसी भवति। 'त्वा' त्वां 'स्तृणामि' प्रस्तरेणाच्छादयामि। 'स्तृञ् आच्छादने' (क्र्या० उ० १४८५)। कीदृशीम् ? 'देवेभ्यः स्वासस्थाम्' देवानां कृते सुखासनेनोपवेश्याम् 'स्वासदां देवेभ्य इति' (श० ब्रा० १. ३. ३. ११) आसनम् आसः, 'आस उपवेशने' (अ० आ० १०२१), भावे घञ् प्रत्ययः। शोभनः सुखः आसः स्वासः 'कुगतिप्रादयः' (पा० २. २. १८) इति समासः। स्वासेन तिष्ठन्त्यत्रेति विग्रहे 'घञर्थे कविधानम्' (पा० वा० ३. ३. ५८) इत्यधिकरणे कः प्रत्ययः।

अथ त्रिभिः 'भुवपतये स्वाहा' इत्यादिमन्त्रैर्हविर्ग्रहकाले परिधिभ्यो बहिः स्कन्नं पतितं हविः भुवपत्यादिभ्यस्त्रिभ्यो भ्रातृभ्योऽभिमृशति। अत्रायमितिहासः— अग्नेस्त्रयो भ्रातर आसन्, ते वषट्कारभयात् पृथिवीं प्राविशन्। वषट्कारभयादग्निरप्यप्सु प्राविविक्षत्, स देवैरानीय स्वाधिकारे नियुज्यमान एवमाह—नाऽहमेकाकी आगन्तुमुत्सहे, मम त्रयो भ्रातरोऽपि मां परिदध्युरिति, त इमे त्रिः परिधयः। स्कन्नं हविश्च तेषां भागः (द्रष्टव्यं श० ब्रा० १. ३. ३. १३-१७)। 'भुवपतये' मध्यमव्याहृतिरूपाय 'स्वाहा' देवान् प्रत्युत्सर्गे निपातः स्वाहा शब्दः। 'सुहुतमस्तु' इति तदर्थः। 'स्वाहाकारं वषट्कारं च देवा उपजीवन्ति' इति श्रुतेः। भुवः मध्यमा व्याहृतिः, भुवनशब्देन जगतो बोधः, भूतानां च 'भूतानाम्' इत्यनेनेति। तेषां त्रयाणामधिपतिभ्यः अग्निभ्यः स्वाहेत्यन्वय इति।

आत्मयाजिपक्षभाष्यम्

हे गगनामृत ! 'आपो ज्योती रसोऽमृतम्' इति श्रुतेः। अथवा प्रोक्षणशेषोदकाभिमानिनि देवते ! त्वम् 'अदित्याः' जीवस्वरूपायाः परायाः प्रकृतेः 'व्युन्दनम्' विशेषक्लेदनम् 'असि'।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे यजमानात्मन् ! 'यजमानो वै प्रस्तरः' (श० ब्रा० १. ८. १. ४४) त्वं 'विष्णोः स्तुपः' तेजःसमूहः 'असि' । हे हृदयरूपवेदे ! 'वेदिर्वै देवलोकः' (श० ब्रा० ८. ६. ३. ६) त्वाम् 'ऊर्णम्रदसम्' कृष्णमृगचर्मरूपेणातिशयमृदुम् । तथाच श्रुतिः—'यज्ञो ह देवेभ्योऽपचक्राम । स कृष्णो भूत्वा चचार । तस्य देवा अनुविद्य त्वचमेवावच्छायाजह्नुः' (श० ब्रा० १. १. ४. १) । अस्याः श्रुतेरयमर्थोऽत्र—'यज्ञः' पुरुषः 'पुरुषो वै यज्ञः' (श० ब्रा० १०. २. १. २) । स ह 'देवेभ्यः' इन्द्रियेभ्यः 'अपचक्राम', स 'कृष्णः' विष्णुः भूत्वा 'चचार' गगनमण्डलं गतवान् । तस्य देवा अनुविद्य 'त्वचं' हृदयम् 'एव अवच्छायाजह्नुः' इति । 'देवेभ्यः' नरनारायणजीवेभ्यः 'स्वासस्थां' सुखेनासितुं स्थानभूतां सुखासनरूपां 'त्वा' त्वां 'स्तृणामि' इन्द्रियरूपबर्हिषा छादयामि ।

शुद्धमात्मतत्त्वं ब्रह्माग्नौ होतव्यम्, तद्व्यतिरिक्तमग्रे वक्ष्यमाणदेवेभ्योऽर्पणीयम् । यथा 'भुवपतये' जीवाय 'स्वाहा', 'भुवनपतये' नराय 'स्वाहा', 'भूतानां पतये' नारायणाय 'स्वाहा', स्वाहाशब्दो निपातो देवान् प्रति दानवाची । हविर्दत्तम् । यथा श्रुतिः 'एतानि वै तेषामग्नीनां नामानि यद् भुवपतिर्भुवनपतिर्भूतानां पतिः, तद्यथा वषट्कृतं हुतमेवमस्यैतेष्वग्निपु भवति' (श० ब्रा० १. ३. ३. १७) । पुराग्नेर्भ्रातरः 'नरनारायणजीवाः' वषट्कार (हविर्दान)-भयाद् भूमिं (कारणं) प्राविशंस्तद्दुःखेनाग्निरपि (ब्रह्माग्निरपि) पलाय्योदके 'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति' (तै० आ० १०. १५. १) प्राविशत्, ततो देवैरानीय स्वाधिकारे स्थाप्यमान एवमवदत्—यदेतैर्मद्भ्रातृभिर्मां परिधत्त, एषां च यज्ञभागः कल्प्यतामिति । ततस्तेऽग्नेर्भ्रातरः परिधयो जातास्तेषां च स्कन्नं (ब्रह्माग्न्याहुतिस्कन्नं) हविर्भागः कृत इति कथा (श० ब्रा० १. ३. ३. १३-१६) ।

सात्वतपक्षभाष्यम्

गोवर्धनधारणेन व्रजत्राणाद् दलितदर्पः शक्रः कामधेन्वा सह समागतो भगवन्तं स्तौति स्वापराधक्षमापनाय—अदित्या इति । प्रभो ! 'अदित्यै' अदित्याः पृथिव्याः सत्यभामाया वा वसुधाया वा पृथिविवासिप्राणिमात्रस्य वा 'व्युन्दनं' विशेषेण क्लेदकः प्रणयसलिलेन हृदय-द्रावकः, सस्नेहं व्यवहरणाद् हृदयसम्राट् 'असि' भवसि, कृत्स्नाः प्रजास्त्वयि प्रीता इति भावः । 'विष्णोः' जगद्रक्षितुं विविधानवतारान् धारयतो विष्णोश्चक्रपाणेः 'स्तुपः' शिखेव मुख्यः कलासंघातात्मा वा, पूर्णत्वेन सकलकलासनाथत्वात् । 'स्तुवो दीर्घश्च' (उ० सू० ३. २५) इत्युणादिसूत्रेण 'प' प्रत्यये साधु । अत्र दैर्घ्याभावश्छान्दसः । 'ऊर्णम्रदसम्' अतिकोमलम्, दयार्द्रचेतस्कम् । अथवा ऊर्णः सर्ववस्त्वाच्छादको व्यापकः स चासौ म्रदीयान् मृदुतरस्तादृशं विभुं दयानिधिं 'स्वासस्थां'सु सुन्दरे आसे आसने स्थितं, लिङ्गव्यत्ययः 'त्वा' त्वां नन्दनन्दनं 'स्तृणामि' आच्छादयामि पुष्पवृष्ट्यादिना आवृणोमि, भक्त्यार्चामि । किमर्थम् ? 'देवेभ्यः' देवाननुकम्पितं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयं भवदनुचरा देवाः कृतापराधाः क्षमादानेनानुग्राह्या इति भावः। 'भुवपतये' पृथिवीस्वामिने, 'भुवनपतये' चतुर्दशभुवनस्वामिने, किं बहुना, 'भूतानां पतये' ऋषिपितृदेवमनुष्याणां सर्वेषां प्राणभृतां स्वामिने। अथवा 'भुवनपतये' इत्यस्यैव विवरणं 'भूतानां पतये' इति। स्वाहेति निपातो नानार्थकत्वादत्र सुवचनादिना समादरार्थः। ब्रह्माण्डपतिं त्वां शोभनवचोभिः समाद्रियामहे भवन्तं प्रसादयितुं बद्धकरा वयं प्रार्थयामहे इति भावः।

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्टचै यजमानस्य परिधिरस्यग्निरिड ईडितः। इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्टचै यजमानस्य परिधिरस्यग्निरिड ईडितः। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्टचै यजमानस्य परिधिरस्यग्निरिड ईडितः॥ ३॥

१. मध्यमपरिध्याधानम्, २. दक्षिणपरिध्याधानम्, ३. उत्तरपरिध्याधानम्।

देवयाजिपक्षभाष्यम्

अस्यां तृतीयकण्डिकायां त्रयो मन्त्राः। 'गन्धर्वस्त्वा' इत्यादिः मध्यमपरिध्याधानः। 'इन्द्रस्य' इत्यादिर्दक्षिणपरिध्याधानः। 'मित्रावरुणौ' इत्यादिश्चोत्तरपरिध्याधानो मन्त्रः। सर्वेषां परमेष्ठी प्राजापत्य ऋषिः, याजुषी छन्दः। मिश्रमते प्रथममन्त्रस्य याजुषी गायत्री छन्दः। परिधयो देवताः (श० ब्रा० १. ३. ४. २-४; का० श्रौ० २. ८. १)।

वेद्यां प्रस्तरं प्रस्तीर्यानन्तरं परिधीन् परिधत्ते। परिधयो नामाहवनीयस्य परितो निधीयमानाः पलाशादिवृक्षसमिधः। ते परिधय एकवृक्षीया बाहुमात्राः पालाशाः, वैकङ्कताः, कार्ष्मर्यमयाः बैल्वा वा ग्राह्याः, पूर्वपूर्वालाभे उत्तरोत्तरा ग्राह्याः। पालाशादिपरिध्यलाभे खादिरा औदुम्बरा वा परिधयो ग्राह्याः। एतान् परिधीन् मध्यमे दक्षिणे उत्तरे चेत्येवंक्रमेण परिदध्यात्।[1]

मध्यमपरिधिं परिधित्सुः पठति—हे परिधे! 'गन्धर्वो विश्वावसुः' विश्वावसुसंज्ञको गन्धर्वः 'त्वा' त्वां 'परिदधातु' आहवनीयं परितः स्थापयतु। विश्वं वसु द्रविणादिकं यस्य, विश्वस्मिन् सर्वत्र वसुर्वासो वा यस्येति बहुव्रीहिसमासे 'बहुव्रीहौ विश्वं संज्ञायाम्' (पा० ६. २. १०६) इति विश्वस्य पूर्वपदस्यान्तोदात्तत्वम्। 'विश्वस्य वसुराटोः' (पा० ६. ३. १२८) इति सूत्रेण वसुशब्दे परतो विश्वशब्दस्य दीर्घः। द्युलोकस्थं सोमं रक्षितॄणामन्यतमो गन्धर्वो विश्वावसुः श्रुत्यादिषु प्रसिद्धः। कस्मै प्रयोजनाय स्थापयतु? 'विश्वस्य' सर्वलोकस्या-

---

१. परिधीन् परिदधात्यार्द्रानेकवृक्षीयान् बाहुमात्रान् पालाशवैकङ्कतकार्ष्मर्यबैल्वान् पूर्वालाभे पूर्वालाभ उत्तरान् खादिरौदुम्बरान् वा मध्यमदक्षिणोत्तरान् 'गन्धर्व' इति प्रतिमन्त्रम्। (का० श्रौ० सू० २. ८. १)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हवनीयस्थानीयस्य सर्वयज्ञस्य वा 'अरिष्टचै' अहिंसायै। 'रिष हिंसायाम्' (भ्वा० प० ६९४) अथवा 'रिष हिंसायाम्' (दि० प० १२३१)। रेषणं रिष्टिः, भावे क्तिन्। न रिष्टिररिष्टिस्तस्यै। परिध्यभावे यज्ञमसुरा हिंसन्ति। किञ्च त्वं 'यजमानस्य' यज्ञानुष्ठातुः 'परिधिः' परितः सर्वविध-दुःखाद् धाता रक्षिता 'असि'। न केवलं यज्ञरक्षार्थं तदनुष्ठातुर्यजमानस्यापि रक्षार्थं परिधिर्वृत इत्याशयः। 'अग्निः' त्वम् आहवनीयस्याग्नेर्भुवपतिनामा प्रथमो भ्राता, अत एव तत्सम्बन्धात् त्वमप्यग्निरूपः। 'इड ईडितः' उव्वटाचार्योऽत्र इडे ईडितः इति सन्धि विश्लेषयति। तन्मत ईड्यते-ऽनेनेति करणव्युत्पत्त्या इट् स्तोत्रम्, 'इडे' स्तोत्राय होतृकृताय 'ईडितः' स्तुतः। 'ईड स्तुतौ' (अ० आ० १०१९)। होतृकृतस्तोत्रेण स्तुत इति भावः। अन्ये 'इडः ईडितः' इति विश्लिष्य 'इडः' स्तोत्रार्हः 'ईडितः' होत्रादिभिः स्तुतश्चेत्येवमर्थापयामासुः। तन्मते 'इडः' इत्यत्र कर्मण्यर्थे 'घञर्थे कविधानम्' (पा० वा० ३. ३. ५८) इति कः प्रत्ययो ज्ञातव्यः। ततो दक्षिणपरिधिं परिधित्सुर्मन्त्रं पठति—हे दक्षिणपरिधे! त्वम् 'इन्द्रस्य दक्षिणः बाहुः असि' रक्षणसामर्थ्यात् तत्रेन्द्रबाहुत्वोपचारः, इन्द्रस्य दक्षिणो बाहुरिव त्वमसीति भावः। अत्राग्निशब्देन तदीयो द्वितीयो भ्राता भुवनपतिनामा ग्राह्यः। 'अरिष्टचै' इत्यादि व्याख्यातम्। ततस्तृतीयमुत्तरपरिधिं परिधत्ते—हे उत्तरपरिधे! 'मित्रावरुणौ' वाय्वादित्यौ देवौ 'त्वा' त्वाम् 'उत्तरतः' उत्तरस्यां दिशि 'ध्रुवेण' स्थिरेण 'धर्मणा' धारणेन 'परिधत्ताम्' परितो धारयताम्। शेषं पूर्ववद् व्या-ख्येयम्। इहाग्नेस्तृतीयो भ्राता भूतानां पतिरग्निशब्देन ग्राह्य इति।

आत्मयाजिपक्षभाष्यम्

हे जीवरूपपरिधे! 'विश्वावसुः' विश्वस्मिन् देहे वसतीति विश्वावसुः 'गन्धर्वः' गाः रश्मीन् धारयतीति विग्रहे धृधातोः वः प्रत्यय औणादिकः, गोर्गमादेशश्च। हार्दाकाशस्थः परमात्मा 'विश्वस्य' 'अरिष्टचै' कामादीनामसुराणां हिंसापरिहाराय 'त्वा' त्वां 'परिदधातु' पश्चिमदिशि स्थापयतु। 'इडः' स्तुतियोग्यः 'ईडितः' वागादिभिः स्तुतः 'अग्निः' आत्मा, 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. ३०) त्वं 'यजमानस्य' भूतात्मनः 'परिधिः' परि समन्ताद् दधाति रक्षतीति परिधिः 'असि'। हे नर! त्वं 'विश्वस्य' 'अरिष्टचै' सर्वस्याज्ञानादेर्हिंसायाः परिहाराय 'इन्द्रस्य' ब्रह्मणः 'दक्षिणः बाहुः' रक्षाकार्यसाधकः 'असि'। 'इड ईडितः अग्निः' त्वं 'यजमानस्य' जीवात्मनः 'परिधिः' असि। 'अग्नय एते यत् परिधयः' (श० ब्रा० ९. ४. ४. २)। हे नारायणरूपपरिधे! 'मित्रावरुणौ' ज्ञान्युपासकौ, 'ब्रह्मैव मित्रः क्षत्रं वरुणः, अभिगन्तैव ब्रह्म कर्ता क्षत्रियः' (श० ब्रा० ४. १. ४. १) 'वरुणो वा आर्पयिता' (श० ब्रा० ४. ५. ७. ७)। 'विश्वस्य अरिष्टचै' 'ध्रुवेण' निश्चलेन 'धर्मणा' योगेन भक्त्या च 'त्वा' त्वाम् 'उत्तरतः' उत्तरस्यां दिशि 'परिधत्ताम्' परितः स्थापयताम्। 'इड ईडितः अग्निः' त्वं 'यजमानस्य' ज्ञाननिष्ठस्य भक्तस्य वा 'परिधिः' असि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

अजगरेण गृहीतं गोपैर्गोपिकाभिश्च सह गौरीशङ्करौ समर्चितुमम्बिकावने समागतं भगवतस्तातं श्रीनन्दं व्रजराजं रक्ष रक्षेति विलपन्तं समाकर्ण्य रक्षितुमक्षमा गोपास्तत्त्राणाय भगवन्तं प्रार्थयन्ते—विश्वावसुरिति। अस्माकमधिपते नन्दमहाराज ! 'त्वा' त्वां पूतनाबकाद्यसुरसंहारेण गोवर्धनधारणेन च प्रथितमहिमा श्रीकृष्णः 'गन्धर्वः' गां, धेनुं वेदवाचं पृथिवीञ्च धारयति पुष्णाति वा तथाविधः गोपालो वेदरक्षकः, पृथिवीं रक्षितुं धृतावतारश्च 'विश्वावसुः' विश्वं वसति यत्र स विश्वावसुः जगदाधारः, विश्वं वसु धनं स्वभूतं यस्य सः विश्वस्वामी, विश्वं वस्ते समाच्छादयतीति वा स विश्वाच्छादकः सर्वव्यापकः परमात्मा श्रीकृष्णः। 'परिदधातु' सर्वतः, सर्वत्र, सर्वदा, सर्वथा दधातु धारयतु रक्षतात्, त्रायताम्। परोक्षं प्रार्थ्य प्रत्यक्षं ब्रुवते गोपालाः—कृष्ण ! 'विश्वस्य' जगतः 'अरिष्टचै' अविनाशाय अवतीर्णस्त्वं 'यजमानस्य' त्वां पूजयतः समर्चकस्य भक्तस्य 'परिधिः' परितो धारकः दुर्गस्य परिखेव नगरस्य प्राकार इव परिरक्षिता 'असि' वर्तसे। किञ्च 'अग्निः' अग्रनेता विपदर्णवनिमग्नान् निजोपासकान् पारं प्रापयिता 'इडः' सम्प्रति ईड्यते स्तूयते स्तोष्यते च परस्तादितीडः 'ईडितः' स्तुतश्च श्रद्धाधनैः, त्रिकालं स्तुत्यर्हं इति यावत्।

पुनर्व्याहरन्ति इन्द्रस्येति। 'इन्द्रस्य' प्रतिवर्षं महता मखेन व्रजवासिभिर्यथाविधीज्यमानस्य शक्रस्य 'दक्षिणः बाहुः' दक्षिणभुजतुल्यः प्रधानतमसहायकः प्रबलस्त्वमसि। अतः समुपासितपूर्वं देवराजं विहाय वयं त्वां प्रपन्नाः, यतस्त्वमेव प्रबलारातिदैत्यगणाक्रमणाद् देवेन्द्रं रक्षसीति भावः। अपि वा इन्द्रस्य 'बाहुः' सपत्नानां बाधकः 'दक्षिणः' अनुकूलः प्रोत्साहकः समर्थकश्च। विश्वस्येत्यादिः ईडित इत्यन्तो द्वितीयांशो व्याख्यातपूर्वः। संरम्भान्मुहुर्निगदन्ति एकमेव परमेश्वरं गुणभेदेन द्विधा मत्वा। तथाहि त्वं 'मित्रः' स्निग्धः स्वजनप्रणयी 'वरुणश्च' सम्भजनीयश्च साधकैः। वेदे देवताद्वन्द्वे 'देवताद्वन्द्वे च' इत्यानङि मित्रावरुणौ इति साधुः। अपि वा मित्रः दिवसाभिमानी देवः, तत्सदृशः शेषावतारो बलरामो गौरत्वात्, वरुणः रात्र्यभिमानी देवः, तत्सदृशः श्यामः श्यामवर्णत्वाद्, रामश्यामावित्यर्थः। 'परिधत्तां' परिरक्षतां 'त्वा' त्वां व्रजराजम् 'उत्तरतः' उत्तरेण उत्कृष्टेन 'ध्रुवेण' स्थिरेण 'धर्मणा' धर्मेण तन्निमितं प्रतिश्रुतधर्मस्थापनलक्षणात् कारणात् 'अतो धर्माणि धारयन्' (ऋ० १. २२. १८) इति श्रुतेः, 'धर्मसंस्थापनार्थाय' (गीता ४. ८) इति स्मृतेश्च। निजचरणैकशरणानां स्वभक्तानां त्राणं हि भगवद्व्रतमिति भावः।

अग्रे भगवतः परिकरस्य भगवताऽभेदं स्वीकृत्य स्तौति एकवचनान्तविशेषणैः। शिष्टं समानम्। कथा चैषा भागवते (१०. ३४) द्रष्टव्या विस्तृतं वर्णिता। एवं गोपप्रार्थना-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माकर्ण्य भगवताऽजगरः पदा स्पृष्टस्तावता आङ्गिरसमहर्षिशापान्मुक्तः स परित्यज्याजगरभावं यथापूर्वं सुदर्शननामा विद्याधरोऽभूत्, भगवन्तं प्रणम्य स्वधाम जगाम चेति ।

वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे ॥ ४ ॥

आहवनीये समित्प्रक्षेपणम् ।

देवयाजिपक्षभाष्यम्

अस्यां चतुर्थ्यां कण्डिकायामेक एव मन्त्रः । 'वीतिहोत्रम्' इत्यादिमन्त्रस्याहवनीये समिधां प्रक्षेपणे विनियोगः । अस्य परमेष्ठी प्राजापत्य ऋषिः, गायत्री छन्दः, अग्निर्देवता (श० ब्रा० १. ३. ४. ६ , का० श्रौ० २. ८. २) ।

[1]समिधा प्रथमं परिधिमुपस्पृश्य तां समिधमाहवनीये प्रक्षेप्तुमाह—वीतिहोत्रमिति । 'कवे' हे क्रान्तदर्शिन् ! अतीतानागतविप्रकृष्टपदार्थानां दर्शनं क्रान्तदर्शित्वम् । 'अग्ने' हे अग्ने ! 'त्वा' त्वाम् 'अध्वरे' यागे 'अध्वरशब्दस्य यागनामसु पाठात्' (निघ० ३. १७. ३) यागे निमित्तभूते सति । 'ध्वृ हूर्छने' (भ्वा० प० ९३९) हूर्छनं नाम कौटिल्यं हिंसा । ध्वरणं ध्वरः, 'पुंसि संज्ञायां घः प्रायेण' (पा० ३. ३. ११८) इति घः प्रत्ययः । अविद्यमानो ध्वरो देवान् प्रति कौटिल्यं यत्रेति बहुव्रीहिसमासेऽन्तोदात्तत्वं 'नञ्सुभ्याम्' (पा० ६. २. १७२) इति सूत्रेण । 'समिधीमहि' संदीपयामहे । 'ञिइन्धी दीप्तौ' (रु० आ० १४४९) । कीदृशं त्वाम् ? 'वीतिहोत्रम्' 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अ० प० १०४८) । अस्मात् भावे क्तिन् प्रत्ययः । 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' (पा० ३. ३. ९६) इत्यन्तोदात्तत्वम् । वीतिः इच्छा होत्रे होतृकर्मणि यस्य । 'होतारं रत्नधातमम्' (ऋ० १. १ .१) इत्यादिश्रुतेरग्नेर्होतृत्वप्रसिद्धेः । यद्वा वीतिर्विविधा इतिर्गतिर्होतृप्रशास्त्रादिषु होत्रासु यस्य । यद्वा 'वीतिः' व्याप्तिः पुत्रपौत्रादिसमृद्धिस्तस्यै वीतये समृद्ध्यै होत्रं होमो यस्य तम् । सर्वथा बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरत्वम् । पुनः कीदृशम् ? 'द्युमन्तं' द्यौः कान्तिरस्त्यस्य स द्युमान् तं स्वयंप्रकाशम् । पुनः कीदृशम् ? 'बृहन्तम्' महान्तमिति ।

आत्मयाजिपक्षभाष्यम्

'कवे' हे मेधाविन् ! 'अग्ने' जीवात्मन् ! 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. २०), 'अध्वरे' ज्ञानयज्ञे 'वीतिहोत्रं' विः अलिङ्गः देवः, तस्य इतिः गतिः, 'इण् गतौ' (अ० प० १०४५) । 'वीतिः' ब्रह्मप्राप्तिस्तस्यै ब्रह्मप्राप्तये 'होत्रं' होमो यस्य तं 'द्युमन्तं' ब्रह्मवर्चसवन्तं 'बृहन्तं' धारणया विराड्भावमापन्नं 'त्वा' त्वां 'समिधीमहि' प्राणसमिधा सम्यग् दीपयामः ।

---

१. प्रथमं परिधिं समिधोपस्पृश्य 'वीतिहोत्रम्' इत्यादधाति । (का० श्रौ० सू० २. ८. २)

२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

अजगराननान्मुक्तं व्रजराजं दर्शं दर्शं हृष्टचेतसो व्रजवासिनः कृष्णं प्रशंसन्ति—वीतिहोत्रमिति। 'कवे' क्रान्तदर्शिन्! अतीतानागतदूरवर्तिपदार्थानां युगपद् द्रष्टः, 'अग्ने' अग्रणीः परमात्मन्! 'बृहन्तं' महान्तं 'द्युमन्तं' स्वतोद्योतमानं स्वप्रकाशचित्स्वरूपं, 'वीतिहोत्रं' विशिष्टा इतिः गतिः पुत्रधनादिसमृद्धिस्तस्यै होत्रमाह्वानं यस्य तादृशम् 'इण् गतौ' (अ० प० १०४५)। अपि वा वीतिर्भक्षणं नवनीतदध्यादेस्तदर्थं, वीतिः कान्तिरभिलाषस्तत्पूर्त्यर्थं वा होत्रमाह्वानं यस्य तथाविधं 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अ० प० १०४८), असनं सपत्ननिरासस्तदर्थं वा हूयमानमित्यर्थः।

अथवा वीतयः प्रभोर्विशेषेण स्मर्तारो भक्ताः, 'इक् स्मरणे' (अ० प० १०४७) वीतयः वेदमध्येतारो वा 'इङ् अध्ययने' (अ० आ० १०४६) तेषां होत्रं प्रसादकं प्रीणयितारं, लोके अधिपूर्वावपि 'इक्' 'इङ्' धातू प्रायेण वेदे विपूर्वौ। विरुपसर्गोऽत्र 'अधि'समानार्थकः। महाभाष्यकारो जुहोतेरर्थं प्रीणनमपि मनुते। 'अध्वरे' गौरीशङ्करयजनलक्षणे महोत्सवे। अपि वा अध्वानं मार्गं रान्ति ददति दर्शयन्तीत्यध्वराः मार्गदर्शकास्तेष्वध्वरेषु मार्गदर्शकेषु बृहन्तमित्यनेन सम्बन्धः। 'अध्वरे' इति वचनव्यत्ययश्छान्दसः। 'त्वा' त्वां 'समिधीमहि' दीपयामः, स्तुतिभिः प्रसादयामः।

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै। सवितुर्बाहू स्थ ऊर्णम्रदसन्त्वा स्तृणामि स्वासस्थं देवेभ्य आ त्वा वसवो रुद्रा आदित्याः सदन्तु॥ ५॥

१. आहवनीये द्वितीयसमित्प्रक्षेपणम्, २. आहवनीयमीक्षमाणस्य जपः, ३. बर्हिषि तृणस्य तिर्यङ् निधानम्, ४. तृणोपरि प्रस्तरास्तरणम्, ५. प्रस्तरोपस्पर्शनम्।

देवयाजिपक्षभाष्यम्

अस्यां पञ्चम्यां कण्डिकायां पञ्च मन्त्राः। तेषां 'समिदसि०' इति प्रथम आहवनीये समित्प्रक्षेपणः। अस्य दैवी बृहती छन्दः, अग्निर्देवता। 'सूर्यस्त्वा' इति द्वितीयो मन्त्र आहवनीयमीक्षमाणस्याध्वर्योर्जपे विनियुक्तः। अस्याऽऽसुरी गायत्री छन्दः, लिङ्गोक्ता देवता। 'सवितुः' इति तृतीयो मन्त्रो बर्हिषि तृणस्य तिर्यङ् निधाने विनियुक्तः। अस्य याजुषी गायत्री छन्दः, विधृतिर्देवता। 'ऊर्णम्रदसम्' इति चतुर्थो मन्त्रस्तृणोपरि प्रस्तरास्तरणे विनियुक्तः, अस्यासुरी गायत्री छन्दः, प्रस्तरो देवता। 'आ त्वा' इति च प्रस्तरोपस्पर्शनः। अस्यासुरी गायत्री छन्दः, प्रस्तरो देवता। ऋषिः सर्वेषां परमेष्ठी प्राजापत्यः (श० ब्रा० १. ३. ४. ७-१२ ; का० श्रौ० २. ८. ३-११)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1]परिधिमनुपस्पृश्य द्वितीयमिध्ममाहवनीये क्षिपति—हे इध्म ! 'समिद्' वह्नेः समिन्धनं दीपनम् 'असि'। तत आहवनीयमीक्षमाणो मन्त्रं पठति—सूर्यस्त्वेति ।[2] 'त्वा' त्वां हे आहवनीय ! 'पुरस्तात्' प्राच्यां दिश्युदितः 'सूर्यः' 'पातु' रक्षतु। प्रतीच्यामवाच्यामुदीच्यां च तिसृषु दिक्षु परिधयस्तव रक्षकाः, पूर्वस्यां च दिशि तेऽभ्युदितः सूर्यो रक्षकः स्यादित्याशयः। कुतो रक्षतु ? 'कस्याश्चिद्' जगति या काचिदपि सम्भावयितुं शक्यतेऽभिशस्तिरभिशापस्तस्याः सर्वस्याः 'अभिशस्त्यै' अभिशस्तेः सकाशात्, पञ्चम्यर्थे चतुर्थी। इमे गोप्तारस्त्वां गोपायन्तु। 'गुप्त्यै वा अभितः परिधयो भवन्ति, अथैतत् सूर्यमेव पुरस्ताद् गोप्तारं करोति, नेत् पुरस्तान्नाष्ट्रा रक्षांस्यभ्यवचरानिति' (श० ब्रा० १. ३. ४. ८)। ततो बर्हिष उपरि प्रस्तरस्थापनार्थं द्वे तृणे तिरश्ची स्थापयति।[3] इमे एव विधृती आचक्षते। हे तृणे ! युवां 'सवितुः' सवितृदेवस्य 'बाहू' बाहुस्थानीये 'स्थः'। तयोः प्रस्तरं स्तृणाति—ऊर्णम्रदसमिति। 'ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः'[4] व्याख्यातं द्वितीयकण्डिकायाम्। 'ऊर्णमिव मृदुतरं त्वां देवानां सुखेनोपवेशनार्हं स्तृणामीति तयोर्विधृत्याख्यतृणयोरुपरि प्रस्तरं स्तृणाति। अथ प्रस्तरमालम्भयितुं तदुपरि पाणी निदधाति[5]—हे प्रस्तर ! 'त्वा' त्वां वसवो रुद्रा आदित्या इति त्रयः प्रातःसवनादिसवनत्रयाभिमानिनो देवाः 'आसदन्तु' प्रसारयन्त्विति।

आत्मयाजिपक्षभाष्यम्

हे प्राणाधिष्ठातृदेवते ! त्वं 'समित्' आत्माग्नेः समिन्धनं दीपनम् 'असि'। हे ब्रह्माग्ने ! 'सूर्यः' ज्ञानचक्षुः, 'चक्षुरादित्यः' (श० ब्रा० ३. २. २. १३)। 'पुरस्तात्' पूर्वस्यां दिशि 'कस्याश्चित् अभिशस्त्यै' सर्वस्याः हिंसायाः सकाशात् 'त्वा' त्वां 'पातु' रक्षतु। यस्मात् परिध्यभावे वषट्कारभयाद् ब्रह्माग्निरन्तर्धीयते। तथा च श्रुतिः—'स होवाच वज्रो वै तान् वषट्कारः प्रावृणक्, वज्राद् वै वषट्काराद् बिभेमि यन्मा वज्रो वषट्कारो न प्रवृञ्ज्याद् एतैरेव मा परिधत्त, तथा मा वज्रो वषट्कारो न प्रवर्क्ष्यतीति तथेति तमेतैः पर्यदधुस्तन्न वज्रो वषट्कारो प्रावृणक्, तद् वर्मैवैतद् अग्नये नह्यति यदेतैः परिदधाति। त उ हैत ऊचुः इदमु चेदस्मान् यज्ञे युङ्क्थास्त्वेवास्माकमपि यज्ञे भाग इति। तथेति देवा अब्रुवन् यद् बहिष्परिधि स्कन्त्स्यति तद् युष्मासु हुतम्, अथ यद्व उपर्युपरि होष्यन्ति तद्वोऽविष्यत्यथ यदग्नौ होष्यन्ति

---

१. अनुपस्पृश्य द्वितीयां 'समिदसि' इति। (का० श्रौ० सू० २. ८. ३)
२. 'सूर्यस्त्वा' इति जपत्याहवनीयमीक्षमाणस्तद्वचनत्वात्। (का० श्रौ० सू० २. ८. ४)
३. आवृत्य वेदिं बर्हिषस्तृणे तिरश्ची निदधाति 'सवितुरिति'। (का० श्रौ० सू० २. ८. ५)
४. तयोः प्रस्तरं स्तृणाति 'ऊर्णम्रदसम्' इति। (का० श्रौ० सू० २. ८. १०)
५. अभिनिदधाति 'आ त्वा वसव' इति। (का० श्रौ० सू० २. ८. ११)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्धोऽविष्यतीति, स यदग्नौ जुह्वति तदेनानवत्यथ यदेनान् उपर्युपरि जुह्वति तदेनानवति, अथ यद् बहिष्परिधि स्कन्दति तदेतेषु हुतम्' (श० ब्रा० १. ३. ३. १४-१६)। हे इडापिङ्गले ! युवामुभे 'सवितुः' ईश्वरस्य 'बाहू' कार्यसाधिके 'स्थः'। हे यजमानरूपप्रस्तर ! 'यजमानो वै प्रस्तरः' (श० ब्रा० १. ८. १. ४४)। 'देवेभ्यः' परानरनारायणेभ्यः 'स्वासस्थं' सुखेनासनेन स्थीयतेऽत्र तादृशम् 'ऊर्णम्रदसम्' मृगचर्मवत् कोमलं 'त्वा' त्वां 'स्तृणामि'। 'वसवः' अष्टविधा प्रकृतिः—

'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥'
'अपरेयम्०' (गीता ७. ४-५)

इति भगवद्वचनात्। 'रुद्राः' दश प्राणा एकः प्रतिविम्बश्च 'आदित्याः' अदितेः परायाः पुत्रा दशेन्द्रियाणि मनो बुद्धिश्च 'त्वा' यजमानरूपप्रस्तरं त्वाम् 'आसदन्तु' प्रसारयन्त्विति।

सात्वतपक्षभाष्यम्

द्यूतहारितसर्वस्वं द्वादशवर्षाणि यावद् दत्तवनवासं त्रयोदशे वर्षे समादिष्टाज्ञातवासं ज्ञाते पुनः प्रत्यावर्तनीयतावत्कालारण्यवासं वने बन्धुभिः सह निवासाय गतं युधिष्ठिरं पाण्डु-तनयसुहृद्भिरन्यै राजभिरुपेतः श्रीकृष्णः सङ्गन्तुमुपस्थितः सान्त्वयति—समिदसीति। युधिष्ठिर ! एते त्वन्मित्राणि राजानोऽहञ्च युधि त्वत्साहाय्याय प्रतिजानीमहे। त्यज चिन्ताम्, गच्छता कालेन युधि निहत्य सर्वान् सपत्नान् 'समिद्' समिन्धनः संदीप्तः, तेजसा समिद्धः सम्राट् 'असि' भवितासि। 'पुरस्तात्' पूर्वस्यां दिशि उद्यन् भास्करः 'त्वा' त्वां 'पातु' रक्षतु, त्वत्-सौभाग्यसुप्रभातं भूयादित्यर्थः। अपि वा 'सूर्यः' सर्वान्तर्यामी प्रजापतिः, देवराजत्वात् सर्वेषां प्रेरक इन्द्रो वा पुरस्तात् प्रथमं पातु रक्षतु। ततः 'कस्याश्चित् अभिशस्त्यै' पञ्चम्यर्थे चतुर्थी अभिशस्तिरभिशापोऽनिष्टप्रसङ्गस्तस्मात्, सर्वस्मादनिष्टप्रसङ्गादिति भावः। 'सवितुः' प्रजापतेः इन्द्रस्य वा' जगद्रक्षणाय 'बाहू स्थः' भुजौ भवथः। सविता परमेश्वरस्त्वां स्वबलवीर्यात्मक-बाहुद्वयस्थानीयं द्वारीकृत्य जगत् पायादिति तात्पर्यम्। 'नराणाञ्च नराधिपः' इति गीता-(१०. २७)वचनाद् राजा हि भगवद्विभूतिस्तस्मात् परमेश्वरेण विश्वस्य रक्षणे तन्निमित्तत्वं सूपपद्यते। 'देवेभ्यः' यज्ञादिना देवान् प्रसादयितुं 'ऊर्णम्रदसम्' ऊर्णमिव मृदुतरं दीनवत्सलं दयार्द्रहृदयं 'स्वासस्थं' स्वासे शोभने राजसिंहासने स्थितं 'स्तृणामि' स्तृणीयां, पुष्पादिभि-राच्छाद्याभिषिञ्चेयं, हस्तिनापुरपैतृकराजसिंहासन उपवेशयेयं, स्थापयेयम्। भाविनि राज्या-भिषेके वर्तमानत्वोपचारस्तस्य सद्यः सम्पत्तिसूचनाय। 'त्वा' त्वां 'वसवः' अग्न्यादयः पृथिवी-स्थाना देवाः 'रुद्राः' अन्तरिक्षस्थाना देवाः 'आदित्याः' द्युस्थाना देवाः। अलं बहुना, सर्वदेवाः 'आसीदन्तु' त्वद्रक्षणायागच्छन्तु। अपि वा 'वसवः' प्रजानां वासयितारः सज्जनहितकराः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'रुद्राः' दुर्जनानां रोदकाः 'आदित्याः' अदीनाः, दिग्विजयेन धनाहरणाय गत्वराः। आददाना यन्तीति चादित्यशब्दनिर्वचनम्। भवद्भ्रातरः 'त्वा' त्वाम् 'आसदन्तु' त्वामुपासीनाः त्वत्सेवैकव्रता भवेयुरिति भावः।

घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियँ सद आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियँ सद आसीद घृताच्यसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रियँ सद आसीद प्रियेण धाम्ना प्रियँ सद आसीद। ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम्॥ ६॥

१. प्रस्तरे जुह्वासादनम्, २. बर्हिष्युपभृदासादनम्, ३. बर्हिषि ध्रुवासादनम्, ४. वेद्यां हविरादानम्, ५. हविरालम्भनम्, ६. हृदयालम्भनम्।

देवयाजिपक्षभाष्यम्

अस्यां षष्ठ्यां कण्डिकायां षण् मन्त्राः। 'घृताच्यसि जुहूः' इत्यादिर्मन्त्रः प्रस्तरोपरि जुह्वासादनः।[१] अस्य साम्नी त्रिष्टुप् छन्दः, जुहूर्देवता। द्वितीयः 'घृताच्यस्युपभृत्'[२] इत्यादिर्मन्त्रो बर्हिष्युपभृदासादनः। अस्य साम्नी त्रिष्टुप् छन्दः, उपभृद् देवता। तृतीयः 'घृताच्यसि ध्रुवा' इत्यादिर्मन्त्रो बर्हिषि ध्रुवासादनः।[३] अस्य साम्नी त्रिष्टुप् छन्दः, ध्रुवा देवता। 'प्रियेण धाम्ना' इत्यादिर्मन्त्रो वेद्यां हविरादानः।[४] अस्य याजुषी जगती छन्दः, हविर्देवता। 'ध्रुवा असदन्' इत्यादिः पञ्चमो मन्त्रो वेदिस्थसर्वहविरालम्भनः।[५] अस्य याजुषी छन्दः, विष्णुर्देवता। 'पाहि माम्' इत्यादिः षष्ठो मन्त्रो हृदयालम्भनः।[६] अस्य याजुषी गायत्री छन्दः, विष्णुर्देवता। परमेष्ठी प्राजापत्यः सर्वेषाम् ऋषिः (श० ब्रा० १. ३. ४. १३-१६ ; का० श्रौ० २. ८. १२-२०)।

अधुना प्रस्तरं (कुशमुष्टिं) सव्येन (वामेन) हस्तेन स्पृशन्नेवाध्वर्युरग्नीधा दत्तां जूहूं तेनैव हस्तेन गृहीत्वा तां प्रागग्रां प्रस्तरोपरि स्थापयति—हे जुहु ! त्वं 'घृताची' घृतपूर्णा घृतमञ्चति प्राप्नोतीति यद्वा घृतमच्यते प्राप्यतेऽनयेति व्युत्पत्तिः। 'असि' वर्तसे 'नाम्ना' अन्व-

---

१. सव्याशून्ये जुहूं प्रतिगृह्य निदधाति 'घृताची' इति। (का० श्रौ० सू० २. ८. १२)
२-३. एवमितरे उत्तराभ्यां प्रतिमन्त्रं बर्हिष्युपभृतं, ध्रुवां चावकृष्टेऽनुपूर्वम्। (का० श्रौ० सू० २. ८. १३)
४-५. 'प्रियेण धाम्ना' इति हवींषि वेद्यां कृत्वा 'ध्रुवा असदन्' इति सर्वाण्यालभते। (का० श्रौ० सू० २. ८. १६)
६. 'पाहि माम्' इत्यात्मानम्। (का० श्रौ० सू० २. ८. २०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

र्थसंज्ञया त्वम् । अत एव 'जुहूः' हूयते देवेभ्यो विसृज्यते घृतमनयेति विग्रहे 'हु दानादनयोः' (जु० प० १०८३) धातोः क्विपि 'द्युतिगमिजुहोतीनां द्वे च' 'जुहोतेर्दीर्घश्च' (पा० वा० ३. २. १७८) इति द्विर्भावो दीर्घश्च । 'सा' त्वं 'प्रियेण' देवप्रीतिसाधनेन 'धाम्ना' आज्येन 'एतद् वै देवानां प्रियं धाम यदाज्यम्' (श० ब्रा० १. ३. २. १७) 'इदं' निर्दिष्टं 'प्रियं सदः' प्रीतिसाधनं प्रस्तरलक्षणम् आसनम् 'आसीद' अध्यास्स्व । ततोऽपरेण मन्त्रेण जुह्वपेक्षया निम्ने देशे बर्हिषि, उपभृतं नाम स्रुचं सादयति—हे उपभृत् ! त्वं 'घृताची' घृतपूर्णा सती 'नाम्ना' अन्वर्थसंज्ञया 'उपभृत्' उप जुह्वाः समीपे स्थिता बिभर्ति धारयत्याज्यमिति । 'डुभृञ् धारणपोषणयोः' (जु० उ० १०८७) कर्तरि क्विप् प्रत्ययः । 'सा' त्वं 'प्रियेण धाम्ना' आज्याख्येन पूर्णा सती 'प्रियं सदः' इदं बर्हिर्लक्षणमासनमधितिष्ठ । एवमेव तृतीयेन मन्त्रेणोपभृतोऽप्यधोदेशे बर्हिषि घृतपूर्णां ध्रुवां स्रुचं स्थापयति—'घृताच्यसि ध्रुवा नाम्ना' यथा होमकार्ये जुहूपभृतोः स्रुचोरितस्ततश्चालनं भवति तथा ध्रुवा स्रुङ् न चाल्यते तस्मात् स्थिरत्वाद् युज्यते ध्रुवाया ध्रुवात्वमिति । 'सा' त्वं 'प्रियेण धाम्ना' आज्येन सह 'प्रियं सदः' इदं बर्हिरासनम् 'आसीद' । अथ वेद्यामाज्यपुरोडाशादीनि हवींषि ध्रुवाया उत्तरत आसादयति—हे पुरोडाश ! 'प्रियेण धाम्ना' आज्येन सह 'प्रियं धाम' अस्मिन् वेदिस्थाने तिष्ठ । सर्वाणि हवींषि मन्त्रं पठन्नालभते—'ऋतस्य' सत्यफलस्य यज्ञस्य 'योनौ' वेद्याख्ये स्थाने 'ध्रुवा' ध्रुवाणि यान्येतानि यज्ञवस्तूनि 'असदन्' आसादितानि तानि हे 'विष्णो' यज्ञपुरुष ! 'पाहि' रक्ष । न केवलानि ध्रुवाणि यज्ञवस्तून्येव 'यज्ञम्' अनुष्ठीयमानं दर्शपूर्णमासयागं 'पाहि' निरुपद्रवं कुरु, 'यज्ञपतिं' च 'पाहि' । अध्वर्युर्यज्ञसमाप्तिपर्यन्तमात्मरक्षां च प्रार्थयते—'माम्' अध्वर्युम् 'यज्ञन्यम्' यज्ञस्य नेतारम्, यज्ञं नयतीति यज्ञनीस्तं 'पाहि' रक्षेति ।

प्रथमे स्रुगासादने नामाऽनुवाके षट् कण्डिकाः । तासु च यथार्थं मन्त्राणां चतुर्विंशतिः (प्रथमायां त्रयः, द्वितीयस्यां षट्, तृतीयस्यां त्रयः, चतुर्थ्यामेकः, पञ्चम्यां पञ्च, षष्ठ्यां षट्) व्याख्याता । तत्र चेमानि कर्माणि—१. इध्मप्रोक्षणम्, २. वेदिप्रोक्षणम्, ३. बर्हिःप्रोक्षणम्, ४. बर्हिर्मूलेषु प्रोक्षणीनिनयनम्, ५. प्रस्तरग्रहणम्, ६. वेदिसंस्तरणम्, ७–९. स्कन्नाभिमर्शनम्, १०. मध्यमपरिध्याधानम्, ११. दक्षिणपरिध्याधानम्, १२. उत्तरपरिध्याधानम्, १३. आहवनीये समित्प्रक्षेपणम्, १४. आहवनीये द्वितीयसमित्प्रक्षेपणम्, १५. आहवनीयमीक्षमाणस्य जपः, १६. बर्हिषि तृणस्य तिर्यङ् निधानम्, १७. तृणोपरि प्रस्तरास्तरणम्, १८. प्रस्तरोपस्पर्शनम्, १९. प्रस्तरे जुह्वासादनम्, २०. बर्हिष्युपभृदासादनम्, २१. बर्हिषि ध्रुवासादनम्, २२. वेद्यां हविरादानम्, २३. हविरालम्भनम्, २४. हृदयालम्भनमिति ।

आत्मयाजिपक्षभाष्यम्

हे हृदय ! वागाभिमानिनि देवते वा 'नाम्ना जुहूः' हृदयं वाग् वा 'असावेव द्यौर्जुहूः'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(श० ब्रा० १. ३. २. ४) 'वागेव जुहूः' (श० ब्रा० ११. ५. ६. ३) त्वं 'घृताची' घृतम् इन्द्रियशक्तिसमूहमञ्चति प्राप्नोतीति घृताची इन्द्रियशक्तियुता । 'एतद् वै देवानां प्रियतमं धाम यद् आज्यम्' (श० ब्रा० १. ३. २. १७) इति श्रुतेः । 'असि' । 'सा' त्वं 'प्रियेण' देहाभिमानिनां प्रियेण 'धाम्ना' तेजसा 'तेजो वा आज्यम्' (श० ब्रा० १३. १. १. १.) 'इदं प्रियं सदः' प्रस्तरलक्षणं यजमानम् 'आसीद' अधितिष्ठ । हे मानसान्तरिक्षाभिमानिनि देवते ! 'नाम्ना उपभृत्' मनः 'अन्तरिक्षमुपभृत्' (श० ब्रा० १. ३. २. ४) 'मन उपभृत्' (११. ५. ६. ३) त्वं 'घृताची' इन्द्रियशक्तियुता 'असि' 'सा' त्वं 'प्रियेण धाम्ना इदं प्रियं सद आसीद' । हे ज्ञान-चक्षुः आत्मन् वा 'आत्मैव ध्रुवा तद्वा आत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति' (श० ब्रा० १. ३. २. २) । 'चक्षुर्ध्रुवा' (श० ब्रा० ११. ५. ६. ३) अचलत्वेन ध्रुवा नाम त्वं 'घृताची असि' । 'सा त्वं प्रियेण धाम्ना इदं प्रियं सद आसीद' । हे आत्मप्रतिविम्व ! 'प्रियेण धाम्ना' इन्द्रियशक्त्या सह 'प्रियं सद आसीद' । 'ध्रुवाः' इन्द्रियमनोबुद्धिप्रतिविम्वाः 'ऋतस्य' ब्रह्मणः 'योनौ' हार्दाकाशे 'असदन्' अतिष्ठन् । विष्णो ! 'ताः' शक्तीः 'पाहि' 'यज्ञं' ज्ञानयज्ञं 'पाहि' 'यज्ञपतिं' यजमानं 'पाहि' 'मां यज्ञन्यं' योगाचार्यं 'पाहि' इति ।

सात्वतपक्षभाष्यम्

दुःसहवस्त्राहरणादितिरस्कारसमुत्पन्नकोपातिरेकभृतहृदयां द्रौपदीमाभाषते श्रीकृष्णः, कतिपयविशिष्टनामानि गृहीत्वा आशीराशिना स्नपयति च 'घृताची' इति । 'घृताची' घृताची-संज्ञकाप्सरसस्तुल्या, सौन्दर्यातिरेकेण त्रिभुवनसुन्दरीत्यर्थः । अपि वा घृतं दीप्तिः प्रकाशो विवेकस्तेनाञ्चिता पूजिता विवेकमुपगता वा । 'घृ क्षरणदीप्त्योः' (जु० प० १०९६) 'अञ्चु गतिपूजनयोः' 'नाम्ना' संज्ञया 'जुहूः' हूयते प्रसाद्यते अनया सा जुहूः, जुहोतिरत्र प्रीणनकर्मा । मधुरभाषणादिना सर्वजनमनःप्रसादिका 'असि' वर्तसे । सा त्वं 'प्रियेण धाम्ना' तेजसा युक्ता 'इदं' बुद्धिस्थं 'प्रियं' प्रीतिकरं 'सदः' राजभवनं राजसिंहासनं वा 'आसीद' अधितिष्ठ । भविष्यतोऽपि राजभवनप्रवेशराजसिंहासनारोहणादेः सद्यः समुपस्थितिं सूचयितुमिदमा निर्देशः । 'उपभृत्' समीपेऽवस्थाय राजानं बिभर्ति धारयति पुष्णाति वा उपभृत् पट्टराज्ञी 'ध्रुवा' स्थिरा अविचलिता सुचिरं राजवैभवोपभोगिनी । कृष्णे ! विवेकिनी सुचिरं राज-वैभवोपभोगिनी च पट्टराज्ञी त्वं भवेति ममाशीः । परित्यज चिन्तां, सद्यस्त्वां पट्टराज्ञीपदे-ऽभिषेक्ष्यामि समं सम्राजा युधिष्ठिरेणेति भावः । अन्यानि पदानि व्याख्यातपूर्वाणि । आशी-राशितुष्टहृदया कृष्णा कृष्णं प्रार्थयते–'विष्णो' सर्वव्यापक श्रीकृष्ण परमात्मन् ! 'ऋतस्य' सत्यस्य तन्निष्ठस्य राज्ञो युधिष्ठिरस्य 'योनौ' आश्रये सम्पर्के वा 'ध्रुवाः' अयं युधिष्ठिर एवास्माकं राजा नान्य इति दृढनिश्चयाः प्रजाः 'असदन्' प्राप्ताः 'ताः' तथाविधाः प्रजाः 'पाहि' रक्ष, रक्षणं चात्र तन्मनोरथपूरणम्, 'यज्ञं' मद्भर्तॄणां पाण्डवानां संगतिं संग्रन्थनं 'पाहि' रक्ष दृढीकुरु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'यज्ञपतिं' संग्रन्थनाध्यक्षं राजानं युधिष्ठिरं 'यज्ञन्यं' यज्ञस्य संग्रन्थनस्य 'नेत्री' सर्वान् संगमयित्री तथाभूतां मां द्रौपदीं च पाहीति सम्बन्धः ।

२. स्रुच्याघारानुवाकः

अग्ने वाजजिद्वाजन्त्वा सरिष्यन्तं वाजजितꣳ सम्मार्ज्मि । नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥ ७ ॥

१. अग्निसम्मार्जनम्, २. देवेभ्योऽञ्जलिकरणम्, ३. पितृभ्योऽञ्जलिकरणम्, ४. जुहूप-भृदादानम् ।

देवयाजिपक्षभाष्यम्

अस्यां सप्तमकण्डिकायां चत्वारो मन्त्राः । 'अग्ने वाजजित्' इत्यादिरग्निसम्मार्जनः ।[१] अस्य याजुषी छन्दः, अग्निर्देवता । 'नमो देवेभ्यः' इति देवेभ्योऽञ्जलिकरणः ।[२] अस्य दैवी पङ्क्तिश्छन्दः,देवा देवताः । 'स्वधा पितृभ्यः'इति पितृभ्योऽञ्जलिकरणः ।[३] अस्य दैवीपङ्क्तिश्छन्दः, पितरो देवताः । 'सुयमे' इत्यादिमन्त्रादारभ्याष्टम्यां कण्डिकायाम् 'अस्कन्नमद्य देवेभ्य आज्यं संभ्रियासम्' इत्येतावत्पर्यन्तं चतुर्थो जुहूपभृदादानार्थः ।[४] अस्यार्षी उष्णिक् छन्दः, जुहूपभृतौ देवते । परमेष्ठी प्राजापत्य ऋषिः समानः (श० ब्रा० १. ४. ४. १५, ५. १; का० श्रौ० ३. १. १३-१६) ।

अग्नीत्संज्ञक ऋत्विक् इध्मसंनहनार्थैस्तृणैरनुपरिधि परिधिसन्निकृष्टेषु त्रिष्वग्निप्रदेशेषु प्रदक्षिणं क्रमश एकैकस्मिन् प्रदेश आहवनीयमग्निं सम्मार्ष्टि—'अग्ने' इति । 'अग्ने' हे अग्ने ! त्वं 'वाजजित्' वाजमन्नं जयतीति वाजजिद् अन्नस्य जेता असि । 'जि अभिभवे' (भ्वा० प० ६४६) कर्तरि क्विप् प्रत्ययः । 'त्वा' त्वाम् अहं 'संमार्ज्मि' शोधयामि । 'मृजूष् शुद्धौ' (अ० प०

---

१. इध्मसंनहनैरनुपरिधि संमार्ष्टि 'अग्ने वाजजित्' इति त्रिस्त्रिः परिक्रामम् । (का० श्रौ० सू० ३. १. १३)

२-३. अपरमाहवनीयादञ्जलिं करोति 'नमो देवेभ्यः' 'स्वधा पितृभ्यः' इति दक्षिणत उत्तानम् । (का० श्रौ० सू० ३. १. १५)

४. अप उपस्पृश्य 'सुयमे मे' इति जुहूपभृतावादायोत्तरां जुहूं कृत्वा दक्षिणातिक्रामत्यंघ्रिणा विष्णो इति । (का० श्रौ० सू० ३. १. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०६६) किंभूतं त्वां संमार्ज्मि ? 'वाजम्' अन्नमभिलक्ष्य 'सरिष्यन्तं' गमिष्यन्तम्, अन्नलाभायोत्साहवन्तमित्यर्थः । पुनः कीदृशम् ? 'वाजजितम्' अन्नजयोपेतम् । ततोऽध्वर्युर्जुहूपभृतोः पुरस्ताद् आहवनीयस्य च पश्चाद् देवेभ्योऽञ्जलिं करोति—'देवेभ्यः' प्रवर्तमानदर्शपूर्णमासयागानुग्राहकेभ्यो देवेभ्यः 'नमः' प्रणताञ्जलेर्मम निर्विघ्नयज्ञसिद्धयर्थं नमस्काराः सन्तु । ततो दक्षिणत उत्तानेनाञ्जलिना पितॄन् उपास्ते—'पितृभ्यः' पालकेभ्यः पितृभ्यः 'स्वधा' पितॄन् उद्दिश्य द्रव्यत्यागेऽर्थे स्वधाशब्दो निपातः । अनेन मन्त्रद्वयेन देवान् पितॄंश्चोपचर्य जुहूमादाय उपभृत उपरि निधाय सहैव जुहूपभृतौ स्रुचावादत्ते—हे जुहूपभृतौ ! 'मे' मदीये यज्ञकर्मणि युवां 'सुयमे' सुनियते 'भूयास्तम्' भवतम् । तथा युवां नियते स्यातं यथा युवयोर्घृतमाज्यं न स्कन्देदित्याशयः । 'अद्य' अस्मिन् यागदिवसे 'देवेभ्यः' देवानामर्थायोत्स्रष्टुम् 'अस्कन्नम्' भूमौ यथा न स्कन्दति तथा 'आज्यं' घृतं 'संभ्रियासम्' सम्यग् धारयामि । 'डुभृञ् धारणपोषणयोः' (जु० प० १०८७), आशीर्लिङि उत्तमपुरुषैकवचने रूपम् । सम्पन्नयज्ञो यथा भूयासमिति भाव इति ।

आत्मयाजिपक्षभाष्यम्

'वाजजित्' वाजं प्राणं जयतीति वाजजित् 'अन्नं हि प्राणः' (श० ब्रा० २. २. १. ६) । 'अग्ने' हे आत्माग्ने ! 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. २०) । 'वाजं' प्राणमुद्दिश्य 'सरिष्यन्तं' गमिष्यन्तं प्राणजये प्रवृत्तं 'वाजजितम्' प्राणायामकारकं 'त्वा' त्वां 'संमार्ज्मि' शोधयामि । 'देवेभ्यः' परानरनारायणेभ्यो महावाक्येभ्यो वा 'वागेव देवाः' (श० ब्रा० १४. ४. ३. १३), 'नमः' । 'पितृभ्यः' मनोवृत्तिभ्यः 'मनः पितरः' (श० ब्रा० १४. ४. ३. १३) 'स्वधा' सर्वा इन्द्रियशक्तयस्तासामन्नं भवन्तु । हे हृदयमनसी ! युवां 'मे' मदर्थं 'सुयमे' सुष्ठु नियते 'भूयास्तम्' अस्मिन्ननुष्ठानदिने, यथा युवयोः स्थितमाज्यमस्कन्नं भवेदित्यर्थ इति ।

सात्वतपक्षभाष्यम्

अभिमन्योरर्जुनसुतस्य माता सुभद्रा तद्भार्या उत्तरा च व्याहरति । 'अग्ने' वीराग्रणीर्ममात्मज ! मम स्वामिन् वा । त्वं 'वाजजित्' वाजो बलम्, वाजशब्दस्य बलनामसु पाठात् (निघ० २. ९. २) तेन तद्वतो वा शत्रून् जयत्यभिभवतीति तथाभूतोऽसीति शेषः । अतः 'वाजं' युद्धं कर्तुमित्यर्थः, वाजशब्दस्य संग्रामनामसु पाठात् (निघ० २. १७. ४२) । 'सरिष्यन्तं' गमिष्यन्तं 'वाजजितं' मदाशिषा मदीयशुभकामनया वा युधि विजेष्यमाणम्, जयतेर्भविष्यति कर्तरि क्विप्, 'त्वा' त्वां 'संमार्ज्मि' वेदमन्त्राभिमन्त्रितसलिलादिना संशोधयामि, अभिषिञ्चामि । अपि च त्वद्विजयार्थं 'देवेभ्यः' इन्द्रादिभ्यः 'नमः' आवयोर्नमस्कारो नतिरस्तु । अपि वा नमः अन्नं हविर्लक्षणं प्रयच्छाव, अन्ननामसु नमःशब्दस्य पाठात् (निघ० २. ७. २२) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किञ्च 'पितृभ्यः' अग्निष्वात्तादिभ्यः 'स्वधा' श्राद्धादौ तृप्तिकारि कव्याख्यं पितृतर्पकदेयद्रव्य-दानमस्तु। त्वद्विजयनिमित्तं देवयज्ञः पितृयज्ञश्च क्रियत इति भावः। अभिमन्युर्ब्रूते—मम जननी पत्नी च युवां 'सुयमे' सुनियते स्थिरचेतस्के मदनिष्ठाशङ्कारहिते धृतिसमन्विते सुव्यवस्थिते 'भूयास्तम्' भवतम्।

वाजशब्दम् अन्न-बल-संग्रामवाचितया इत्थं व्याख्यातवान् देवराजः—वाजः। 'वज गतौ' (भ्वा० प० २५२) 'अकर्तरि च कारके संज्ञायाम्' (पा० ३. ३. १९) इति घञ्। 'अजि-व्रज्योश्च' (पा० ७. ३. ६०) इति चकारस्यानुक्तसमुच्चयार्थत्वात् कुत्वाभावः। तथा च तत्र न्यासकारः—चकारस्यानुक्तसमुच्चयार्थत्वाद् वजेरपि कुत्वप्रतिषेधः सिद्धो भवति वाजः इति। गच्छत्यनेनादत्तेन सुखानि, भुक्तेन तृप्तिं वा, गच्छत्यनेन शुद्धेन सत्त्वशुद्धिं भोक्ता। यदाहुः 'आहारशुद्धौ सत्त्वशुद्धिः' इति। यद्वा गत्यर्था बुद्ध्यर्थाः, जानात्यनेन भुक्तेन धर्मम्। सर्वत्रान्न-नामसु गत्यर्थाद् व्युत्पादितेष्वेवमर्थो बोद्धव्यः। (निघ० २. ७. २); गच्छन्त्यनेन शत्रून् प्रति जिगीषवः इति वाजः बलम् (निघ० २. ९. २)। गम्यतेऽधिगम्यते व्यायामादिना यत्नेन। इमावर्थावुत्तरत्रापि गत्यर्थेषु बोद्धव्यौ। वाजो बलं, वाजयतेः प्रेरणार्थाद् इति माधवः। अनेन शत्रून् प्रेरयति विद्रावयति इति। वाज इति शब्दः संग्रामनामस्वपि दृश्यते (निघ० २. १७. ४२)।

नमःशब्दमपीत्थं व्याख्यातवान् देवराजः—नमः। 'णमु प्रह्वत्वे' (भ्वा० प० ९८१) ततः असुक्। उपनतं जातमात्रेभ्यो भूतेभ्यः पूर्वजन्मकृतकर्मवशात्, नम्यते देवतात्वात्, नमन्त्यनेन हेतुना तद्वन्तः, प्रयोजनस्य च हेतुत्वेन विवक्षेति। यद्वा भगवतो माता यशोदा तातो नन्दश्च ब्रूतः—अग्ने वाजजिदिति। भगवान् ब्रूते—पितरौ! युवां 'सुयमे' अक्षुब्धचित्तौ, लिङ्गव्यत्ययश्छान्दसः। 'भूयास्तं' स्वप्नेऽपि मदनिष्टशङ्का न विधेयेति भावः।

अस्कन्नमद्य देवेभ्य आज्यँ संभ्रियासमङ्घ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने ते च्छायामुपस्थेषं विष्णो स्थानमसीत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात् ॥ ८ ॥

१. वेद्यारोहणम्, २. वेद्यामीशानाभिमुखावस्थानम्, ३. आज्येनोत्तराघाराहुतिः।

देवयाजिपक्षभाष्यम्

अस्यामष्टम्यां कण्डिकायां त्रयो मन्त्राः। 'अङ्घ्रिणा' इत्यादिर्वेद्यामारोहणार्थं विनियुक्तः।[1] अस्य याजुषी त्रिष्टुप् छन्दः, विष्णुर्देवता। 'वसुमतीम्' इत्यादिरीशानाभि-

१. दक्षिणातिक्रामति 'अङ्घ्रिणा विष्णो'—इति। (का० श्रौ० सू० ३. १. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुखावस्थानः।[1] अस्य याजुषी छन्दः, अग्निर्देवता। 'इत इन्द्रः' इत्यादिस्तृतीयो मन्त्र आज्येनोत्तराघारहवने विनियुक्तः।[2] अस्य याजुषी गायत्री छन्दः, इन्द्रो देवता। समेषां परमेष्ठी प्राजापत्य ऋषिः (श० ब्रा० १. ४. ५. २-३; का० श्रौ० ३. १. १६, १९; ३. २. १)।

'अस्कन्नमद्य देवेभ्य आज्यं संभ्रियासम्' इति सप्तम्यां कण्डिकायां व्याख्यातम्। अथाध्वर्युर्दक्षिणस्यां दिशि यजतिस्थानं गच्छति। 'सव्येनेतो दक्षिणेनामुतः' इति (का० श्रौ० ३. १. १८)। इतो जुहोतिस्थानाद् यजतिदेशं गच्छन्नध्वर्युः सव्येन पादेन गच्छेद्। अमुतो यजतिदेशात् प्रत्यागच्छन् दक्षिणेन पादेनागच्छेदिति तदर्थः। उत्तरतो जुहोतिस्थानं, दक्षिणतो यजतिस्थानं भवति। तत्र मन्त्रं पठति—अङ्घ्रिणेति। 'अङ्घ्रिणा' पादप्रक्रमेण, 'अघि गतौ' (भ्वा० आ० १०९)। अङ्घते गच्छत्यनेनेति करणे 'वङ्क्र्यादयश्च' (उ० सू० ४. ६६) औणादिकः क्रिन् प्रत्ययः। 'विष्णो' हे यज्ञपुरुष! 'त्वा' त्वां 'मा अवक्रमिषम्' अवाचीनं न क्रमेयम्। त्वां पादाक्रान्तं न कुर्याम्। तत ईशानकोणाभिमुखोऽध्वर्युरुपविशन् पठति—वसुमतीमिति। 'अग्ने' हे अग्ने! 'वसुमतीं' धनधान्यसम्पन्नां 'ते' तव 'छायां' शरणम् 'उपस्थेषम्' उपतिष्ठेयम्, प्रपद्येयेति भावः। उपस्थासीयासमिति प्राप्ते छान्दसं रूपम्, उपोपसृष्टः स्थाधातुः सेवार्थः, सकलसुखसमृद्धिसम्पन्नं तव शरणं प्रपद्ये। यतस्त्वं 'विष्णोः' यज्ञस्य 'स्थानम्' असि। तव सन्निधावेव स्थित्वा यज्ञः शक्यते कर्तुं नान्यथेति भावः। ततः स्थित्वोत्तराघाराहुतिं जुह्वत् पठति—'इतः' अस्मादेव यज्ञस्थानाद् उत्थायेति शेषः। इन्द्रः देवाधिपतिः 'वीर्यं' वीरस्य कर्म। 'वीर विक्रान्तौ' (चु० उ० १९०४), वीरयतीति वीरः, पचादित्वात् (पा० ३. १. १३४) कर्तर्यच् प्रत्ययः। तस्य कर्म इत्यर्थे यत्प्रत्ययश्छान्दसः। प्रत्यये तित्त्वं (तकारेत्संज्ञा) 'तित्स्वरितम्' (पा० ६. १. १८५) इति स्वरितत्वसिद्ध्यर्थम्। 'अकृणोत्' 'कृवि हिंसाकरणयोश्च' (भ्वा० प० ५९८)। देवयजनस्थानादेव लब्धसामर्थ्य इन्द्रोऽसुरविनाशादिकं शौर्यं कृतवानिति भावः। अथवा इन्द्रः 'वीर्यं' शत्रुबलम् 'अकृणोत्' हिंसितवान्, 'अतो हीन्द्रस्तिष्ठन् दक्षिणतो नाष्ट्रा रक्षांस्यपाहन्' (श० ब्रा० १. ४. ५. ३)। इन्द्रसामर्थ्येनैव 'अध्वरः' देवयजनप्रदेशः 'ऊर्ध्वः' प्रगुणितः, निर्भय इत्याशयः। 'आस्थात्' स्थितः, 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० ९२८), तस्य लुङि रूपमिति।

आत्मयाजिपक्षभाष्यम्

हे हृदयमनसी! तथा सति 'अद्य' अस्मिन् ब्रह्मयज्ञे 'देवेभ्यः' परानरनारायणेभ्यः 'आज्यं' युवयोः स्थितमिन्द्रियशक्तिसमूहम् 'अस्कन्नम्' यथा मोक्षावस्था न स्कन्दति तथा

१. 'वसुमतीमित्यवस्थाय'। (का० श्रौ० सू० ३. १. १९)
२. 'इत इन्द्र इति जुहोत्युत्तराघारम्'। (का० श्रौ० सू० ३. २. १)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'संभ्रियासम्' सम्यक् पोषणं धारणं वा करोमि। 'विष्णो' हे परमात्मन् ! अहम् 'अङ्घ्रिणा' देहवृक्षस्य मूलेन कामेन 'त्वा' त्वां 'मा अवक्रमिषम्' अवक्रमणं मा कार्षम्। कामेनातिक्रमदोषो मे मा भूत्। 'अग्ने' हे ब्रह्माग्ने ! 'ते' तव 'वसुमतीं' योगलक्ष्मीवतीं 'छायाम्' आश्रयभूतां ज्ञानयज्ञक्रियाम् 'उपस्थेषम्' सेवेय। हे हार्दभूमे ! मे त्वं 'विष्णोः' सर्वव्यापिब्रह्मणः 'स्थानम्' 'असि'। 'इन्द्रः' यजमानः 'इतः' अस्माद् देवयजनस्थानाद् 'वीर्यं' वीरस्य कर्म कामशत्रुवध-रूपम् 'अकृणोत्' अकरोत्। अत एव 'अध्वरः' ज्ञानयज्ञः 'ऊर्ध्वः' उन्नतः 'आस्थात्' स्थित इति।

सात्वतपक्षभाष्यम्

विश्वरूपं दृष्ट्वा भीत्या वेपमानः पार्थ उवाच—अस्कन्नमिति। 'विष्णो' हे कृष्ण ! 'अद्य' सम्प्रति 'देवेभ्यः' आदरार्थं बहुवचनम्। देवाधिदेवाय भवते 'अस्कन्नम्' अशुष्कम् अकठोरम्, 'स्कदिर् गतिशोषणयोः' (भ्वा० प० ९७९), अतिकोमलम् 'आज्यं' घृतं तद्वत् स्निग्धं वचः 'संभ्रियासम्' सम्यक् धार्यासम्, ब्रूयामित्यर्थः। अद्यावधि महिमानमजानता मया भवानव-ज्ञातः। अत ऊर्ध्वं त्वां श्रद्धया विविधैः स्तोत्रैः स्तूयासम्, भवत्प्रशंसानिरतो भूयासम्। कदापि 'अङ्घ्रिणा' पादेन, अङ्घ्रिशब्देनात्र तत्साध्यत्वाज्जहल्लक्षणया गतिरुच्यते, तया गत्या व्यवहारेण मित्रं मत्वा पादस्पर्शादिना वा 'त्वा' त्वां 'मा' न 'अवक्रमिषम्' अवक्रान्तम्, अवज्ञातं कुर्वीय। किञ्च 'ते' तव 'वसुमतीं' निवासदात्रीं 'छायाम्' आश्रितिं निवासदातारमाश्रयमिति यावत्। 'उपस्थेषम्' उपतिष्ठेयं, त्वां प्रपन्नो भूयासम्। न केवलमेतावदेव किन्तर्हि विष्णोस्तव 'स्थानं' स्थितिः 'असि' भूयात् मम हृदि। लकारपुरुषव्यत्ययश्छान्दसः। मम मानसे भवान् सदा तिष्ठेदिति भावः। 'इतः' अस्मात् भवल्लक्षणाश्रयात् 'इन्द्रः' शक्रः 'वीर्यं' वृत्रवधादिरूपं पराक्रमम् 'अकृणोत्' कृतवान्, 'सखे विष्णो वितरं विक्रमस्व' (ऋ० ८. १००. १२) इति मन्त्रवर्णात्। अपि च भवदाश्रयादेव अस्मदार्यो युधिष्ठिरः 'अध्वरे' राजसूययज्ञे 'ऊर्ध्वः' उत्कृष्टः 'आस्थात्' स्थितवान्, अभूत्। निर्विघ्नं तव यज्ञमनुष्ठाय यशो लेभे इति भावः।

अग्ने वेर्होत्रं वेर्दूत्यमवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृद् देवेभ्य इन्द्र आज्येन हविषा भूत् स्वाहा सं ज्योतिषा ज्योतिः ॥ ९ ॥

जौहवस्याज्यस्य ध्रौवाज्येन मिश्रणम्।

देवयाजिपक्षभाष्यम्

अस्यां नवम्यां कण्डिकायां ध्रुवासमञ्जनाख्यां क्रियामभिलक्ष्य मन्त्रोऽप्येक एव। तस्मात् 'सं ज्योतिषा ज्योतिः' इति मन्त्रो ध्रुवासमञ्जनः। तस्य परमेष्ठी प्राजापत्य ऋषिः, याजुषी गायत्री छन्दः, आज्यं देवता (श० ब्रा० १. ४. ५. ४-७; का० श्रौ० ३. २. २)। 'अग्ने वे-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

होत्रम्' इति मन्त्र आज्येनोत्तराघाराहुतौ विनियुक्तः। तस्य नेह पृथङ्मन्त्रत्वेन व्यपदेशः। अष्टम्यां कण्डिकायाम् 'इत इन्द्रो वीर्यम्' इत्यारभ्येह नवम्यां कण्डिकायां 'सं ज्योतिषा' इति मन्त्रात् प्राग् 'अग्ने वेर्होत्रम्' इत्यादिर्मन्त्रांश आज्येनोत्तराघाराहुतौ पठितव्य इति विवेकः।

'अग्ने' त्वं 'होत्रं' होतुः कर्म, 'हायनान्तयुवादिभ्योऽण्' (पा० ५. १. १३०) इत्यनेन अण् प्रत्ययः, वृद्धयभावश्छान्दसः। 'वेः' अवगच्छ। 'विद ज्ञाने' (अ० प० १०६४) 'छन्दसि लुङ्लङ्लिटः' (पा० ३. ४. ६) इत्यनेन लोडर्थे लङि मध्यमपुरुषैकवचने सिपि 'दश्च' (पा० ८. २. ७५) इति धात्वंशदकारस्य रुत्वम्, अडागमाभावश्छान्दसः। 'दूत्यम्' दूतस्य कर्म। 'दूतस्य भागकर्मणी' (पा० ४. ४. १२०) इति सूत्रेण यत्प्रत्ययः। 'यतोऽनावः' (पा० ६. १. २१३) इति छान्दसत्वान्न प्रवर्तते। तस्मात् 'तित्स्वरितम्' (पा० ६. १. १८५) इति स्वरितत्वम्। 'वेः' बुध्यस्व। 'उभयं वा एतदग्निर्देवानां होता च दूतश्च' (श० ब्रा० १. ४. ५. ४)। देवानां कृते यद् होतृत्वं दूतत्वं च त्वं प्रतिज्ञातवानसि, तस्योभयस्य स्मरेत्याशयः। 'त्वा' त्वामग्निं विधेयं स्वीयमनुतिष्ठन्तं 'द्यावापृथिवी' उभे रोदसी 'अवताम्' रक्षताम्। त्वमपि सर्वथा सुरक्षितः 'द्यावापृथिवी अव' द्यावापृथिव्यौ पालय, 'परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' (गीता ३. ११) इति भगवद्वचनात्। एवमन्योन्यरक्षणेन लब्धसामर्थ्यः 'इन्द्रः' 'देवेभ्यः' सर्वेभ्यो देवेभ्यः प्रथमम् 'आज्येन हविषा' अस्माभिरर्पितयाऽऽज्याहुत्या 'स्विष्टकृत्' साधु इष्टं स्विष्टम्, तत् करोति स्वीकरोतीति स्विष्टकृद् यष्टृभिः श्रद्धयोपनतं सर्वदेवेभ्यः प्राङ् मह्यं दत्तं हविर्मयाङ्गीकृतमिति प्रसन्नो 'भूत्' भवतु, लोडर्थे लुङि अडागमाभावश्छान्दसः। यद्वा 'देवेभ्यः' देवानामर्थाय 'इन्द्रः' देवप्रमुख इन्द्रः मदर्पितेनाऽऽज्यहविषा 'स्विष्टकृत्' देवेभ्यो दत्तं हविः स्विष्टं श्रद्धया दत्तं नाऽश्रद्धयेति मह्यं सुष्ठुयज्ञफलस्य कर्त्ता 'भूत्' भूयात्। इन्द्रस्य यज्ञदेवतात्वाद् 'इन्द्र आज्येन' इत्युक्तम्। तदुक्तं शतपथब्राह्मणे 'इन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्र आज्येनेति' (१.४.५.४) अथवा वाचे वा एतमाघारमाघारयति,वाक् चेन्द्रस्तस्मादाह 'इन्द्र आज्येन' इति। यथोक्तं शतपथश्रुतौ 'वाचे वा एतमाघारमाघारयति, इन्द्रो वाक् इत्यु वा आहुस्तस्माद्वेवाऽऽहेन्द्र आज्येनेति' (१. ४. ५. ४)। 'स्वाहा' सुहुतमस्तु, इन्द्रार्थमिदं दत्तमाज्यं तं प्रीणयतु। देवोद्देश्यके दाने स्वाहाशब्दो निपात इति प्रागुक्तम्।

एवमाज्याघारं कृत्वाऽध्वर्युर्जुहूपभृतोर्द्वयोः स्रुचोः परस्परं स्पर्शं न कारयन् यजतिस्थानाद् वेदेः पश्चादागत्य ध्रुवास्थमाज्यं जुहूस्थितेनाज्येन समञ्ज्यात्। जौहवमाज्यं ध्रौव आज्ये पातयेदित्याशयः। तदर्थं मन्त्रं पठति—संज्योतिषेति। 'ज्योतिषा' ज्योतिःसम्पादकेन ध्रुवाज्येन सह 'ज्योतिः' जौहवं ज्योतिःस्वरूपमाज्यं 'सम्' सम्पृङ्क्तामिति।

द्वितीये स्रुच्याघारानुवाके तिसृषु कण्डिकासु यथाऽर्थमष्टौ मन्त्राः (सप्तम्यां चत्वारः, अष्टम्यां त्रयः, नवम्यामेकः) व्याख्याताः। तेषु प्रतिपादिताः क्रिया इमाः— १. अग्निसम्मा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

र्जनम्, २. देवेभ्योऽञ्जलिकरणम्, ३. पितृभ्योऽञ्जलिकरणम्, ४. जुहूपभृतोरादानम्, ५. वेद्यामारोहणम्, ६. वेद्यामीशानाभिमुखमवस्थानम्, ७. आज्येनोत्तराघाराहुतिः, ८. ध्रुवाज्यसमञ्जनम्। द्वयोरनुवाकयोर्नवकण्डिकासु समुदिता मन्त्रसंख्या द्वात्रिंशत् (३२) इति ।

आत्मयाजिपक्षभाष्यम्

प्राणाः कथयन्ति—'अग्ने' हे आत्माग्ने ! 'होत्रं' होतुः कर्म 'वेः' विद्धि 'दूत्यं' दूतकर्म 'वेः' विद्धि । होतृत्वं च दूतत्वं चोभयमग्नेः कर्म । ईदृशं 'त्वा' त्वां 'द्यावापृथिवी' हृदयमनसी 'अवताम्' स्वात्मरूपेण पालयताम् । यस्मात् 'तस्य मन एव प्रतिष्ठा' (श० ब्रा० ६. ७. १. २१) । हे आत्माग्ने ! 'त्वम्' अपि 'द्यावापृथिवी' हृदयमनसी 'अव' पालय । 'इन्द्रः' 'इन्द्रो वाक्' (श० ब्रा० १. ४. ५. ४) 'आज्येन' इन्द्रियशक्तिरूपेण 'हविषा', 'देवेभ्यः' परानरनारायणेभ्यः 'स्विष्टकृत्' सुष्ठु इष्टकारकः 'भूत्' अडभावश्छान्दसः । 'स्वाहा' सुहुतमस्तु, स्वाहेति निपातो देवतामुद्दिश्य दाने वर्तते । 'ज्योतिः' इन्द्रियज्योतिः 'ज्योतिषा' आत्मज्योतिषा 'सम्' संगच्छतामित्यध्याहारः ।

सात्वतपक्षभाष्यम्

पाण्डवानां कुन्त्याश्च सन्धिप्रस्तावमादाय कौरवसभां जिगमिषुं कृष्णं प्रत्युक्तिः—अग्ने वेरिति । 'अग्ने' ! दुर्जनदावदहन ! अविद्यातमोनाशक प्रकाशदातः ! चतुराग्रणीर्वा कृष्ण ! 'होत्रं' दानमादानञ्च, सन्धौ किं दातव्यं परस्मै, किञ्चाऽऽदातव्यं ततः इति च, 'वेः' वेत्सि जानासि । वेरिति वेत्तेर्लडर्थे लङ्, अडभावश्च छान्दसः । अलं बहुना, 'दूत्यं' परसभायां दूतस्य कर्तव्यं भाषणादिकं सर्वं 'वेः' जानासि । परसभायां गत्वा दूतेन कथं व्यवहर्तव्यम् ? किं देयम् ? किञ्चादेयमित्यादि सर्वं त्वं कुशाग्रप्रज्ञः प्रतिपद्यसे । नास्ति विशेषकथनापेक्षेति भावः । कुन्ती स्नेहवशादाशास्ते—वत्स कृष्ण ! मध्येमार्गं 'द्यावापृथिवी' 'त्वा' त्वाम् 'अवताम्' दिवि पृथिव्याञ्च वर्तमानाः सर्वे प्राणिनोऽन्ये च पदार्थास्त्वां रक्षन्तु, त्वदानुकूल्यं भजन्ताम् । 'त्वम्' अपि 'द्यावापृथिवी' तत्रत्यान् सर्वान् 'अव' रक्ष, तदनुकूलतां व्रज । पन्थानस्ते शिवाः सन्तु, मा भूत् कश्चिद् विघ्नस्ते यात्रायामिति भावः । इदञ्चावश्यं वाच्यं सन्धिसमये 'वने वसता तपस्यता धनञ्जयेन देवान् प्रसाद्य दिव्यं विविधास्त्रजातं लब्धं, भूयांसश्च द्रुपदप्रमुखा राजानः पाण्डवानां समर्थकास्तेषां कृते प्राणपणेन योत्स्यन्ते । अतः सन्धानमेव श्रेयः । इतरथा भवतां कौरवाणां शिरसि महान् विपत्पर्वतोपनिपातः' इति । तदेव स्पष्टयति देवेभ्य इति । 'देवेभ्यः' इन्द्रादिभ्यः, तान् प्रसादयितुं 'स्विष्टं' 'सु' शोभनम्, 'इष्टम्' ईप्सितं तपश्चरणादिकं करोतीति तथाभूतः 'इन्द्रः' अर्जुनः 'अभूत्' जातः । पूर्वमेव लोकोत्तरः शूरचक्रचूडामणिर्महाबलोऽर्जुन आसीत्, सम्प्रति देवप्रसादहेतुतपश्चरणादिनाऽत्यधिका शक्तिस्तेन सञ्चितेति भावः । 'आज्यम्'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचारः, आङ्पूर्वो गत्यर्थकः 'अजिः' आचरतिसमानार्थकः। स्वयमुपनतत्रिभुवनललामभूतोर्वशीप्रत्याख्यानादिसदाचारादिना 'हविषा' प्राणिमात्रप्रीतिकरेण, जुहोतिरत्र प्रीणनार्थः। जुहोति प्रीणयति सर्वान् येन तद्धविः सकललोकप्रीतिहेतुः सदाचरणं तेन, 'स्वाहा' 'सु' साधुवादम् आजिहीते प्राप्नोतीति स्वाहा लब्धसकलजनपरःशतसाधुवादः। सुपूर्वाद् 'ओहाङ् गतौ' (जु० आ० १०८६) इत्यस्माद् बाहुलकात् करणे विच्। अतः अतिलोकप्रियः 'ज्योतिः' तेजःपुञ्जमूर्तिः, 'ज्योतिषा' स्वानुरक्ततेजःपुञ्जराजन्यसमूहेन 'सम्' समगच्छत्। स्वतस्तेजस्वी, स्वसदाचारादुत्कृष्टतेजस्वी, राजन्यगणसहायश्च सन् सर्वथा दुर्जेय इति भावः।

३. ब्रह्मार्षमन्त्रकानुवाकः

मयीदमिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम्। अस्माकं सन्त्वाशिषः सत्या नः सन्त्वाशिष उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात् स्वाहा ॥ १० ॥

१. आशीःप्रार्थना, २. अग्नीधो भागप्राशनम्।

देवयाजिपक्षभाष्यम्

अस्यां दशम्यां कण्डिकायां द्वौ मन्त्रौ। 'मयीदम्' इत्यादिराशीःप्रार्थनः। अस्य याजुषी छन्दः, आशीर्देवता। 'उपहूता पृथिवी' इत्यस्य भागप्राशने विनियोगः। अस्य याजुषी गायत्री छन्दः, पृथिवी देवता। परमेष्ठी प्राजापत्यो द्वयोः ऋषिः (श० ब्रा० १. ८. १. ४१-४२ ; का० श्रौ० ३. ४. १७-१९)।

समाप्ते प्रधानयागे पुरोडाशशेषप्राशनात् पूर्वं यजमानो होत्रा ऋत्विजाऽऽशीःप्रार्थनायां क्रियमाणायां जपति मयीदमिन्द्र इति।[1] 'इन्द्रः' सर्वशक्तिमान् परमेश्वरः 'मयि' यजमाने 'इदं' होत्रा प्रार्थ्यमानम् 'इन्द्रियम्' सामर्थ्यं 'दधातु' स्थापयतु। 'अस्मान्' मादृशान् सर्वान् यज्ञस्यानुष्ठातॄन्, 'रायः' दैवमानुषभेदेन द्विविधानि धनानि 'मघवानः' मघवन्तश्च। मघं धनम् अस्त्येषां ते मघवानः 'छन्दसीवनिपौ च वक्तव्यौ' (वा० ५. २. १२२) इत्यनेन मत्वर्थे वनिप् प्रत्ययः 'सचन्ताम्' सेवन्ताम्। 'षच सेवने' (भ्वा० आ० १६३)। यज्ञानुष्ठानप्रवृत्तानामस्माकं धनदारिद्र्यं कदाचिदपि न भूयादित्यर्थः। 'अस्माकं' यजमानानाम् 'आशिषः' यज्ञादिश्रेष्ठ-

१. आशासाने 'मयीद'मिति यजमानो जपति। (का० श्रौ० सू० ३. ४. १८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्माचरणाभिलाषाः 'सन्तु' निर्व्याजं प्रवर्तन्ताम्। 'नः' अस्माकं च 'आशिषः' उक्ता मनोरथाः 'सत्याः' अवितथाः 'सन्तु' भवन्तु। सत्यकामा वयं भूयास्मेति।

यदा होता 'उपहूते द्यावापृथिवी' इति द्यावापृथिव्योरुपह्वानानन्तरं पुरोडाशयोरेकैकमंशं [1]षडवत्तपात्रे कृत्वाऽग्नीधे ददाति तदाऽग्नीत् षडवत्तं प्रथमं पुरोडाशभागम् उपहूतेति मन्त्रेण प्राश्नाति—उपहूता पृथिवीति।[2] 'उपहूता' अभ्यनुज्ञाता 'पृथिवी' इयं दृश्यमाना धरित्री 'माता' जगतां निर्मात्री, 'पृथिवी माता' मातृत्वेन भाविता सा पृथिवी 'माम्' अग्नीधम्। 'उपह्वयताम्' पुरोडाशशेषभक्षणार्थमनुजानातु। 'अग्निः' अग्निस्वरूपोऽहमिति मम प्राशनेऽधिकारः। कस्मात् कारणात् 'आग्नीध्रात्' अग्नीधः कर्म आग्नीध्रं तस्मादहमग्निरित्यर्थः। अथवा आग्नीध्रशब्दः 'अग्नीधः शरणे रण् भं च' (वा० ४. ३. १२०) इत्युपचाराद् अग्नीधः कर्मण्यपि प्रवर्तताम् 'आग्नीध्रसाधारणाद् अञ्' (वा० ५. ४. २५) इति स्वार्थे अञ् प्रत्ययः। 'ञ्नित्यादिर्नित्यम्' (पा० ६. १. ६. ७) इत्यनेन ञित्त्वादाद्युदात्तत्वम्, अग्निसंदीपनकर्मनैरन्तर्यादग्निरूपोऽस्मि संवृत्तः। 'स्वाहा' अयं पुरोडाशशेषः स्वाहुतोऽस्तु इति।

आत्मयाजिपक्षभाष्यम्

यजमानो जपति 'इन्द्रः' परमेश्वरः 'इदम् इन्द्रियं' योगबलं 'मयि' यजमाने 'दधातु' स्थापयतु। किं च 'रायः' योगैश्वर्याणि 'मघवानः' शमादिधनवन्तोऽस्माकं शिष्याः 'सचन्तां' सेवन्ताम्। किं च 'अस्माकं' कथिता इति शेषः। शिष्याभिप्रायेण बहुवचनम् 'आशिषः' 'सन्तु' भवन्तु। किं च 'नः' अस्माकम्। 'आशिषः सत्याः सन्तु' गुरुकथिता इति शेषः। भूमेर्धारणां कथयति—'माता' जगतो निर्मात्री 'पृथिवी' मया 'उपहूता' 'माता पृथिवी मामुपह्वयताम्'। यदा द्वयोः परस्पराह्वानं तदैकत्वम्, यदैकत्वं तदा उपाध्योर्लयः, तस्मादहम् 'आग्नीध्रात्' ब्रह्मवह्न्याधानकारकयजमानरूपात् 'स्वाहा' महावाक्यप्रभावेण 'अग्निः' ब्रह्माग्निरेवेति।

सात्वतपक्षभाष्यम्

भक्तवशंवदं विदेहजनपदमायातं कृष्णं मिथिलाधिपो बहुलाश्वो विदेहः श्रुतदेवो भूदेवश्च प्रार्थयते 'मयि' इति। 'इन्द्रः' सर्वेश्वरः भवान् 'मयि' विदेहे श्रुतदेवे वा 'इदं' जगतीतले वर्तमानम् 'इन्द्रियं' इन्द्र आत्मा तदीयम्, आत्मबलमिति यावत्। अथवा इन्द्रेण भगवता सृष्टं वस्तुजातम्, इन्द्रप्रेमास्पदम्, इन्द्रदत्तं दातुमिष्टं वा सर्वमिन्द्रियपदवाच्यं यत्तद् 'दधातु'। स्थापयतु, व्यष्ट्यभिप्रायेणैकवचनम्। अलं बहुना, इन्द्रेण त्वया परमात्मना सृष्टं तव प्रियं त्वया च

---

१. अत्र षडवत्तशब्दो रूढ्याऽग्नीद्भागवाचको न तु योगेनावदानषट्कबोधकः।

२. प्राश्नाति 'उपहूता पृथिवी' इति। (का० श्रौ० सू० ३. ४. १७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्तेभ्यो दत्तं दातुमीप्सितं त्वदवगतिसाधनञ्च सर्वं मदायत्तं भूयादिति भावः। 'मघवानः' हे पूजावन्तः सत्करणीया भवद्विधा महानुभावाः। 'अस्मान्' विदेहजनपदवास्तव्यान्, जनपदाभिप्रायेणास्मानिति प्रयोगः। 'रायः' सुवर्णादिलक्षणलौकिकधनानि, ज्ञानलक्षणानि दिव्यानि धनानि च 'सचन्ताम्' समवयन्तु।

अपि वा इन्द्रियमिति धननाम। धननामसु पाठात् (निघ० २. १०. १४)। तथा च इन्द्रियं मानुषं धनं 'रायः' स्वात्मसाक्षात्कारतत्साधनविवेकादिनिदिध्यासनान्तरूपाणि दिव्यधनानि। द्विविधं धनं वयं प्राप्नुयामेति भावः। किञ्च 'अस्माकम्' 'आशिषः' अस्मदीया अभिलाषाः 'सन्तु' पूर्णा भवन्तु। दृढीकर्तुं पुनर्वचनम्। 'नः'अस्माकम् 'आशिषः' सङ्कल्पाः 'सत्याः' सफलाः 'सन्तु' भवन्तु। 'माता' मातृसदृशी प्रचुरान्नादिपुष्टिहेतुर्भोग्यवस्तुप्रदात्री 'पृथिवी' वसुधा 'उपहूता' सादरं प्रार्थिता। 'पृथिवी माता' सा जननी पृथिव्यपि 'मा' माम् अस्मान्, एकत्वमविवक्षितम्। 'उपह्वयताम्' उपह्वयतु। स्वोत्सङ्गे सन्निवेश्य लालयतु पालयतु चेत्यर्थः। 'आग्नीध्रात्' अग्निं ज्ञानाग्निम् इन्धे दीपयति प्रज्वलयति इति अग्नीद् गुरुः तस्य स्थानाद् गुरुमुखादिति यावत्, तदुपदिष्टमहावाक्यानि श्रुत्वा 'अग्निः' प्रकाशवान् समासादिताऽऽत्मसाक्षात्कारोऽहं 'स्वाहा' 'स्वम्' आत्मत्वेनाध्यस्तं देहादिकमहंतास्पदं, स्वकीयञ्च ममतास्पदं पत्नीपुत्रादिकम् 'आ' समन्तात् 'हा' त्यक्ष्यामि, 'ओहाक् त्यागे' (जु० प० १०९०)। गुरूपदिष्टमहावाक्यजात्मसाक्षात्कारप्रभावात् सविलासाविद्यानिवृत्त्या देहादौ तादात्म्याध्यासः, शरीरादौ पतिपुत्रादौ च संसर्गाध्यासश्च समूलघातमपहृतः, सर्वथा सम्पन्नोऽहंताममताग्रन्थिविमोक्षः, सम्प्रत्यखण्डैकरसं स्वात्मानन्दमनुभवामीति भावः।

इन्द्रियम्। 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' (पा० ५. ३. ९३) इति घच्प्रत्ययान्तमन्तोदात्तं निपात्यते। 'इन्द्रः'—'इदि परमैश्वर्ये' (भ्वा० प० ६३) पारमैश्वर्ययुक्त उच्यते। इन्द्रस्य लिङ्गम्। धनेन हि ऐश्वर्ययुक्त इति व्यज्यते। अत्र षष्ठीसमर्थात् लिङ्गार्थे घच्। यद्वा इन्द्रेण दृष्टम् इन्द्रियम्। यद्वा इन्द्र आत्मा तत्कृतेन शुभाशुभेन कर्मणा सृष्टम्। इन्द्रजुष्टं वा, आत्मना सेवितमित्यर्थः, तद्द्वारेण भोगोत्पत्तेः। इन्द्रदत्तं वा, इन्द्रेण पूर्वकर्मणा वा अस्त्युपदत्तम्। दृष्टसृष्टजुष्टदत्तार्थेषु तृतीयासमर्थाद् घच्प्रत्ययः।

उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥ ११ ॥

१. अग्नीधो द्वितीयभागप्राशनम्, २. ब्रह्मणः प्राशित्रग्रहणम्, ३. ब्रह्मणः प्राशित्रप्राशनम्।

४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

अस्यामेकादश्यां कण्डिकायां त्रयो मन्त्राः। 'उपहूतो द्यौः'[1] इत्यादिः प्रथमो मन्त्रो द्वितीयभागप्राशने विनियुक्तः। अस्य परमेष्ठी प्राजापत्य ऋषिः, साम्नी त्रिष्टुप् छन्दः, द्यौर्देवता। 'देवस्य त्वा' इत्यारभ्य 'प्रतिगृह्णामि' इत्यन्तो द्वितीयो ब्रह्मणः प्राशित्रग्रहणे विनियुक्तः। अस्याङ्गिरसो बृहस्पतिः ऋषिः, प्राजापत्या बृहती छन्दः, प्राशित्रं देवता। 'अग्नेष्ट्वा' इत्यादिस्तृतीयो मन्त्रो ब्रह्मणः प्राशित्रप्राशने विनियुक्तः। अस्याप्याङ्गिरसो बृहस्पतिः ऋषिः, प्राजापत्या गायत्री छन्दः, प्राशित्रं देवता (श० ब्रा० १. ८. १. ४१; १. ७. ४. १३–१५, का० श्रौ० २. २. १४, १६)।

अथ द्वितीयं पुरोडाशशेषं प्राशितुमग्नीद् उपक्रमते—'उपहूतः' अभ्यनुज्ञातः 'द्यौः' द्युलोकः 'पिता' पालकत्वात् पितृस्थानीयः। 'माम्' प्राश्नन्तमग्नीधम्। 'पिता द्यौः' 'उपह्वयताम्' अनुजानातु। 'आग्नीध्रात्' स्वीयाद् अग्नीधः कर्मणः 'अग्निः' अहमग्निरूपोऽस्मि, तस्मात् 'स्वाहा' इदं प्राशितं सुहुतमस्तु।

ततो ब्रह्माऽनामिकाङ्गुष्ठाभ्यां प्राशित्रं हविश्शेषं प्रतिगृह्णाति—देवस्य त्वेति।[2] हे हविश्शेष ! 'त्वा' त्वां 'सवितुः' सर्वजगतः प्रेरकस्य 'देवस्य' भगवतः सूर्यस्य 'प्रसवे' अभ्यनुज्ञाने वर्तमानः 'अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्' प्रथमाध्याये दशम्यां कण्डिकायां व्याख्यातम्। 'प्रतिगृह्णामि' स्वीकरोमि। प्रतिगृह्य हविश्शेषं दन्तैरचर्वयन् प्राश्नाति—अग्नेष्ट्वास्येनेति।[3] हे हविःशेष ! 'त्वा' त्वाम् 'अग्नेः' वह्नेः 'आस्येन' मुखेन 'प्राश्नामि' अश्नामि इति।

आत्मयाजिपक्षभाष्यम्

स्वर्गस्य धारणां कथयति—'पिता' जगत्पालकः 'द्यौः' स्वर्गः 'उपहूतः' 'पिता द्यौः माम् उपह्वयताम्'। यस्मात् परस्पराह्वानाद् धारणा सिद्धा, तस्मादहं 'स्वाहा' महावाक्येन 'आग्नीध्रात्' ब्रह्मवह्न्याधानकारकयजमानरूपाद् 'अग्निः' ब्रह्माग्निः। द्यावापृथिव्योर्मध्ये यत् किञ्चिदस्ति, तत् सर्वमात्मेति निश्चीयत इति भावः। हे ब्रह्माण्डोपाधे ! 'सवितुः' गुरोः 'देवस्य' 'प्रसवे' प्रेरणे सति 'अश्विनोः' हार्दमानसान्तरिक्षयोः 'बाहुभ्यां' 'पूष्णः' मनसः 'हस्ताभ्यां' 'त्वा' त्वां 'प्रतिगृह्णामि' स्वीकरोमि। हे ब्रह्माण्डोपाधे ! 'अग्नेः' ब्रह्माग्नेः 'आस्येन' मुखेन, अहं ब्रह्मास्मीति निश्चयात् 'त्वा' त्वां 'प्राश्नामि' स्वात्मनि लयं करोमीति।

---

१. ज्वालाप्रसादमिश्रभार्गवाभ्याम् 'उपहूतो द्यौः' इति मन्त्रो ब्रह्मणः स्वर्गाह्वानेऽभिमतः।

२. 'देवस्य त्वा' इति प्रतिगृह्णाति। (का० श्रौ० सू० २. २. १४)

३. पुनरादाय देवस्य त्वा इत्यनामिकाङ्गुष्ठाभ्याम् 'अग्नेष्ट्वा' इति प्राश्नाति दन्तैरनुपस्पृशन्नत्र चेत्। (का० श्रौ० सू० २. २. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

तावेव व्यष्टचभिप्रायेण ब्रुवाते—द्यौरिति। न केवलं पृथिवी माता अपितु 'पिता' पालकः 'द्यौः' द्योतमानो द्युलोकः 'उपहूतः' सादरं सम्बोधितः स्वरक्षणाय याचितः सः 'द्यौः' द्युलोकः 'पिता' पालकः 'मा' मां विदेहं श्रुतदेवं वा 'उपह्वयताम्' उपहूय स्वीकरोतु, अङ्गीकरोतु, स्वस्याधस्ताद् वर्तमानं मां वृष्टयादिना तर्पयतु। 'अग्निः' 'आग्नीध्रात्' 'स्वाहा' इति पदत्रयं व्याख्यातपूर्वम्। 'देवस्य' असुरान् विजिगीषोः, स्वजनरक्षणेन मोदमानस्य वा, कृष्णादिलीला-विग्रहं क्रीडतो वा 'दिवु क्रीडादिषु' (दि० प० ११०७) 'सवितुः' प्रेरकस्य सर्वाध्यक्षस्य परमेश्वरस्य 'प्रसवे' उत्पादिते जगति 'अश्विनोः' सूर्याचन्द्रमसोः 'बाहुभ्यां' तमोबाधकाभ्यां वृष्टयमृतसेचनहेतुशक्तिभ्यां 'पूष्णः' पोषकस्य वायोः 'हस्ताभ्यां' शोधन-सर्वाङ्गपक्वभुक्तादि-रसवितननसामर्थ्याभ्यामनुगृहीतः 'त्वा' त्वदीयं, त्वया दत्तं, पूर्वकण्डिकायां प्रार्थितं वस्तुजातं 'प्रतिगृह्णामि' स्वीकुर्वे सादरमाददीय। छन्दसि कालानियमात्। न केवलमेतावदेव, अपितु त्वत्प्रसादाद् 'अग्नेः' प्रदीप्तस्य जठरानलस्य 'आस्येन' मुखेन 'प्राश्नामि' प्राश्नीयाम्; यथेष्टमुप-भुञ्जीय। प्रभो! तथाऽनुगृह्णातु भवान् यथाहं प्रदीप्तजठरानलो व्याधिविनिर्मुक्तः स्वस्थस्त्वया दत्तं विविधभोग्यजातं सर्वथा सर्वत्र सर्वदा ससुखमुपभोक्तुं क्षमः स्यामिति भावः। अपि वा 'अग्नेः' संसारमहोदधिनिमग्नान् जनानग्रे नयतः समुन्नमयतः पतितपावनस्य तव 'आस्येन' मुखेन, तदुच्चरितनिदेशेन, आज्ञावचनेन प्राश्नामि इत्यन्वयः। 'त्वा' शब्दो विवृतपूर्वः।

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे।
तेन यज्ञमव तेन यज्ञपतिं तेन मामव॥ १२॥

ईश्वर-प्रार्थना।

देवयाजिपक्षभाष्यम्

द्वादश्यां कण्डिकायाम् 'एतं ते' इतीश्वरप्रार्थनात्मक एक एव मन्त्रः। अस्य बृहस्पतिः[1] ऋषिः, याजुषी छन्दः, विश्वेदेवा देवताः (श० ब्रा० १. ७. ४. २१, का० श्रौ० २. २. १९)।

'हे ब्रह्मन्! अनुयाजार्थं प्रस्थास्यामि माम् अनुजानीहि' इत्येवम् अध्वर्युणा प्रार्थितो ब्रह्मा तं द्वाभ्यां कण्डिकाभ्यामीश्वरप्रार्थनापूर्वकं प्रसौति—एतं ते देवेति।[2] 'देव' दानादिगुणयुक्त देदीप्यमान! 'सवितः' हे प्रसवितः! 'एतम्' इमम् अनुष्ठीयमानं 'यज्ञम्' अध्वरं 'ते' त्वन्निमित्तकं 'प्राहुः' यजमाना अध्वर्यवो वा ऊचुः। "स यत्राऽऽह ब्रह्मन् प्रस्थास्यामीति तद् ब्रह्मा जपति 'एतं ते देव सवितर्यज्ञं प्राहु'रिति तत्सवितारं प्रसवायोपधावति" (श० ब्रा० १. ७. ४. २१) इति

१. ज्वालाप्रसादमिश्रभार्गवौ परमेष्ठिनं प्राजापत्यमृषिं मन्वाते।
२. 'एतं ते' इति समिदामन्त्रितः प्रसौति। (का० श्रौ० सू० २. २. १९)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुतेः। अथवा सवितृप्रेरितो देवानां यज्ञे यो ब्रह्मा तस्मै ब्रह्मणे बृहस्पतये च प्राहुः—'बृहस्पतये' बृहस्पतिसंज्ञकाय 'ब्रह्मणे' देवर्त्विजे इमं यज्ञं प्राहुरिति शेषः। 'बृहस्पतिर्वै देवानां ब्रह्मा, तद्य एव देवानां ब्रह्मा तस्मा एवैतत् प्राह' (श० ब्रा० १. ७. ४. २१) इति श्रुतेः। तत्प्रतिनिधिभूत एवायं मानुषो ब्रह्मा ब्रह्मत्वं करोति, तदीयामनुज्ञां समर्थयेति भावः। उव्वटस्तु प्राहुरिति, एकवचनस्य स्थाने बहुवचनम्। प्राह ब्रवीतीति व्याख्यातवान्। 'तेन' तस्मात् कारणात् 'यज्ञम्' इमं क्रियमाणं यागम् 'अव' पाहि, 'तेन' तेनैव हेतुना 'यज्ञपतिम्' यजमानं पालय, 'तेन' तेनैव हेतुना च 'मां' मानुषं ब्रह्माणम् 'अव' रक्षेति।

आत्मयाजिपक्षभाष्यम्

'हृदयं ब्रह्मा' (श० ब्रा० १२. ८. २. २३)। ब्रह्मा कथयति—'देव' हे मोक्षदानादिगुणयुक्त ! 'सवितः' सर्वस्य प्रेरक परमेश्वर ! वेदाः 'एतं यज्ञं' योगयज्ञं 'ते' तुभ्यं 'बृहस्पतये' वेदानां पत्ये 'ब्रह्मणे' 'प्राहुः'। 'तेन' हेतुना 'यज्ञम् अव' रक्ष, सिद्धं कुरु, 'तेन' तेनैव हेतुना 'यज्ञपतिं' यजमानम् 'अव' रक्ष, योगसिद्धिं देहि, 'तेन' तेनैव हेतुना 'मां' यजमानहृदयम् 'अव' संसाराद् रक्षेति।

सात्वतपक्षभाष्यम्

विश्वामित्रोऽयोध्याधिपतिं दशरथं व्याहरति—एवमिति। 'देव' तेजसा द्योतमान राजन् 'सवितः' प्रजानां स्वे स्वे कर्मणि प्रेरक, नियोजक ! 'एतं' नातिदूरे अनुष्ठीयमानमृषिभिः 'यज्ञं' यागं 'बृहस्पतये' 'ब्रह्मणे' इति चतुर्थ्यौ षष्ठ्यर्थे। तस्मात् 'ते' तव त्वदीयस्य त्वदात्मजस्य 'बृहस्पतेः' बृहती वेदवाणी तत्पालकस्य हयग्रीवादिवपुषा वेदरक्षकस्य 'ब्रह्मणः' साक्षात्परब्रह्मस्वरूपस्य रामस्य रक्षणीयं 'प्राहुः' कथयन्ति विद्वांसः। एष यज्ञो नान्तरेण रामं निर्विघ्नं सेत्स्यति, तस्मात् त्वं दशरथोपकण्ठे गच्छ, समानय तत्सुतं रामं, स समागत्य यज्ञविघातकरक्षोजातं निहत्य यज्ञमिमं पूर्तिपथं नेष्यतीत्यतो विद्वद्भिरनुमतोऽहं रामं समानेतुं समागतः। त्वरितं प्रेषय मया सार्धं रामम्। परित्यज धर्मज्ञ ! सुतस्नेहम्। न भेतव्यं स्वप्नेऽपि, नायं रामो मानवः, किं तर्हि साक्षात्परब्रह्मैव। पूर्वजन्मनि समाचरितात्तपसः प्रभावात्तव सद्मन्यवातरत्। अयत्नत एवासौ जेष्यति रक्षोवृन्दमिति भावः। तेन हेतुना त्वमृषिभिः प्रारब्धं यज्ञम् 'अव' रक्ष। 'यज्ञपतिं' यजमानम्, 'अव' रक्ष 'मां' विश्वामित्रम् 'अव' रक्ष रामप्रेषणादिति तात्पर्यम्।

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु। विश्वे देवास इह मादयन्तामो३ प्रतिष्ठ ॥ १३ ॥

ब्रह्मणोऽनुज्ञा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

त्रयोदश्यां कण्डिकायां 'मनोजूतिः' इत्येक एव मन्त्रो ब्रह्मानुज्ञार्थः। ऋषिच्छन्दोदेवताः प्राग्वत् (श० ब्रा० १. ७. ४. २२, का० श्रौ० २. २. १९–२०)।

'जूतिः' जवनशीलम्। अतीतानागतवर्तमानसन्निकृष्टविप्रकृष्टसकलपदार्थेष्वप्रतिहतगति। 'जु' इति गत्यर्थे सौत्रो धातुः। तस्माद् भावेऽर्थे 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (पा० ३. ३. ९७) इति क्तिन्प्रत्ययान्तोऽन्तोदात्तो निपात्यते, स्त्रीत्वं छान्दसम्। 'मनः' हे सवितः! तव चित्तम् 'आज्यस्य' घृताहुतेरस्याः, अत्र कर्मणि षष्ठी, इदं घृतमिति भावः। 'जुषताम्' सचताम्। यज्ञसम्बन्धिन्यां घृताहुत्यां स्वीयं मनः कुर्वित्याशयः। 'बृहस्पतिः' तदाख्यो देवः 'इमं' क्रियमाणं 'यज्ञम्' अध्वरं 'तनोतु' विस्तारयतु, ब्रह्मभावात्। 'इमं' 'यज्ञम्' 'अरिष्टम्' अनष्टम्। इडाभक्षणेन हि जायमानं यज्ञच्छिद्रं पूरितं यथा स्यात्तथा नाशरहितम्। 'रिष हिंसायाम्' (भ्वा० प० ६९४) अतः कर्मणि क्तप्रत्यये रिष्टं हिंसितम्। न रिष्टमरिष्टम्, अनष्टमित्यर्थः 'संदधातु' करोतु। 'इह' कर्तव्येऽनुष्ठाने 'विश्वे' सर्वे 'देवासः' देवाः। प्रथमायां बहुवचने जसि 'आज्जसेरसुक्' (पा० ७. १. ५०) इत्यसुगागमे 'देवासः' इति रूपम्। 'मादयन्ताम्' तृप्यन्ताम्। 'मद तृप्तियोगे' (चु० उ० १७०५)। 'ओम् प्रतिष्ठ' एवमभ्यर्थितो देवः सविता मदीयां प्रार्थनां स्वीकृत्य 'यथासुखं नियोगमनुतिष्ठ' इत्येवं मां ब्रह्माणं प्रसुवतु। ओमित्यभ्युपगमार्थे निपात इति।

आत्मयाजिपक्षभाष्यम्

हृदयरूपो ब्रह्माऽनुजानाति—'मनः' 'जूतिः' ज् चतुराननः, ऊः महादेवः, त् विष्णुः, इः कामः, इति त्रिदेवरूपधरं नारायणं कामयते इति 'जूतिः' बुद्धिश्च 'आज्यस्य' इन्द्रियशक्तिसमूहस्य, 'एतद्वै देवानां प्रियतमं धाम यदाज्यम्' (श० ब्रा० १३. २. १. २) 'जुषतां' सेवताम्। किं च 'बृहस्पतिः' प्राणः 'एष (प्राणः) उ एव बृहस्पतिः' (श० ब्रा० १४. ४. १. २२) 'इमं' 'यज्ञं' ज्ञानयज्ञं 'तनोतु' विस्तारयतु 'इमं' 'यज्ञं' यज्ञानुष्ठानम् 'अरिष्टं' निर्विघ्नं 'संदधातु' किं च 'विश्वे' सर्वे 'देवासः' परानरनारायणाः 'इह' ज्ञानयज्ञे 'मादयन्तां' तृप्यन्ताम्। 'ओम्' तथाऽस्तु इत्यङ्गीकारार्थः 'प्रतिष्ठ' प्रयाणं कुरु। हृदयरूपब्रह्मणाऽनुज्ञातोऽध्वर्युरौपभृतमाज्यशेषं जुह्वां समानीय त्रिभिरनुयाजैश्चरति। 'प्राणोदानौ वा अध्वर्यू' (श० ब्रा० ५. ५. १. ११) 'मन उपभृत्' (श० ब्रा० ११. ५. ६. ३) 'असावेव द्यौर्जुहूः' (श० ब्रा० १. ३. २. ४), 'छन्दांसि ह्यनुयाजाः' (श० ब्रा० १. ३. २. ९) इति।

सात्वतपक्षभाष्यम्

कौशिकः पुनराचष्टे राजानम्—मन इति। भूपते! 'आज्यस्य' घृतादिसाध्यस्य यज्ञस्य,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधनस्य साध्ये लक्षणा, षष्ठी सप्तम्यर्थे इति 'आज्ये' यज्ञे 'मनः' अन्तःकरणं 'जुषताम्' प्रीयताम्, कीदृशं मनः 'जूतिः' जवति गच्छति अतीतानागतवर्तमानसन्निहितविप्रकृष्टस्थूल-सूक्ष्मवस्तुजातमिति तथाविधं, तस्माद् भाविपरिणामं दूरदर्शिमनसाऽऽलोच्य यज्ञसिद्धये मया सार्धं रामोऽवश्यं प्रहेतव्य इति भावः। 'जु गतौ' सौत्रो धातुः, कर्तरि क्तिन् दीर्घश्च 'ऊति-यूतिजूति०' इत्यादिना निपातनात्। अथवा आज्यस्येति प्रथमार्थे षष्ठीति 'आज्यम्' विवेचन-कुशलं मनः, अज्यते विविच्यते अनेन कर्तव्याकर्त्तव्यविवेकसाधनम्, अयं धर्मोऽयमधर्म इति व्युत्पत्तेः। 'जुषतां' सेवतां, विवेकयुक्तेन मनसा पुत्रासक्तिं परित्यज्य यज्ञरक्षणाय रामप्रेषण-मेव धर्मं इति निश्चित्य धार्मिकेण विवेकिना च भवता मया सार्धं स्वसुतः सहर्षं प्रेष्य इति भावः। ततो भवत्प्रहितः श्रीरामो बृहस्पतिहयग्रीवादिवपुषा बृहत्या वेदवाचो रक्षकः। 'इमं' ताटकावनोपकण्ठे तपोधनैरनुष्ठीयमानं 'यज्ञं' यागं 'तनोतु' विघातकरक्षोनिहननेन विस्तारयतु। अपि च 'इमं' यज्ञम् 'अरिष्टं' रक्षःकृतवैगुण्यप्रयुक्तविनाशरहितं निर्विघ्नं विधाय 'संदधातु' वैगुण्यपरिहारेण साङ्गतां नयतु। रामशौर्येण यज्ञोऽयं निर्विघ्नं सिद्ध्येदिति भावः। 'इह' अस्मिन् यज्ञे दत्तैर्हविर्भिः, 'विश्वेदेवासः' 'मादयन्तां' तृप्ता भवन्तु, प्रसीदन्तु चेति भावः। राजा अङ्गीकरोति 'ओम्' तथास्तु। ऋषिवाक्यमुररीकृत्य प्रार्थयते 'प्रतिष्ठ' यज्ञरक्षणाय याचित एष रामो न मदीयः, त्वदीय एव। तस्मात्तव मम च निरतिशयस्नेहास्पदं दैत्यदर्पदलनदक्षं रामं सहादाय 'प्रतिष्ठ' प्रस्थानं कुरुष्व, साधयतु परमेश्वरस्त्वत्समीहितं, पन्थानस्ते शिवाः सन्तु इति भावः।

एषा ते अग्ने समित्तया वर्धस्व चा च प्यायस्व। वर्धिषीमहि च वयमा च प्यासिषीमहि। अग्ने वाजजिद्वाजं त्वा ससृवाᳬसं वाजजितᳬ संमार्ज्मि॥ १४॥

१. होत्रा समिधोऽनुमन्त्रणम्, २. अग्निसम्मार्जनम्।

देवयाजिपक्षभाष्यम्

चतुर्दश्यां कण्डिकायां द्वौ मन्त्रौ। 'एषा ते' इत्यादिर्होत्रा समिदनुमन्त्रणार्थः। अस्य परमेष्ठी प्राजापत्य ऋषिरनुष्टुप् छन्दोऽग्निर्देवता। 'अग्ने' इत्यादेश्च यजुश्छन्दः, ऋषिदेवते पूर्वोक्ते, अग्निसम्मार्जने विनियोगः (श० ब्रा० १. ८. २. ३-६, का० श्रौ० ३. ५. २-४)।

अग्नीद् आहवनीये समिधं प्रक्षिपति। होता तामनुमन्त्रयते।[1] होतर्यनुमन्त्रणं कर्तुम-जानति यजमानोऽनुमन्त्रयते[2]—एषा ते इति। 'अग्ने' हे अग्निदेव ! 'एषा' अग्नीधा प्रक्षिप्यमाणा

१. 'एषा ते' इति होताऽनुमन्त्रयते। (का० श्रौ० सू० ३. ५. २)

२. अजानति यजमानः। (का० श्रौ० सू० ३. ५. ३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BYRSSMV

समित् 'ते' तव 'समित्' सन्दीपनहेतुः। 'तया' समिधा 'त्वं' 'वर्धस्व' एधस्व 'आप्यायस्व च' स्वयमेधमानः अस्मानपि सर्वतो वर्धय। त्वत्कृपया 'वयं' सर्वे 'वर्धिषीमहि' समृद्धा भूयास्म। 'वृधु वृद्धौ' (भ्वा० आ० ७५९) आशीर्लिङि उत्तमपुरुषबहुवचने रूपम्। 'आप्यासिषीमहि च' पुत्रपौत्रादिसन्तानं च वर्धयाम। 'प्यैङ् वृद्धौ' (भ्वा० आ० ९६४) अनिट्। प्यासीमहि इति प्राप्ते सीयुटोऽभ्यासेन प्यासिषीमहि इति छान्दसं रूपम्।

तत उत्तरपार्श्वे स्थितोऽग्नीत् क्रमेणाऽनुपरिधि सकृदग्निं सम्मार्ष्टि ।[1] पूर्वं सप्तम्यां कण्डिकायाम् 'अग्ने वाजजित्' इति मन्त्रेण इध्मसंनहनैरग्नेः सम्मार्जनमुक्तम्। तच्च सम्मार्जनं परिक्रम्य त्रिस्त्रिः कर्तव्यं तत्र निर्दिष्टम्। इह परिक्रमणं विनैवैकैकवारं कर्तव्यमिति विशेषः। 'वाजजित् अग्ने' अन्नस्य जेतः हे अग्ने! 'त्वा' त्वां 'वाजम्' अन्नमभिलक्ष्य 'ससृवांसं' गतवन्तम्। 'सृ गतौ' (भ्वा० प० ९३५) 'छन्दसि लिट्' 'क्वसुश्च' (पा० ३. २. १०५, १०७) इति क्वसुः प्रत्ययः अत एव 'वाजजितम्' अन्नविजयशीलं 'संमार्ज्मि' शोधयामीति।

अत्र ब्रह्मार्षमन्त्रकाख्ये तृतीयानुवाके दशमीं कण्डिकामारभ्य चतुर्दशीं कण्डिकां यावन्नव मन्त्राः (दशम्यां द्वौ, एकादश्यां त्रयः, द्वादश्यामेकः, त्रयोदश्यामेकः, चतुर्दश्यां द्वौ) व्याख्याताः। तेषां क्रिया इमाः—१. आशीःप्रार्थना, २. अग्नीधो भागप्राशनम्, ३. अग्नीधो द्वितीयभागप्राशनम्, ४. ब्रह्मणः प्राशित्रग्रहणम्, ५. ब्रह्मणः प्राशित्रप्राशनम्, ६. ईश्वरप्रार्थना, ७. ब्रह्मणोऽनुज्ञा, ८. होत्रा समिधोऽनुमन्त्रणम्, ९. अग्निसम्मार्जनम्। त्रिष्वनुवाकेषु चतुर्दशकण्डिकासु समुदिता मन्त्रसंख्या एकचत्वारिंशत् (४१)।

आत्मयाजिपक्षभाष्यम्

'वाग्वै यज्ञस्य होता' (श० ब्रा० १२. ८. २. २३)। होता कथयति—'अग्ने' हे आत्माग्ने! 'एषा' प्राणरूपा 'ते' तव 'समित्' समिन्धनहेतुः 'च' 'तया' समिधा 'वर्धस्व' वृद्धिं गच्छ 'च' अस्मानपि 'आप्यायस्व' सर्वतो वृद्धिं प्रापय यज्ञानुष्ठानेन वेदानां प्रचारात्। 'च वयं वर्धिषीमहि' यज्ञप्रचारेण सर्वत्र विद्यमानत्वात्। 'च आप्यासिषीमहि' यज्ञकर्माणि सर्वतो वृद्धानि करवाम। 'वाजजित्' हे प्राणजित्! 'अन्नं हि प्राणः' (श० ब्रा० २. २. १. ६) 'अग्ने' आत्माग्ने! 'वाजं' प्राणमुद्दिश्य 'ससृवांसं' गच्छन्तं 'वाजजितं' प्राणजयकारकं 'त्वा' त्वां 'संमार्ज्मि' शोधयामीति।

सात्वतपक्षभाष्यम्

गुरुकुलादधीत्य स्वगृहं प्रति निवर्तमानं कृष्णं सान्दीपनिर्गुरुराह एषेति। 'अग्ने' अविद्यादाहकप्रकाशयुक्त मम शिष्य कृष्ण! 'एषा' मत्तोऽधीता चतुःषष्टिकलात्मिका विद्या 'ते' तव

१. सम्मार्ष्टि पूर्ववदपरिक्रामं सकृत् सकृत् 'ससृवांसम्' इति। (का० श्रौ० सू० ३. ५. ४)

1032

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'समित्' समिन्धयति दीपयतीति समिद् दीपयित्री, सर्वासु दिक्षु कीर्तिप्रसारिणी भूयात्। संपूर्वाद् 'इन्धेः' (रु० आ० १४४६) कर्तरि क्विप्, अन्तर्भावितण्यर्थोऽत्र इन्धिः। अधीतं ते फलपर्यवसायि स्यादिति भावः। वत्स कृष्ण ! 'वर्धस्व' शरीरेण वृद्धिं गच्छ। चकारः समुच्चये। 'आप्यायस्व' बाह्यैर्विजयपुत्रपौत्रधनादिभिर्वृद्धिं व्रज। 'प्यैङ् वृद्धौ' (भ्वा० आ० ९३३), आह च यास्कः—'वर्धत इति स्वाङ्गाभ्युच्चयं, सांयौगिकानां वार्थानाम्, वर्धते विजयेनेति वा, वर्धते शरीरेणेति वा' (निरु० १. २) इति। सांयौगिकानां सामवायिकानां सम्बद्धानां बाह्यानां शरीराद् बहिर्लब्धानामागन्तुकानां 'वयं वर्धिषीमहि' तव यमालयात् मृतमदीयपुत्रानयनादिरूपात् पराक्रमाद् वृद्धिं शरीरेण प्राप्नुयाम। अत्रापि चकारद्वयं समुच्चयार्थम्। 'आप्यासिषीमहि' आगन्तुकैः पुत्रपौत्रधनादिभिर्वृद्धाः स्याम। शारीरिकीं बाह्यागन्तुकवस्तुनिमित्ताञ्च द्विविधां समुन्नतिं लभेमहीति भावः। वृद्ध्यर्थकप्यैङ्धातोराशीर्लिङि उत्तमैकवचने सीयुटि यकारलोपे 'सिब्बहुलं लेटि' (पा० ३. १. ३४) इति सूत्रेण बाहुलकात् लेटोऽभावेऽपि मध्ये सिपि ततः इडागमे, आप्यासिषीमहीति साधु। 'अग्ने' वीराग्रणीः शूरशिरोमणे कृष्ण ! त्वं 'वाजजित्' वाजं बलवन्तं कंसादिकं जयतीति तथाविधोऽसि। बलवतः कंसादेर्विजेताऽतिशूरो वर्तसे इति भावः। अपि वा वाजं ज्ञानं विद्यां जयति प्राप्नोतीति तथा, लब्धविद्य इत्यर्थः। 'वज गतौ' (भ्वा० प० २५२) गतिरत्र ज्ञानम्। अत एव 'वाजं' ज्ञानं 'ससृवांसं' प्राप्तवन्तं तेनैव 'वाजजितं' वाजः पूजा विद्वत्सभायां प्रतिष्ठा। वाजयतीत्यर्चतिकर्मा (निघ० ३. १४. ३६) तं जयतीति वाजजिद् विद्वदग्रगण्यः। तादृशं 'संमार्ज्मि' मन्त्रपूतजलादिभिः सम्मार्जनं करोमि। अधीतशास्त्रोऽयं शिष्यः स्वगृहं गच्छेदिति तत्कल्याणाय जलादिभिः सम्मार्जनं कृत्वाऽऽचार्यः शिष्यं प्रेषयतीति भारतीयप्रथा।

४. स्रुग्व्यूहनाद्यनुवाकः

अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि। अग्नीषोमौ तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि। इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि। इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥ १५ ॥

१. पौर्णमासयागे जुहूव्यूहनम्, २. तत्रैव च उपभृद्व्यूहनम्, ३. दर्शयागे जुहूव्यूहनम्, ४. दर्शे उपभृद्व्यूहनम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

पञ्चदश्यां कण्डिकायां चत्वारो मन्त्राः।[1] 'अग्नीषोमयोः' इत्यादिर्जुहूव्यूहनः प्रथमः। अस्य यजुश्छन्दः, लिङ्गोक्ता देवता । 'अग्नीषोमौ' इत्यादिर्द्वितीयो मन्त्र उपभृद्व्यूहनः। अस्य छन्दोदेवते प्राग्वत्। एवमेव 'इन्द्राग्न्योः' इत्यादिर्जुहूव्यूहनः। अस्य आर्षी उष्णिक् छन्दः, लिङ्गोक्ता देवता। 'इन्द्राग्नी' इत्यादिरुपभृद्व्यूहनः। अस्य आर्षी पङ्क्तिश्छन्दः, लिङ्गोक्ता देवता। परमेष्ठी प्राजापत्य ऋषिः सर्वेषां समानः (श० ब्रा० १. ८. ३. १-५, का० श्रौ० ३. ५. १७-२०)।

'अग्नीषोमीयं हि पौर्णमासं हविर्भवति' (श० ब्रा० १. ८. ३. २) इति श्रुतेः पौर्णमास्यां तावज्जुहूपभृतोरुभयोः स्रुचोर्व्यूहनं चिकीर्षन् यजमानो वेदेः पश्चादागत्य मन्त्रं पठति। व्यूहनं नाम विपरीतत्वेनापनोदनम्। तत्र प्रत्यङ्मुख्या जुह्वाः प्राच्यामपनोदनम्। प्राङ्मुख्या उपभृतः प्रतीच्यामपनोदनमिति विवेकः। दक्षिणेनोत्तानेन पाणिना प्रत्यङ्मुखीं स्थितां जुहूं प्रस्तरात् प्राच्यामपनुदन् यजमानः पठेत्—अग्नीषोमयोरिति।[2] 'अग्नीषोमयोः' पौर्णमासयागे प्रधानदेवतयोः 'उज्जितिम्' हविःस्वीकरणरूपमूर्ध्वजयम् 'अनु' अनुलक्ष्य 'उज्जेषम्' उत्कृष्टं विजयं लब्धवानस्मि। 'वाजस्य' अस्य पुरोडाशादेः 'प्रसवेन' अभ्यनुज्ञानेन 'मा' माम्, आत्मानं यजमानं 'प्रोहामि' प्रेरयामि। 'ऊह वितर्के' (भ्वा० आ० ६४८), इह मन्त्रे प्रेरणार्थकः परस्मैपदी च द्रष्टव्यः। ततो यजमानः सव्येनाऽधोमुखेन पाणिना प्राङ्मुखीमुपभृतं प्रस्तरात् प्रतीच्यां निनीषन् मन्त्रं पठति—अग्नीषोमाविति।[3] 'अग्नीषोमौ' प्रधानहविर्भाजौ देवते 'तं' यज्ञविघातकं शत्रुम् 'अपनुदताम्' अपसारयताम्। 'णुद प्रेरणे' (तु० उ० १२८३)। 'यः' 'अस्मान्' यज्ञानुष्ठानप्रवृत्तान् 'द्वेष्टि' यागे विघ्नमाचरति। 'द्विष अप्रीतौ' (अ० उ० १०१३)। 'यं च' अस्मद्यागविनाशाय चोद्युञ्जानं वैरिणं 'वयं' यज्ञप्रवृत्ताः 'द्विष्मः' अपनिनीषामः। जुहूपभृतोर्व्यूहनात्मको विधिरयं पौर्णमासयागेऽनुष्ठेयः। 'ऐन्द्राग्नं ह्यामावास्यं हविर्भवति' (श० ब्रा० १. ८. ३. ४) इति श्रुतेः। प्राग्वद् दर्शयागे जुहूपभृतोः स्रुचोर्व्यूहनं करिष्यन् यजमानः प्रधानदेवतयो-

१. अत्र तावद् ज्वालाप्रसादभार्गवस्त्रीन् मन्त्रानाह। 'अग्नीषोमयोः' इत्यारभ्य 'प्रसवेनापोहामि' इत्यन्त एको मन्त्रो जुहूव्यूहनार्थः। 'इन्द्राग्न्योः' इति मन्त्र उपभृद्व्यूहनः। 'इन्द्राग्नी' इति च शत्रुनाशनस्तृतीयो मन्त्र इति। एवमेव ज्वालाप्रसादमिश्रोऽपि त्रीन् मन्त्रान् मेने। 'अग्नीषोमयोः' इति जुहूपभृद्व्यूहनः प्रथमः। 'इन्द्राग्न्योः' इति द्वितीय उपभृन्निधानः। 'इन्द्राग्नी' इति तृतीयश्च शत्रुनाशन इति। उभयमपि नास्मभ्यं रोचते, शतपथब्राह्मणस्य उव्वटमहीधरयोरैकमत्याच्चास्माकं चतुर्मन्त्रात्मको विनियोग एवेष्ट इति।

२-३. एत्य जुहूपभृतौ व्यूहति 'अग्नीषोमयोः' इति जुहूं प्राचीं दक्षिणेनोत्तानेन 'अग्नीषोमौ तम्' इतीतरेणोत्तरां नीचा प्रतीचीम्। (का० श्रौ० सू० ३. ५. १७)

५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रिन्द्राग्न्योर्नामादेशं स्मरति। तत्र 'इन्द्राग्न्योः' इति मन्त्रेण जुह्वाः, 'इन्द्राग्नी' इत्यनेन च उपभृतो व्यूहनं दर्शयागे कर्तव्यमिति विवेकः। मन्त्रार्थः पूर्ववदूह्यः।

आत्मयाजिपक्षभाष्यम्

'अग्नीषोमयोः' भोक्तृभोग्ययोः। 'अन्नाद एवाग्निरभवद् अन्नं सोमः' (श० ब्रा० ११. १. ६. १९) 'उज्जितिम्' उत्कृष्टं जयम् 'अनु' पश्चात् 'उज्जेषम्' उत्कृष्टं जयं, संसारजयाख्यं मोक्षं प्राप्नुयाम्। 'मा' मायां 'वाजस्य' ज्ञानयज्ञस्य 'प्रसवेन' फलेन 'प्रोहामि' देशान्तरे नयामि। 'यः' कामः 'अस्मान् द्वेष्टि' मोक्षलाभे द्वेषं करोति 'च' 'वयं' 'यम्' अज्ञानशत्रुं 'द्विष्मः'। 'तम्' उभयविधं शत्रुम् 'अग्नीषोमौ' प्रकृतिपुरुषौ 'अपनुदताम्' निराकुरुताम्। अहमपि 'एनं' द्विविधं शत्रुं 'वाजस्य' ज्ञानयज्ञस्य 'प्रसवेन' फलेन 'अपोहामि' निराकरोमि। 'इन्द्राग्न्योः' योगयोगेश्वरयोः, 'इन्द्राग्नी वै सर्वे देवाः' (श० ब्रा० ६. १. २. २८)। 'उज्जितिम्' उत्कृष्टजयं, योगसिद्धिम् 'अनु' पश्चात् 'उज्जेषम्' समाधिं प्राप्नुयाम्। 'मा' महामायां 'वाजस्य' ज्ञानयज्ञस्य 'प्रसवेन' फलेन 'प्रोहामि' देशान्तरे नयामि। 'यः' कर्तृत्वाभिमानः 'अस्मान् द्वेष्टि, च वयं' 'यं' देहाभिमानं 'द्विष्मः' 'तम्' उभयविधं शत्रुम् 'इन्द्राग्नी' नरनारायणौ 'अपनुदताम्'। 'एनं' कर्तृत्वाभिमानं 'वाजस्य' ज्ञानयज्ञस्य 'प्रसवेन' फलेन 'अपोहामि' दूरीकरोमि। कर्तृत्व-त्यागविधिर्गीतायामुपदिष्टः। यथा—

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥ (५–७)
नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्छृण्वन् स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन्॥ (५–८)
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ (५–९)
प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्तारं स पश्यति॥ (१३–२९) इति।

सात्वतपक्षभाष्यम्

गुरुजनानुज्ञातो योद्धुं प्रतिष्ठमानो धनञ्जयतनयोऽभिमन्युराचष्टे—अग्नीषोमयोरिति। 'अग्नीषोमयोः' अग्निः दुर्जनदावदहनो मम मातुलः कृष्णः, सोमः गौरत्वेन चन्द्रसदृशो ज्येष्ठो मम मातुलो बलरामस्तयोः 'उज्जितिम्' उत्कृष्टं विजयम् 'अनु' अनुलक्ष्य 'उज्जेषं' शत्रूनतिशयेन अभिभवेयम्, यथा मम मातुलयोः पुरस्तात् युधि न कश्चित् सपत्नः स्थातुं शक्नोति, सर्वस्य सपत्नवर्गस्य तौ पराजेतारौ, तथाऽहमपि युधि समुपस्थितं सपत्नगणं पराजयेय निश्चितमिति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावः। 'वाजस्य' युद्धस्य 'प्रसवेन' गुरुजनलब्धानुज्ञया 'मा' माम् आत्मानं 'प्रोहामि' प्रोत्साहयामि। गुरुजनं योद्धुं लब्धादेशोऽहमतीव हृष्यामीति भावः। 'अग्नीषोमौ' मम मातुलौ यथा तं 'योऽस्मान् द्वेष्टि' यो दुर्जनोऽस्मान् निरपराधान् द्वेष्टि दुःखाकरोति 'यं च' शरीरस्थ-मालस्यादिकं 'वयं द्विष्मः' तिरस्कारेण पश्यामः, तं द्विविधं शत्रुं 'अनुपदतां' दूरीकुर्वाति, छन्दसि कालानियमात्। तथाहमपि द्विविधं शत्रुं 'वाजस्य' युद्धस्य 'प्रसवेन' उत्पादेन युद्धं कृत्वेत्यर्थः 'अपोहामि' अपाकरोमि, अभिभवामि।

इन्द्राग्न्योरिति द्वितीयार्धे इन्द्रशब्देनाभिमन्युतातोऽर्जुनो ग्राह्य इन्द्रांशत्वाद्। अग्नि-शब्दस्य पुनर्वचनं बलरामकृष्णयोरिव कृष्णार्जुनयोः मम तातमातुलयोः साहचर्यसूचनाय। तदर्थस्तूभयत्र समान एव। शिष्टं समानम्।

वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम्। व्यन्तु वयोऽक्तꣳ रिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह। चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि॥ १६॥

१. मध्यमपरिध्यञ्जनम्, २. दक्षिणपरिध्यञ्जनम्, ३. उत्तरपरिध्यञ्जनम्, ४. प्रस्तरादानम्, ५. प्रस्तराञ्जनम्, ६. एकं तृणं रक्षित्वा शेषस्य प्रस्तरस्याग्नौ प्रक्षेपः, ७. आत्मालम्भनम्।

देवयाजिपक्षभाष्यम्

षोडश्यां कण्डिकायां सप्त मन्त्राः।[1] 'वसुभ्यस्त्वा' इत्येको मध्यमपरिध्यञ्जनः। अस्य दैवी बृहती छन्दः, परिधिर्देवता। 'रुद्रेभ्यस्त्वा' इति दक्षिणपरिध्यञ्जनः। अस्य छन्दोदेवते प्राग्वत्। 'आदित्येभ्यस्त्वा' इत्युत्तरपरिध्यञ्जनस्तृतीयः। अस्य दैवी पङ्क्तिश्छन्दः, परिधिर्देवता। 'सञ्ज्ञानाथाम्' इत्यादिर्मन्त्रस्तुरीयः प्रस्तरादानः। अस्य यजुश्छन्दः, प्रस्तरो देवता। 'व्यन्तु' इत्यादिः पञ्चमः प्रस्तराञ्जनः। अस्य प्राजापत्या गायत्री छन्दः, प्रस्तरो देवता। 'मरुताम्' इत्यादिः षष्ठोऽग्नौ कुशप्रक्षेपणः। अस्योपरिष्टाद् बृहती छन्दः (मिश्रमते बृहती छन्दः), परिधिर्देवता। 'चक्षुष्पाः' इति सप्तम आत्मालम्भनः। अस्य बृहती छन्दः, अग्निर्देवता। षष्ठवर्जं सर्वेषां परमेष्ठी प्राजापत्य ऋषिः। षष्ठमन्त्रस्य कपिर्ऋषिः (श० ब्रा० १. ८. ३. ७–१९, १. ९. २. १७, का० श्रौ० ३. ६. १–१४)।

१. अत्र ज्वालाप्रसादमिश्रः षडेव मन्त्रान् मेने। 'चक्षुष्पाः' इति सप्तमं न पृथङ् निर्दिष्टवान्। स्वीये भाषाऽनुवादे च सप्तममपि निर्दिष्टवान्। ज्वालाप्रसादभार्गवोऽपि प्रतिज्ञायाऽपि सप्त मन्त्रान् विनियोगक्रमेण न स्पष्टमाह।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्वर्युः प्राक् प्रणीतोदकैर्जुहूमभ्युक्ष्य जुहूस्थेन घृतेन क्रमशः पश्चिमदक्षिणोत्तरान् त्रीन् परिधीननक्ति—वसुभ्यस्त्वेत्यादि ।[१] हे मध्यमपरिधे ! 'त्वा' त्वां 'वसुभ्यः' वस्वाख्यदेवानां प्रीत्यर्थम्, अनज्मीति शेषः । एवं हे दक्षिणपरिधे ! 'त्वा' त्वां 'रुद्रेभ्यः' रुद्रदेवतानां प्रीत्यर्थमनज्मि । हे उत्तरपरिधे ! 'त्वा' त्वाम् 'आदित्येभ्यः' आदित्यानां प्रीत्यर्थमनज्मि । ततोऽध्वर्युर्मन्त्रं पठित्वा हस्तेन प्रस्तरं गृह्णाति—सञ्ज्ञानाथामिति ।[२] 'द्यावापृथिवी' हे द्यावापृथिव्यौ देवते ! 'सञ्ज्ञानाथां' युवां जानीतं मया प्रस्तरो गृहीत इति, युवां वृष्टिं याचे । हे प्रस्तर ! 'मित्रावरुणौ' प्राणोदानभूतौ देवौ 'त्वा' त्वां 'वृष्टचा' वृष्टिप्रदानेन 'अवतां' रक्षताम् । 'अयं वै वर्षस्येष्टे योऽयं पवते' (श० ब्रा० १. ८. ३. १२) इति श्रुतेर्वृष्टचधिपतिर्वातः । स चाध्यात्मं प्राणोदानस्वरूपो मित्रावरुणशब्दाभ्यामुच्यते । प्राणोदानभूतौ मित्रावरुणौ देवते वृष्टिप्रदानेन प्रस्तररूपं यजमानं पालयतामिति भावः । 'यजमानो वै प्रस्तरः' (श० ब्रा० १. ८. १. ४४) इति श्रुतेः ।

अथ प्रस्तराधारभूते विधृती आहवनीयेऽग्नौ प्रक्षिप्य प्रस्तरमनक्ति—व्यन्तु वय इति ।[३] तत्र प्रस्तरस्याग्रभागं जुह्वां स्रुचि, मध्यमुपभृति, मूलं च ध्रुवायामिति विवेकः ।[४] इमं प्रस्तरं 'वयः' पक्षिणः, पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि 'अक्तं' घृताक्तं 'रिहाणाः' रलयोरैक्यात् 'लिहानाः' आस्वादयन्तः 'व्यन्तु' आदाय गच्छन्तु, 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अ० पा० १०४८) ।

प्रस्तरमाहवनीयसमीपे होमार्थमानीय, प्रस्तरमध्यादेकं तृणं परिशेष्य शेषं प्रस्तरमाहवनीये क्षिपति—मरुतामिति ।[५] हे प्रस्तर ! त्वं 'मरुतां पृषतीः' मरुतां देवानामन्तरिक्षस्थानां वाहनभूताश्चित्रवर्णा अश्वाः 'गच्छ' मरुद्वाहनवेगेनान्तरिक्षं याहि । 'वशा पृश्निः' 'इयं वै वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशा पृश्निः' (श० ब्रा० १. ८. ३. १५) इति श्रुतेः वशा स्ववशाऽपराधीना पृश्निरनेकविधान्नाद्यैर्युता भूमिः 'भूत्वा' 'दिवं' द्युलोकं 'गच्छ' भूम्यां जायमानैरन्नाद्यैर्द्युलोकं तर्पयेति भावः । घृताक्तप्रस्तराहुत्या पृथिव्यां वृष्टिः सम्भाव्यतेऽत आह—'ततः' द्युलोकात् 'नः' अस्मभ्यं 'वृष्टिं' वर्षणम् 'आवह' आनयेति । हे प्रस्तर ! त्वमाहुतिक्रमेणाऽन्तरिक्षं गच्छ, तत्र पृषतीवाहनान् मरुतः सन्तर्प्य दिवं स्वर्गं गच्छ, देवांस्तत्र सन्तर्प्य वृष्टिभावापन्नः पृथिव्यां पुनरागच्छेति भावः । अथ सप्तमेन मन्त्रेणात्मान-

---

१. 'वसुभ्यः' इति प्रतिमन्त्रम् । (का० श्रौ० सू० ३. ६. १)
२. 'सञ्जानाथा'मिति प्रस्तरादानम् । (का० श्रौ० सू० ३. ६. ४)
३. विधृती स्थाने कृत्वाऽनक्त्येनं 'व्यन्तु वय' इति । (का० श्रौ० सू० ३. ६. ५)
४. अग्रं जुह्वाम्, उपभृति मध्यम्, मूलमितरस्याम् । (का० श्रौ० सू० ३. ६. ६.)
५. 'मरुताम्' इति नीचैर्हृत्वा तृणमादायानुप्रहरति । (का० श्रौ० सू० ३. ६. ७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मालभते—चक्षुष्पा इति ।[१] 'अग्ने' त्वं 'चक्षुष्पाः' स्वप्रकाशेनान्धं तमोऽपाकृत्य सर्वेभ्यो दर्शन-सौकर्यं चक्षुर्ददासीति चक्षुषो दर्शनशक्तेः पालको रक्षकः 'असि'। अतः 'मे' मम 'चक्षुः' दृष्टिं 'पाहि' पालय । प्रस्तरप्रहरणेन जायमानमक्षिरोगं शमयेति भावः ।

आत्मयाजिपक्षभाष्यम्

हे जीवरूपपरिधे ! 'वसुभ्यः' अपराविकारभूतदेवेभ्यः 'त्वा' त्वाम्, अनज्मीति शेषः । हे नररूपपरिधे ! 'रुद्रेभ्यः' पराविकारभूतदेवेभ्यः 'त्वा' त्वाम्, अनज्मि । हे नारायणरूपा परिधे ! 'आदित्येभ्यः' ब्रह्मांशुभूतदेवेभ्यः 'त्वा' त्वाम् अनज्मि । 'द्यावापृथिवी' हृदयमनसी 'सञ्ज्ञानाथाम्' गृह्यमाणं यजमानरूपं प्रस्तरं सम्यगवगच्छतम् । 'यजमानो वै प्रस्तरः' (श० ब्रा० १. ८. १. ४४) । हे यजमान ! 'मित्रावरुणौ' प्राणोदानौ 'प्राणोदानौ वै मित्रावरुणौ' (श० ब्रा० १. ८. ३. १२), 'वृष्ट्या' अमृतवर्षणेन 'त्वा' त्वाम् 'अवताम्' रक्षताम् । 'अक्तम्' इन्द्रियशक्तियुक्तं यजमानं 'रिहाणाः' रलयोरैक्यात् लिहाना आस्वादयन्तः 'वयः' पक्षिणः, पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि, यजमानमादाय 'व्यन्तु' गच्छन्तु, 'वी गतिव्याप्तिप्रजन-कान्त्यसनखादनेषु' (अ० पा० १०४८) । हे यजमान ! त्वं 'मरुतां' प्राणानां 'पृषतीः' वाहन-रूपां सुषुम्णां 'गच्छ' प्राप्नुहि । जीवरूप-पराशक्ते ! त्वं 'वशा' वः प्राणस्तस्मिन् शेते सा वशा 'पृश्निः' आदित्यरूपा 'भूत्वा' 'दिवं' गगनमण्डलं 'गच्छ' 'ततः' तदनन्तरं 'नः' अस्माकं योगि-नामर्थे 'वृष्टिम्' अमृतवृष्टिम् 'आवह' । 'अग्ने' हे ब्रह्माग्ने ! त्वं 'चक्षुष्पाः' ज्ञानचक्षुषः पालकः 'असि' अतः 'मे' मम 'चक्षुः' 'पाहि' पालय ।

गायत्र्यादीनि छन्दांसि यजमानं दिवं नयन्तीत्युक्तम् । तत्र गायत्रीप्रभावो विष्णुधर्मो-त्तरादिष्वेवं वर्णितः—

कर्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च ।
पञ्च बुद्धीन्द्रियार्थाश्च भूतानां चैव पञ्चकम् ॥
मनो बुद्धिस्तथैवात्मा अव्यक्तं च यदुच्यते ।
चतुर्विंशतिरेतानि गायत्र्या अक्षराणि च ॥
प्रणवं पुरुषं विद्धि सर्वगं पञ्चविंशकम् ॥

योगि-याज्ञवल्क्यः— अक्षराणां तु दैवत्यं सम्प्रवक्ष्याम्यतः परम् ।
आग्नेयं (तत्) प्रथमं ज्ञेयं वायव्यं (स) च द्वितीयकम् ॥
तृतीयं (वि) सूर्यदेवत्यं चतुर्थं (तुः) वैद्युतं तथा ।
पञ्चमं (व) यमदेवत्यं वारुणं (रे) षष्ठमुच्यते ॥

१. प्रास्य तृणं 'चक्षुष्पा इत्यात्मानमालभते' । (का० श्रौ० सू० ३. ६. १४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बार्हस्पत्यं (णि) सप्तमं तु पार्जन्यम् (यम्) अष्टमं विदुः ।
ऐन्द्रं (भ) तु नवमं ज्ञेयं गान्धर्वं (र्गः) दशम तथा ॥
पौष्णम् (दे) एकादशं प्रोक्तं मैत्रावरुणं (व) द्वादशम् ।
त्वाष्ट्रं (स्य) त्रयोदशं ज्ञेयं वासवं (धी) तु चतुर्दशम् ॥
मारुतं (म) पञ्चदशकं सौम्यं (हि) षोडशकं स्मृतम् ।
सप्तदशं (धि) त्वाङ्गिरसं वैश्वदेवम् (यः) अतः परम् ॥
आश्विनं (यः) चैकोनविंशं प्राजापत्यं (नः) तु विंशकम् ।
सर्वदेवमयं (प्र) प्रोक्तमेकविंशमतः परम् ॥
रौद्रं (चो) द्वाविंशकं प्रोक्तं त्रयोविंशं (द) तु ब्राह्मकम् ।
वैष्णवं (यात्) तु चतुर्विंशमेता ह्यक्षरदेवताः ॥
जपकाले तु संस्मृत्य तासां सायुज्यतां व्रजेत् ॥

काशीखण्डः— अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी ।
ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च ॥
ततोऽपि धर्मशास्त्राणि तेभ्यो गुर्वी श्रुतिर्द्विज ।
ततोऽप्युपनिषच्छ्रेष्ठा गायत्री च ततोऽधिका ॥
दुर्लभा सर्वमन्त्रेषु गायत्री प्रणवान्विता ।
न गायत्र्यधिकं किञ्चित् त्रयीषु परिविद्यते ॥
गायत्री वेदजननी गायत्री ब्राह्मणप्रसूः ।
गायन्तं त्रायते यस्माद् गायत्रीति प्रगीयते ॥
वाच्यवाचकसम्बन्धे गायत्र्याः सवितुर्द्वयोः ।
वाच्योऽसौ सविता साक्षाद् गायत्री वाचिका परा ॥
प्रभावेणैव गायत्र्याः क्षत्रियः कौशिको वशी ।
राजर्षित्वं परित्यज्य ब्रह्मर्षिपदमीयिवान् ॥
सामर्थ्यं प्राप चात्युच्चैरन्यद् भुवनसर्जने ।
किं किं न दद्याद् गायत्री सम्यगेवमुपासिता ॥
न ब्राह्मणो वेदपाठान्न शास्त्रपठनादपि ।
देव्यास्त्रिकालमभ्यासाद् ब्राह्मणः स्याद् द्विजोऽन्यथा ॥
गायत्र्येव परो विष्णुर्गायत्र्येव परः शिवः ।
गायत्र्येव परो ब्रह्मा गायत्र्येव त्रयी यतः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुस्मृतिः— अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयान् निरदुहद् भूर्भुवः स्वरितीति च॥
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्॥

मनुयमवृद्धवशिष्ठाः— ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयस्तथा।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम्॥

योगियाज्ञवल्क्यः— गायत्रीं चैव वेदांश्च तुलया समतोलयन्।
वेदा एकत्र साङ्गास्तु गायत्री चैकतः स्थिता॥
सारभूतास्तु वेदानां गुह्योपनिषदो मताः।
तासां सारस्तु गायत्री तिस्रो व्याहृतयस्तथा॥
ओङ्कारपूर्विकास्तिस्रो गायत्रीं यश्च विन्दति।
चरितब्रह्मचर्यश्च स वै श्रोत्रिय उच्यते॥
एतया ज्ञातया सर्वं वाङ्मयं विदितं भवेत्।
उपासितं भवेत्तेन विश्वं भुवनसप्तकम्॥
एवं यस्तु विजानाति गायत्रीं ब्राह्मणस्तु सः।
अन्यथा शूद्रधर्मा स्याद् वेदानामपि पारगः॥
अज्ञात्वा चैव गायत्रीं ब्राह्मण्यादेव हीयते।
अपवादेन संयुक्तो भवेत् श्रुतिनिदर्शनात्॥

व्यासः— गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता॥
प्रतिग्रहान्नदोषाच्च पातकादुपपातकात्।
गायत्री प्रोच्यते तस्माद् गायन्तं त्रायते सदा॥

सवितृद्योतनात् सैव सावित्री परिकीर्तिता।
जगतः प्रसवितृत्वाद् वाग्रूपत्वात् सरस्वती॥

ऋष्यश्रृङ्गः— सर्वात्मना हि या देवी सर्वभूतेषु संस्थिता।
गायत्री मोक्षहेतुर्वै मोक्षस्थानमलक्षणम्॥

कूर्मपुराणम्— गायत्री वेदजननी गायत्री लोकपावनी।
न गायत्र्याः परं जप्यमन्यद् विज्ञानमुच्यते॥

योगियाज्ञवल्क्यः— गायत्री वेदजननी गायत्री पापनाशिनी।
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हस्तत्राणप्रदा देवी पततां नरकार्णवे।
तस्मात्तामभ्यसेन्नित्यं ब्राह्मणोऽनुदये शुचिः॥
गायत्रीनिरतं हव्यकव्येषु विनियोजयेत्।
तस्मिन्न तिष्ठते पापमब्बिन्दुरिव पुष्करे॥
गायत्र्याः पदमर्धं तु ऋचोऽर्धमृच एव वा।
ब्रह्महत्या - सुरापान - गुरुदाराभिमर्षणम्॥
यच्चान्यद् दुष्कृतं सर्वं पुनातीत्याह वै मनुः।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हति षोडशीम्॥

बृहद्विष्णुः—एतयर्चा विसंयुक्ता काले च क्रियया स्वया।
विप्रक्षत्रियविड्योनिर्गर्हणीया तु साधुषु॥

अग्निपुराणम्—गायत्रीं जपते यस्तु द्वौ कालौ ब्राह्मणः सदा।
असत्प्रतिग्रहीताऽपि स याति परमां गतिम्॥

सात्वतपक्षभाष्यम्

गुरुजनोऽभिमन्युमाशीराशिना स्नपयति—'वसवः' पृथिवीस्थाना अष्टौ, 'रुद्राः' अन्तरिक्षस्थाना एकादश, 'आदित्याः' द्युस्थाना द्वादश, उपलक्षणं इन्द्रप्रजापत्योः, तथा च मुख्याः त्रयस्त्रिंशद् देवास्तेभ्यः 'त्वा' त्वां रक्षितुं प्रार्थय इति शेषः। न केवलं देवाः 'द्यावापृथिवी' द्युलोकः पृथिवीलोकश्च तत्रत्याः प्रजा इति यावत् 'सञ्ज्ञानाथाम्' त्वां रक्षितुमवगच्छताम्। सर्वलोकनिवासिनः प्राणिनस्त्वद्रक्षणे तत्पराः भवन्त्वित्यर्थः। 'मित्रावरुणौ' मित्रो दिवसाभिमानी, वरुणो रात्र्यभिमानी, तौ त्वन्मातुलौ बलरामकृष्णौ, अथवा 'मित्रः' कृष्णस्य सखा त्वत्तातोऽर्जुनः 'वरुणः' त्वन्मातुलः कृष्णस्तौ। 'त्वा' त्वां 'वृष्ट्या' आशिषां वर्षणेन सन्ततशुभाशंसनसन्दोहेन 'अवतां' रक्षताम्। तयोरनवरतशुभाशंसनेन युधि भवान् विजयतामिति भावः। 'अक्तं' प्रकाशमानं तेजसा समृद्धं, युधि शौर्यातिरेकेण देदीप्यमानं 'रिहाणाः' स्तुवानाः 'रिह' कत्थनादिष्वर्थेषु, कत्थनं च प्रशंसनम्, कत्थधातुः श्लाघायां वर्तते। 'वयः' पक्षितुल्या विमानमारुह्य दिवि उड्डीयमाना देवाः 'व्यन्तु' त्वत्संग्रामकौशलावलोकनाय व्याप्नुवन्तु। युद्धभूमेरुपरितनं गगनं व्याप्नुवन्तु। विमानमारुह्य गगनेऽवस्थाय कौतूहलातिरेकेण स्वपत्नीसहितास्तव संग्रामं पश्यन्तु। 'मरुतां' त्वत्त्रासेन महद्द्राविणामतिवेगेन गच्छतां पलायमानानां सैनिकानां हननाय 'पृषतीः' अनवरतवर्षिका मेघमाला इव धनुःप्रक्षिप्तशरपरम्पराः 'गच्छ' प्राप्नुहि। विपक्षिसेनाशिरांसि छेत्तुं निशितशरनिकरं निक्षिपेति भावः। 'वशा' वशी सपत्नवर्गमात्मसात्कुर्वाणा, अभिभवन्ती। वशीति प्राप्ते सुपां सुलुगित्यादिना विभक्तेर्डा। 'पृश्निः'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदित्यस्तत्तुल्यपराक्रमः, दुर्धर्षतेजस्कः, यस्य पुरस्तात् सपत्नास्तेजसाऽभिभूताः स्थातुं न क्षमन्ते इति भावः। 'भूत्वा' तथा त्वं भूत्वा 'भू' प्राप्तावात्मनेपदी, विजयं प्राप्येत्यर्थः। 'दिवं' मोदं 'गच्छ' व्रज, हर्षातिरेकं लभस्व। 'ततः' तस्मात् शत्रुविजयाद्धेतोः 'नः' अस्मान् तव हितैषिणः सज्जनान् 'वृष्टिं' हर्षवर्षणं हर्षातिरेकम् 'आवह' प्रापय। शत्रुविजयेन स्वयं हृष्टस्सन् स्वबन्धुवर्गं हर्षयेत्यर्थः। 'अग्ने' अग्रणीः वीरप्रवर ! 'चक्षुष्पाः' चक्षत इति 'चक्षूंषि' कौतुकातिरेकाद् आगताः संग्रामदर्शकाः, कर्तरि दर्शनार्थकाच्चक्षेः 'चक्षेः शिच्च' (उ० सू० २. ११९) इत्युस् प्रत्ययः, स च शित् तेन ख्याञादेशाभावः। तानि 'पाति' लोकोत्तरयुद्धकौशलप्रदर्शनेन रक्षति, तर्पयति, प्रसादयतीति तथा 'असि' वर्तसे, युद्धदर्शनोत्सुकानां दर्शकानां लोकोत्तरपद्धत्या युद्ध्वा विस्मयोत्पादनेन प्रसादनमत्र रक्षणम्। तथा योद्धव्यं यथा युद्धावलोकनविस्मिताः प्रसन्नाः सञ्जातहर्षा अनेकवारं साधु साध्विति वदन्तो दर्शकाः प्रत्यावर्तेरन्, न निराशा भवेयुरिति भावः। अतः 'मे' मम गुरुजनस्य 'चक्षुः' नयनयुगलं 'पाहि' तर्पय। लोकोत्तरवस्तुदर्शनेन लोचनाऽऽह्लादनमेव लोचनस्य रक्षणम्। सुहृद्वर्गस्य लोकोत्तरसंग्रामं दर्शयित्वा नयनानन्दकरो भवेति तात्पर्यम्।

अत्र यास्कः—'मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा' (निरु० ११. १३), (१) संकुचितवाचो मुद्रितमुखाः, (२) संकुचिततेजस्काः, अभिभूता मन्दकान्तयः, (३) अतिशयेन धावन्ति वेति तेषां क्रमेणार्थः। 'पृश्निरादित्यो भवति। प्राश्नुत एनं वर्ण इति नैरुक्ताः। संस्प्रष्टा रसान्। संस्प्रष्टा भासं ज्योतिषाम्। संस्पृष्टो भासेति वा' (निरु० २. १४)। 'पृषतीः' 'पृषु सेचने' (भ्वा० प० ७०५) 'वर्तमाने पृषन्महद्०' (उ० सू० २. ८४) इत्यादिसूत्रेणातिप्रत्यये स्त्रियां साधुः। अत्र पृषतीरित्यस्य सेचनकर्तृमेघमालासदृशीरित्यर्थः।

यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः। तं त एतमनु जोषं भराम्येष नेत्त्वदपचेतयाता अग्नेः प्रियं पाथोऽपीतम् ॥ १७ ॥

१. मध्यमपरिध्यनुप्रहरणम्, २. दक्षिणोत्तरयोर्युगपत् प्रहरणम्।

देवयाजिपक्षभाष्यम्

सप्तदश्यां कण्डिकायां द्वौ मन्त्रौ। 'यं परिधिम्' इत्यादिर्मध्यमपरिध्यनुप्रहरणः। अस्य देवल ऋषिः, विराड्रूपा त्रिष्टुप् छन्दः, अग्निर्देवता। 'अग्नेः प्रियम्' इत्यादिर्दक्षिणोत्तरयोः परिध्योर्युगपत्प्रहरणार्थः। अस्यापि देवल ऋषिः, याजुषी छन्दः, अग्निर्देवता (श० ब्रा० १. ८. ३. २२, का० श्रौ० ३. ६. १६)।

अध्वर्युर्हस्तेन त्रीन् परिधीनाहवनीये प्रहर्तुमुपक्रममाणः प्रथमं मध्यमपरिधिं प्रक्षिपन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्त्रं पठति—यं परिधिमिति।[१] 'अग्ने' हे आहवनीयाग्ने ! 'देव' दीप्यमान ! 'यं परिधिं परिधत्थाः' यं मध्यमपरिधिं पश्चिमायां दिशि पर्यदधाः सुरक्षितवानसि, 'पणिभिः' यज्ञविघातकैर्देवशत्रुभिरसुरैः 'गुह्यमानः' संव्रियमाणः, अवरुध्यमानः। 'गुहू संवरणे' (भ्वा० उ० ८९६)। कर्मणि यक् शानच् । 'तम् एतं' मध्यमपरिधिं 'ते' तव 'जोषं' सेवनीयं प्रियम् 'अनुभरामि' अनुहरामि त्वयि प्रक्षिपामि, तुभ्यमेवार्पयामीति भावः। 'व्यवहिताश्च' (पा० १. ४. ८२) इति व्यवहितयोरप्युपसर्गक्रियावचनयोरेकवाक्यत्वम् । 'हृग्रहोर्भश्छन्दसि' (पा० वा० ३. १. ८४) इति हरतेर्हकारस्य भकारः। 'एषः' मध्यमपरिधिः 'त्वत्' त्वत्तः सकाशात् 'नेत्' 'इदिति' निपात एवार्थः, नैव 'अपचेतयातै' अपगन्तुं जानीयात् । 'चिती संज्ञाने' (भ्वा० प० ३९) णिजन्ताद् 'उपसंवादाशङ्कयोश्च' (पा० ३. ४. ८) इति सूत्रेण आशङ्कायां लेटि प्रथमपुरुषैकवचने तादेशे 'लेटोऽडाटौ' (पा० ३. ४. ९४) इत्याडागमे गुणेऽयादेशे 'टित आत्मनेपदानां टेरे' (पा० ३. ४. ७९) इति टेरेत्वे अपचेतयाते इति स्थिते 'वैतोऽन्यत्र' (पा० ३. ४. ९६) इत्यैकारादेशे रूपम्। नाप्ययं परिधिस्त्वत्त उपरतः स्यान्नाप्यस्मान् विमनस्कान् करोत्विति त्याशयः।

इतरौ दक्षिणोत्तरौ परिधी युगपदग्नौ प्रहरति—अग्नेरिति।[२] 'अग्नेः' अग्निसम्बन्धि 'प्रियम्' इष्टं 'पाथः' अन्नम्, पाथ इत्यन्ननाम। पातीति पाथ इति व्युत्पत्त्या पाधातोः 'अन्ने च' (उ० सू० ४. १०५) इति सूत्रेणासुन् प्रत्यये थुडागमे च साधुः। हे दक्षिणोत्तरौ परिधी ! युवाम् 'अपीतम्' अपिगच्छतम्। अग्निभोज्यत्वं स्वीकुरुतमिति।

आत्मयाजिपक्षभाष्यम्

'अग्ने' ब्रह्माग्ने 'देव' ज्योतिःस्वरूप ! 'पणिभिः' कामाद्यसुरैः 'गुह्यमानः' संव्रियमाणः संरुध्यमानः सन् त्वं 'यं' 'परिधिं' जीवाख्यं पश्चिमदिशि 'पर्यधत्थाः' असुरोपद्रवनिवारणाय परिहितवानसि स्थापितवानसि 'ते' तव 'जोषं' प्रियं 'तम् एतं' परिधिम् 'अनुभरामि' त्वयि प्रक्षिपामि, तवांशरूपं जानामि। अनुर्भिन्नक्रमः। हे ब्रह्मज्योतिः पराख्पे शक्ते ! 'एषः' परिधिः जीवः 'त्वत्' त्वत्तः सकाशात् 'नेत्' नैव 'अपचेतयातै' त्वत्तोऽपगन्तुं मा जानातु, त्वय्येव तिष्ठतु ! हे दक्षिणोत्तरौ परिधी नरनारायणौ युवाम् 'अपि' 'अग्नेः' ब्रह्माग्नेः 'प्रियं' 'पाथः' अन्नम् 'अपीतम्' अपिगच्छतम्। समाधौ ब्रह्माग्नेरन्नत्वं भवद्भ्यां प्राप्यतामित्यर्थ इति।

सात्वतपक्षभाष्यम्

इन्द्रमुखान्नरकस्य वरुणच्छत्रादितिकुण्डलहरणादिकुकृत्यजातं श्रुत्वा मनसि हन्तव्यत्वेन सङ्कल्पितं पुरोऽवस्थितमेव मत्वा क्रोधारुणनयनः श्रीकृष्णो ब्रूते—यमिति। 'अग्ने' दैत्याग्रणीः 'देव'

१. परिधीननुप्रहरति 'यं परिधिम्' इति प्रथमम्। (का० श्रौ० सू० ३. ६. १६)

२. इतरौ च युगपद् 'अग्नेः प्रियम्' इति। (का० श्रौ० सू० ३. ६. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजिगीषो 'दिवु क्रीडाविजिगीषा०' (दि० प० ११०७) इत्यतः कर्तर्यच्प्रत्ययः। मुरप्रोत्साहित नरकासुर ! 'यं' स्वप्राग्ज्योतिषपुरस्य 'परिधिं' परितः सर्वत आच्छादकं रक्षणार्थं गिरिदुर्गशस्त्रदुर्गजलाग्निवायुलक्षणं घोरसुदृढमुरपाशदशसहस्रञ्च 'परि अधत्थाः' परितो हितवान् सर्वतो धारितवानसि। 'ते' तव 'तं' पूर्वोक्तम्, 'एतं' गिरिदुर्गादिलक्षणं 'जोषम्' नगररक्षकत्वात् प्रियं, प्रीतिकरम् 'अनुभरामि' अनुक्रमेण हरामि, गदादिप्रबलायुधैर्विनाशयामि। 'हृञ् हरणे' (भ्वा० उ० ८९९), हकारस्य भकारश्छान्दसः। तदुक्तं भागवते (१०. ५९. ३-४)—

'गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम्।
मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतम्॥
गदया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि सायकैः।
चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना॥'

कीदृशस्त्वम्, 'पणिभिः' मुरप्रमुखैरसुरैः 'गुह्यमानः' संव्रियमाणः। कीदृशैः पणिभिः ? 'एषः' अयं गिरिदुर्गादिलक्षणः परिधिः 'त्वत्' त्वत्तः त्वदीयात् प्राग्ज्योतिषनगरात् 'अप' अपेतः, शत्रुप्रयासेन विध्वंसितः 'नेत्' नैव स्यात्, कदापि न भवेत्। एवं 'चेतयातै' चेतयतां भवान् बुध्यताम्, निश्चिनोत्विति वदद्भिः।

मुरेण सह नरकं सम्बोध्य उभौ युवाम् ! 'अग्नेः' 'प्रियं' प्रेमास्पदं 'पाथः' अन्तरिक्षं (निघ० ४. ३. ३०)। 'पथे गतौ' (भ्वा० प० ८४७), 'पथि गतौ' (चु० १५७६) वा, तस्मादसुनि सिद्धम्। पथ्यते पन्थ्यते वा गम्यते पक्ष्यादिभिरिति पाथोऽन्तरिक्षम्। पाथःशब्दो अन्नार्थकोऽपि व्याख्यातः (निरु० ८. १७)। अन्तरिक्षं हि मुमुक्षुभिः सादरं पथ्यते गम्यते प्राप्यते। अग्निज्वालानामूर्ध्वंगतेरन्तरिक्षेऽग्निप्रियत्वोपचारः। युवां मृतौ सन्तौ, अग्निभोज्यौ भवतम्। अपि वा शरीरं परित्यज्यान्तरिक्षं 'अपीतम्' अपिगतम्, अपगतप्राणौ स्यातमिति भावः। भवतोर्वधो मद्धस्तात् त्वरितं भवत्विति तात्पर्यम्।

सꣳस्रवभागाः स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः। इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वꣳ स्वाहा वाट्॥ १८॥

संस्रवहोमः।

देवयाजिपक्षभाष्यम्

अष्टादश्यां कण्डिकायां द्वौ मन्त्रौ।[1] 'संस्रवभागा' इत्यादिः संस्रवहोमार्थः। अस्य

१. मन्त्रद्वयं महीधरस्य मिश्रभार्गवयोश्चानुरोधेन दर्शितम्। वस्तुतः शतपथब्राह्मणकात्यायनश्रौतसूत्रयोः सातवलेकरसम्पादितायाः यजुःसंहितायाश्च अनुरोधेन नः एक एव मन्त्रः प्रतिभाति। अत एव विश्यां कण्डिकायां 'स्वाहा वाट्' इति पृथङ् मन्त्रः केनापि न स्वीकृतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोमशुष्म ऋषिस्त्रिष्टुप् छन्दो विश्वेदेवा देवताः। 'स्वाहा वाट्' इति द्वितीयो जुहोत्यर्थः। अस्य सोमशुष्म ऋषिर्यजुश्छन्दो विश्वेदेवा देवताः (श० ब्रा० १. ८. ३. २५, का० श्रौ० ३. ६. १७)।

अध्वर्युर्जुहूपभृतावादायोत्तरत उपविष्ट उभयसंलग्नं संस्रवाख्यमाज्यं ताभ्यामेव स्रुग्भ्यां जुहोति—संस्रवभागा इति।[1] हे विश्वेदेवाः ! यूयं 'संस्रवभागाः' स्रवणशीलं विलीनमाज्यं संस्रवः, संस्रवो भागो येषां तथाभूताः 'स्थ' भवथ। 'इषा' संस्रवस्वरूपेणान्नेन 'बृहन्तः' महान्तः स्थ। ये यूयं 'प्रस्तरेष्ठाः' प्रस्तरे तिष्ठन्तीति प्रस्तरेष्ठाः प्रस्तरस्थायिनः। 'सुपि स्थः' (पा० ३. २. ४) इति तिष्ठतेः कः प्रत्ययः। 'परिधेयाः' परिधिभिः परिधातव्याश्च 'देवाः' विश्वेदेवाः स्थेति शेषः। ते यूयं 'विश्वे' सर्वे देवाः 'इमां' मामकीं 'वाचं' स्तुतिम् 'अभिगृणन्तः' सर्वत्र देवेषु कीर्तयन्तः, अयमेव यजमानो नः साधु यजतीति मां प्रशंसन्तः 'अस्मिन्' क्रियमाणे 'बर्हिषि' बर्हिरुपलक्षिते यज्ञे 'आसद्य' स्थित्वा 'मादयध्वं' तृप्यध्वं प्रसीदतेति। 'स्वाहा' इदं मदीयं समर्पितं घृतं सुहुतमस्तु, 'वाट्' स्वाहेति वाडिति च शब्दौ हविर्दानार्थावेव तथाप्यादरार्थं पुनः प्रयोगः। महता आदरेणेदं भवद्भ्यः समर्पयामः। यद्यपि स्वाहाकारेण वा वषट्कारेण वा जुहोतीति श्रुतेः स्वाहावषट्कारशब्दावेव देवेभ्यो हविषः सम्प्रदाने प्रसिद्धौ, तथापि 'परोक्षकामा हि देवाः' (श० ब्रा० ६. १. १. १) इति श्रुतेर्देवानां परोक्षप्रियत्वप्रतिपादनार्थं 'वाट्' इति शब्दः प्रयुक्तो वषट्कारस्थाने इति।

आत्मयाजिपक्षभाष्यम्

'विश्वेदेवाः' हे परानरनारायणाः ! यूयं 'संस्रवभागाः' सम्यक् स्रवन्ति आत्मनि गच्छन्ति तानीन्द्रियाणि भागो येषां ते 'इषा' प्राणरूपेणान्नेन 'अन्नं हि प्राणाः' (श० ब्रा० २. २. १. ६), 'बृहन्तः' महान्तो ब्रह्माण्डरूपाः 'प्रस्तरेष्ठाः' यजमाने प्रतिष्ठिताः, 'यजमानो वै प्रस्तरः' (श० ब्रा० १. ८. १. ४४), 'च' 'परिधेयाः' ज्ञानयज्ञे ब्रह्माग्नेः परिधिरूपाः 'स्थ' 'अस्मिन् बर्हिषि' हार्दाकाशे, 'अयं लोको बर्हिः' (श० ब्रा० १. ४. १. २४) 'आसद्य' उपविश्य 'इमां' 'वाचं' 'स्वाहा' महावाक्येन 'वाट्' हविर्दत्तम् 'अभिगृणन्तः' कथयन्तः 'मादयध्वम्' मोदध्वं तृप्यध्वं वेति।

सात्वतपक्षभाष्यम्

नरके निहते भगवान् देवान् स्वाशीराशिना योजयति–संस्रवेति। 'विश्वे देवाः' सर्वे सुराः यूयं 'संस्रवभागाः' संस्रवो विलीनमाज्यं भागो येषां तादृशाः 'स्थ' भवथ, यज्ञविघातकासुरवधेन निःशङ्का मखेषु हवींषि भुञ्जीध्वमिति भावः। अपिच यथेष्टं 'इषा' हविर्लक्षणान्नभोजनेन

१. स्रुचौ प्रगृह्णाति 'संस्रवभागाः' इति संस्रवाञ्जुहोति। (का० श्रौ० सू० ३. ६. १७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'बृहन्तः' पुष्टाः । अपि वा 'इषा' गत्या अप्रतिहतगमनेन स्वातन्त्र्येण 'बृहन्तः' महान्तः, लब्धहर्षातिरेकाः 'प्रस्तरेष्ठाः' प्रकृष्टं स्तरम् आच्छादनं, संरक्षणं, सैनिका हि सेनापतिं परिवृत्य समाच्छाद्य परित्रायन्ते, तस्मादाच्छादनं त्राणोपलक्षकम् । तत्र प्रस्तरे संरक्षणे स्थिता अतिसंरक्षिता मद्भुजबलपालिताः 'परिधेयाः' सर्वतः पोषणीयाः, चकारः समुच्चये 'स्थ' इति पूर्वेणान्वयः । किञ्च 'इमां' निहतो नरकः, सम्प्रत्यकुतोभया भवन्त इत्येवंरूपां वाचं मदीयां वाणीम् 'अभिगृणन्तः' स्तुवानाः, साधु साध्विति ब्रुवाणाः । 'बर्हिषि' आस्तिकैर्यथाविध्यनुष्ठीयमाने यज्ञे 'आसद्य' आगत्य 'मादयध्वं' मोदध्वम् । अपि वा 'बर्हिषि' अन्तरिक्षे गगने विमानैः 'आसद्य' आगत्य 'मादयध्वं' विजयसूचकपुष्पवृष्टिदुन्दुभिवादनादिना प्रसीदत । 'वाट्' शब्दो वषट्शब्दसमानार्थकः । स्वाहावाट्शब्दौ द्वावपि देवदेयहविर्वचनौ । पुनरुक्तिरादरार्था । यजमाना भवद्भ्यः सादरं श्रद्धापुरस्सरं सर्वथा हवींषि प्रयच्छन्त्विति भावः ।

घृताची स्थो धुर्यौ पातं सुम्ने स्थः सुम्ने मा धत्तम् । यज्ञ नमश्च त उप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्व ॥ १९ ॥

१. अनसो धुरि स्रुक्-स्थापनम्, २. वेद्यालम्भनम् ।

देवयाजिपक्षभाष्यम्

एकोनविंश्यां कण्डिकायां द्वौ मन्त्रौ । 'घृताची' इति मन्त्रोऽनसो धुरि स्रुक्स्थापनः । अस्य परमेष्ठी प्राजापत्य ऋषिः, प्राजापत्याऽनुष्टुप् छन्दः (मिश्रमते अनुष्टुप् छन्दः), स्रुचौ देवते । 'यज्ञ नमश्च' इति मन्त्रो वेद्यालम्भनः । अस्य शूर्पं, यवमान्, कृषिरुद्दालवान्, धानान्तर्वानिति पञ्च ऋषयः, यजुश्छन्दः, यज्ञो देवता (श० ब्रा० १. ८. ३. २६-२७, का० श्रौ० ३. ६. १८, २०) ।

अनसो धुरि जुहूपभृतौ स्थापयन्नध्वर्युः पठति—घृताची इति ।[1] हे स्रुचौ ! युवां 'घृताची' घृतमञ्चतो गच्छतः, घृताक्ते इति भावः । घृताच्यौ इति प्राप्ते 'सुपां सुलुक्पूर्वसवर्णा०' (पा० ७. १. ३९) इत्यादिना छन्दसि पूर्वसवर्णे रूपम्, 'स्थः' युवाम् । 'धुर्यौ' धुरं वहत इति विग्रहे 'धुरो यड्ढकौ' (पा० ४. ४. ७७) इति यत्प्रत्ययः । 'यतोऽनावः' (पा० ६. १. २१३) इत्याद्युदात्तश्च । धूर्वाहावनड्वाहौ 'पातं' पालयतम् ।

युवां 'सुम्ने' सुखस्वरूपे । सुम्नमिति सुखनाम (निघ० ३. ६ १६) । सुम्नं सुखमस्ति अनयोरित्यर्थे 'अर्शआदिभ्योऽच्' (पा० ५. २. १२७) इत्यनेन मत्वर्थेऽच्प्रत्ययः । चित्त्वादन्तोदात्तश्च । 'स्थः' भवथः, अतः 'सुम्ने' सुखे 'मा' मां 'धत्तं' स्थापयतम् । ततो वेदिमालभते—

---

१. 'घृताची' इति धुरि निदधात्यनसि चेद् ग्रहणम् । (का० श्रौ० सू० ३. ६. १८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यज्ञेति ।[१] हे यज्ञस्वरूपे वेदे ! 'ते' तुभ्यं 'नमः' नमस्कारः 'च' अस्तु, 'उप' उपचयः 'च' तेऽस्तु । नमश्शब्देन, उपशब्देन क्रमशो यज्ञस्यातिरिक्तमूनं च पूर्णं भवति । तथा च श्रुतिः 'स यदतिरेचयति तन्नमस्कारेण शमयति, अथ यदूनं करोति, उप चेति तेन तदन्यूनं भवति' (श० ब्रा० ११. २. ३. ९) । 'यज्ञस्य' प्रारभ्यमाणस्याध्वरस्य 'शिवे' कल्याणे 'यद् वै यज्ञस्याऽन्यूनातिरिक्तं तच्छिवं तेन तदुभयं शमयति' (श० ब्रा० ११. २. ३. ९) इति श्रुतेः । 'संतिष्ठस्व' समाप्तिं गच्छ । 'मे' मम 'स्विष्टे' शोभने इष्टे यागे 'संतिष्ठस्व' समाप्तिं कुरु इति ।

अस्मिन् स्रुग्व्यूहनाद्यात्मके चतुर्थेऽनुवाके पञ्चसु कण्डिकासु सप्तदश मन्त्राः (पञ्चदश्यां चत्वारः, षोडश्यां सप्त, सप्तदश्यां द्वौ, अष्टादश्यां द्वौ, एकोनविंश्यां द्वौ) यथार्थं व्याख्याताः । तेषु क्रिया इमाः— १. पौर्णमासयागे जुहूव्यूहनम्, २. पौर्णमासयागे उपभृद्व्यूहनम्. ३. दर्शयागे जुहूव्यूहनम्, ४. दर्शयागे उपभृद्व्यूहनम्, ५. मध्यमपरिध्यञ्जनम्, ६. दक्षिणपरिध्यञ्जनम्, ७. उत्तरपरिध्यञ्जनम्, ८. प्रस्तरादानम्, ९. प्रस्तराञ्जनम्, १०. एकतृणं विना प्रस्तरस्याग्नौ प्रक्षेपः, ११. आत्मालम्भनम्, १२. मध्यमपरिध्यनुप्रहरणम्, १३. दक्षिणोत्तरयोर्युगपत्प्रहरणम्, १४. संस्रवहोमः, १५. होमः, १६. अनसो धुरि स्रुक्स्थापनम्, १७. वेद्यालम्भनम् । एवं चतुर्ष्वनुवाकेषु ऊनविंशत्यां कण्डिकासु समुदिता मन्त्रसंख्या अष्टपञ्चाशत् (५८) ।

आत्मयाजिपक्षभाष्यम्

'वागेव जुहूः' (श० ब्रा० ११. ५. ६. ३) । 'मन उपभृत्' (श० ब्रा० ११. ५. ६. ३.) । हे वाङ्मनसे ! युवां 'घृताची' इन्द्रियशक्तिसमूहमञ्चतः प्राप्नुत इति घृताच्यौ 'स्थः' तथाविधे युवां 'धुर्यौ' कर्मज्ञानेन्द्रिये 'पातं' रक्षतम् । किं च युवां 'सुम्ने' आनन्दस्वरूपे 'स्थः' 'मा' मां यजमानं 'सुम्ने' ब्रह्मानन्दे 'धत्तं' स्थापयतम् । 'यज्ञ' हे विष्णो ! 'ते' तुभ्यं 'नमः' 'च' । 'उप' उपासना 'च' । हे चिद्धातो ! 'यज्ञस्य' ज्ञानयज्ञस्य 'शिवे' कल्याणे, सिद्धौ 'संतिष्ठस्व' 'मे' मम 'स्विष्टे' साधु इष्टे, मोक्षे 'संतिष्ठस्व' । अत्र गीतायां (६. ४७) भगवद्वाक्यम्—

'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ।।'

सात्वतपक्षभाष्यम्

भूमिप्रार्थनया तत्पौत्रं नरकासुरसुतं भगदत्तं तत्पितृराज्येऽभिषिच्य सुरेन्द्रभवनमागतः सहेन्द्राण्या सुरेन्द्रेण पूजितश्च, सस्नेहं दत्ततन्मातृकुण्डलः (भाग० १०. ५९. ३८) । तौ (शचीसुरेन्द्रौ) प्रोवाच घृताची इति । हे शचीसुरेन्द्रौ ! युवां 'घृताची' घृतेन प्रकाशेन युक्तौ

१. 'यज्ञ नमश्च ते' इति वेदिमालभते । (का० श्रौ० सू० ३. ६. २०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'स्थः' भवथः, प्रबलस्वसपत्ननिहननात् तद्धेतुकं किंकर्तव्यविमूढतालक्षणं तमो निरस्य स्वानुष्ठेय-कार्यतत्परौ स्यातमिति भावः। घृताच्याविति प्राप्ते स्त्रीत्वं पूर्वसवर्णश्च छान्दसे। अपि वा 'घृताची' इति सप्तमी 'इयाडियाजीकाराणामुपसंख्यानम्' इति वार्तिकेन ङेरीकारः। 'घृताची' कर्तव्यप्रकाशके विवेके 'स्थः' वर्तेथे। किञ्च 'धुर्यौ' धुरं शासनभारं वहन्तौ सावधानं राज्यशासनं कुर्वाणौ 'पातं' प्रजाः पालयतं, 'सुम्ने' सुखे 'स्थः' भवथः। सुखिनौ वर्तेथामिति तात्पर्यम्। सुखे प्रमादमाशङ्क्याह—'सुम्ने' सुखे सति 'मा धत्तं' मा कुरुतम्, प्रमादमिति शेषः, अप्रमत्तौ विषयासक्त्यालस्यादिरूपप्रमादवर्जितौ तिष्ठेतमित्यर्थः। भगवदुक्तौ शचीशक्रौ ब्रुवाते—यज्ञेति। 'यज्ञ' यजनीय विष्णो कृष्ण! 'यज्ञो वै विष्णुः' (श० ब्रा० १. १. ३. १३) इति श्रुतेः, 'नमः' नमस्कारः 'ते' तुभ्यमस्तु। 'उप' आवयोः समीपे तिष्ठेति शेषः। सदा सन्निहितो भव। अन्योन्यसमुच्चयवचनौ चकारौ। अपि च 'यज्ञस्य' देवप्रीत्यर्थं यजमानैरनुष्ठीयमानस्य अग्निष्टोमादेः 'शिवे' कल्याणे विविधोपद्रवनिवारणे 'संतिष्ठस्व' सम्यगुद्युक्तो भव। न केवलमेतावदेव अपितु 'मे' मम 'स्विष्टे' अतिशयेनेप्सिते तत्प्राप्त्यर्थं मत्समीहितप्रदाने 'संतिष्ठस्व' सदा सर्वत्र सर्वथाऽनलसो वर्तस्व।

५. स्रुग्ग्रहानुवाकः

अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्या अविषं नः पितुं कृणु। सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा॥ २०॥

१. स्रुक्स्रुवग्रहणम्, २. अग्निदेवत्यं दक्षिणाग्नौ हवनम्, ३. सरस्वतीदेवत्यं दक्षिणाग्नौ हवनम्।

देवयाजिपक्षभाष्यम्

विंश्यां कण्डिकायां त्रयो मन्त्राः। 'अग्नेऽदब्धायो' इत्यादिः स्रुक्स्रुवग्रहणः। अस्य यजुश्छन्दः, गार्हपत्याग्निर्देवता। 'अग्नये' इत्यादिर्द्वितीयो मन्त्रो दक्षिणाग्नौ हवनार्थः। अस्य याजुषी त्रिष्टुप् छन्दः, दक्षिणाग्निर्देवता। 'सरस्वत्यै' इत्ययमपि दक्षिणाग्नौ हवनार्थः। अस्यापि याजुषी त्रिष्टुप् छन्दः, लिङ्गोक्ता देवता। सर्वेषामृषिः परमेष्ठी प्राजापत्यः (श० ब्रा० १. ६. २. २०, का० श्रौ० ३. ७. १४-१५)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्वर्युर्जुहूं स्रुचं स्रुवं च तूष्णीं सम्परिगृह्य गार्हपत्येऽग्नौ तत्रस्थमाज्यं जुहोति—अग्न इति।[1] 'अदब्धायो' हे अनुपहिंसितयजमान, अदब्धोऽहिंसितः आयुर्मनुष्यो यजमानो यस्य तत्सम्बोधनम्। न दब्धो हिंसितः अदब्धः। 'दम्भ दम्भने' (स्वा० प० १२७०) दम्भो वञ्चनम्। अत्र मन्त्रे दम्भधातुर्हिंसार्थः 'दभ्नोतिर्हिंसाकर्मा' (निघ० २. १९. १), 'आयुरिति मनुष्यनाम' (निघ० २.३. १७)। अथवा 'अदब्धम्' अविनाशि 'आयुः' आयुष्यं यस्यासौ अदब्धायुः अनन्तायुः अग्निः। अत्र पक्षे आयुषोऽर्थे छान्दस आयुशब्दः। 'अशीतम' अतिशयेनाशी, तत्संबुद्धौ, छान्दसे दीर्घे अशीतम। अशी भोक्ता वा सर्वव्यापको वा, 'अश भोजने' (क्र्या० प० १५२४)। यद्वा 'अशू व्याप्तौ' (स्वा० उ० १२६४)। हे अत्यन्तं भोक्तः, व्यापक वा 'अग्ने' गार्हपत्यवह्ने ! 'मा' मां 'दिद्योः' दिद्युत् इति वज्रनाम (निघ० २. २०. १)। दिद्युतः इति वक्तव्येऽन्त्यवर्ण-लोपाद् दिद्योरिति सपत्नप्रयुक्ताद् वज्रसदृशायुधात् 'द्युत दीप्तौ' (भ्वा० आ० ७४१) इत्य-स्माद् वा, 'दो अवखण्डने' (दि० प० ११४८) इत्यस्माद् वा निष्पन्नमिति देवराजयज्वा। 'पाहि' रक्ष, 'प्रसित्यै' प्रसयनं प्रसितिः, 'प्रसितिः प्रसयनात् तन्तुर्वा जालं वा' (निरु० ६. १२) तस्यै। पञ्चम्यर्थे चतुर्थी। तथा च 'प्रसितेः' बन्धनहेतुभूताज्जालात् 'षिञ् बन्धने' (स्वा० उ० १२४८) भावे क्तिन् प्रत्ययः, 'तादौ च निति कृत्यतौ' (पा० ६. २. ५०) इति सूत्रेणा-नन्तरपूर्वस्य गतेरुदात्तत्वम्। 'पाहि' मां गोपाय। 'दुरिष्ट्यै' दुष्टा इष्टिरशास्त्रसम्मतो यागो दुरिष्टिस्तस्याः। पञ्चम्यर्थे चतुर्थी। 'यज देवपूजासंगतिकरणदानेषु' (भ्वा० उ० १००२), यजनम् इष्टिः, भावे क्तिन्। 'वचिस्वपियजादीनां किति' (पा० ६. १, १५) इति सम्प्र-सारणम्। मां 'पाहि' पालय। 'दुरद्मन्यै' अत्रापि पूर्ववत् पञ्चम्यर्थे चतुर्थी। अद्मनी भोजनं, दुष्टा अद्मनी दुरद्मनी दुष्टभोजनम्, तस्याः मां 'पाहि' रक्ष। 'नः' अस्माकं 'पितुम्' अन्नं हविर्वा। पितुरित्यन्ननाम (निघ० २. ७. ६)। 'पा रक्षणे' (अ० प० १०५६) इत्यतो निष्पन्नमिति देवराजयज्वा। 'अविषं' निर्विषम्। अविद्यमानं विषं यस्मिन्निति समासे 'नञ्सु-भ्याम्' (पा० ६. २. २७२) इत्यन्तोदात्तत्वम्। 'कृणु' कुरु। 'कृवि हिंसाकरणयोश्च' (भ्वा० प० ५९८)। 'योनौ' सद्मनि। 'योनिरिति गृहनाम' (निघ० ३. ४. १४)। कीदृश्यां योनौ ? 'सुषदा' सुखोपवेशनयोग्यायाम्। 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा० ३. ३. १२६) इति खल् प्रत्ययः, 'सुपां सुलुक्' (पा० ७. १. ३९) इत्यादिना सूत्रेण विभक्तेः आल् आदेशः। सुरक्षिते सद्मनि समुपविष्टानां नः पूर्वोक्तमस्तु। 'स्वाहा वाट्' स्वाहाकारवषट्कारोच्चारण-पूर्वकं समर्पितं सर्वं सुहुतमस्तु।

ततः सव्येनावृत्त्याध्वर्युराज्यं दक्षिणाग्नौ जुहोति—अग्नये इति।[2] 'संवेशपतये' स्त्री-

---

१. शंय्वन्ते स्रुक्स्रुवं प्रगृह्णाति 'अग्ने अदब्धायो' इति। (का० श्रौ० सू० ३. ७. १४)

२. सव्येनावृत्य दक्षिणाग्नौ जुहोति 'अग्नये' इति। (का० श्रौ० सू० ३. ७. १५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुंसयोः सहावस्थानं संवेशः । संवेशस्य पतिस्तस्मै 'अग्नये' अग्निदेवाय 'स्वाहा' सुहुतमस्तु । एवमेव सरस्वतीदेवत्यमाज्यं दक्षिणाग्नौ जुहोति—सरस्वत्यै इति ।[1] 'यशोभगिन्यै' जीवतो मनुष्यस्य कीर्तिर्यशः, तस्य स्वसा वाग्रूपा यशोभगिनी, तथाभूतायै 'सरस्वत्यै' देव्यै 'स्वाहा' इदमाज्यं सुहुतमस्त्विवति ।

आत्मयाजिपक्षभाष्यम्

'अदब्धायो' अहिंसित यजमान ! 'अशीतम' व्यापकतम ! अश्नुते व्याप्नोतीत्यशी अतिशयेनाशी अशितमस्तत्सम्बुद्धौ । दीर्घश्छान्दसः । 'अग्ने' ब्रह्माग्ने । 'मा' मां यजमानं 'दिद्योः' अज्ञानरूपाद् वज्रात् 'पाहि' रक्ष । हे परशक्ते ! 'प्रसित्यै' संसाररूपजालात् 'पाहि' । हे देवाभिमानिनि देवते ! 'दुरिष्टच्यै' दुष्टा इष्टिः दुरिष्टिः, अशास्त्रीयो यागः, तस्याः मां 'पाहि' । हे धर्मशास्त्राभिमानिनि देवते ! 'दुरद्मन्यै' दुष्टा अद्मनी दुरद्मनी दुर्भोजनं, ततो मां 'पाहि' । 'सुषदा' सुष्ठु सद्यते स्थीयते यस्यां सा सुषदा तस्यां 'योनौ' गृहे हार्दाकाशे 'नः' अस्माकं योगिनां 'पितुं' प्राणरूपान्नम् 'अविषम्' बन्धनविषरहितं 'कृणु' । 'स्वाहा' महावाक्येन 'अग्नये' आत्माग्नये 'वाट्' हविर्दत्तम् । 'संवेशपतये' संवेशो योगस्तस्य पत्ये नारायणाय 'स्वाहा' सुहुतमस्तु । 'यशोभगिन्यै' महावागभिमानिन्यै 'सरस्वत्यै' देव्यै 'स्वाहा' सुहुतमस्तु ।

प्रश्नः—का दुरिष्टिः ? का दुरद्मनी ? का स्विष्टिः ? का स्वद्मनी ? । एतेषामुत्तराणि गीतायां सप्तदशाध्याये भगवद्वाक्यैरवगन्तव्यानि ।

दुरिष्टिः—अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥
दुरद्मनी—कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥
यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥
स्विष्टिः—अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥
स्वद्मनी—आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

१. सरस्वत्यै इति च । (का० श्रौ० सू० ३. ७. १५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

मुनिवर्गेण सहितं स्वसद्मनि समागतं श्रीकृष्णं विदेहराजो बहुलाश्वः श्रुतदेवो भूदेवश्च भक्तिपुरस्सरं प्रार्थयेते—अग्न इति। 'अदब्धायो' दभ्नोतिर्हिंसाकर्मा, अदब्धः अहिंसितः आयुर्मनुष्यो भक्तजनो यस्य सः, अदब्धायुः, तत्सम्बोधने। प्रभुभक्तं जनं न कोऽपि दुर्जनः शक्नोति हन्तुम्। तथा चोक्तं गीतायाम्—

'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति'।

'अग्ने' दैत्यदावदहन! अविद्यातमोविघातक! बोधात्मन्! स्वप्रकाशस्वरूप परमात्मन्! 'अशीतम' भोक्तृतम! परमात्मनश्च भोक्तृत्वं सिध्यति—'यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः' (कठोप० २. २७), 'अत्ता चराचरग्रहणात्' (ब्र० सू० १. २. १०) इति श्रुतिसूत्राभ्याम्। अशीतमेत्यत्र 'अश् भोजने' (क्र्या० प० १५२४) इनि, तमपि, छान्दसं दैर्घ्यम्। यद्वा 'अशीतम' व्यापकतम 'अशू व्याप्तौ' (स्वा० उ० १२६४) 'दिद्योः' दिद्युतः, तकारलोपश्छान्दसः। दिद्युदिति वज्रनाम (निघ० २. २०. १) तत्समाद्, बहुजन्मसञ्चितकर्मोपस्थापितदुःसहपीडापुञ्जात्। 'प्रसित्यै' प्रसितेः बन्धनात् 'दुरिष्टचै' दुरिच्छातः, अत्र चतुर्थ्यस्तिस्रः पञ्चम्यर्थाः, 'पाहि' इत्यनेन सम्बध्यन्ते। 'दुरद्मन्या' अदनमद्मनी, दुष्टा अद्मनी दुरद्मनी, ततः पाहि इत्यन्वयः। तदेव स्पष्टयति 'पितुम्' अन्नम् 'अविषं' दोषलक्षणविषरहितं 'नः' अस्माकं 'कृणु' कुरु। अस्माकं बुद्धिरन्नदोषेण दुष्टा मा भूदिति भावः। 'सुषदा' सुषदायां 'योनौ' स्थाने, सुखेन निवासयोग्ये गृहे 'स्वाहा' सुष्ठु आ समन्ताद् हा गतिः, 'ओहाङ् गतौ' (जु० आ० १०८६) ततो बाहुलकाद् भावे विच्। वयं स्वगृहे ससुखं निवसेम इति भावः। 'वाट्' वहनं गार्हस्थ्यनिर्वाहश्च सुतरां स्यात्। अथवा स्वाहावाट्शब्दौ व्याख्यातपूर्वौ देवेभ्यो वयं सादरं हवींषि प्रदद्म इत्यभिप्रायकौ। 'संवेशपतये' संवेशो जीवात्मनः परमात्मनि सम्यक् प्रवेशो मोक्षः। तत्पतये तत्पालकाय तत्प्रदायकाय 'अग्नये' अविद्यादाहकजगद्गुरवे भवते 'स्वाहा' आ समन्तात् सु आह प्रत्ययार्थाविवक्षया सुष्ठु वचनं, मधुरवाचा वयं भवतः स्वागतं विदध्मः 'यशोभगिन्यै' 'यशः' कीर्तिः 'भगः' ऐश्वर्यं तदुभययुक्तायै 'सरस्वत्यै' विश्वहितार्थं ब्रह्माऽऽदित्यादिमुखेन दत्तायै वेदवाचे 'स्वाहा' स्वागतवचनम्। त्वां जगद्गुरुं त्वया दत्तां वेदवाचञ्च सादरं वयं सत्कुर्याम इति भावः।

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः। देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देव यज्ञँ स्वाहा वाते धाः॥ २१॥

१. पत्न्या वेदस्य विमोचनम्, २. समिष्टयजुर्होमः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

एकविंश्यां कण्डिकायां द्वौ मन्त्रौ। 'वेदोऽसि' इत्यादिः पत्न्या वेदस्य विमोचने विनियुक्तः। अस्य परमेष्ठी प्राजापत्य ऋषिः, याजुषी छन्दः, वेदो देवता। 'देवा गातुविदः' इत्यादिः समिष्टयजुर्होमार्थः। अस्य मनसस्पतिः ऋषिः, त्रिपदा विराट् छन्दः, वातो देवता (श० ब्रा० १. ९. २. २१-२८; का० श्रौ० ३. ८. २-४)।

यजमानपत्नी वेदं (कुशमुष्टिनिर्मितं पदार्थं) विमुञ्चति—वेदोऽसीति।[१] 'देव' द्योतनात्मक 'वेद' कुशमुष्टिनिर्मित पदार्थ! त्वं 'वेदः' वेदिता 'विद ज्ञाने' (अ० प० १०६४)। वेत्तीति कर्तरि पचादित्वात् (पा० ३. १. १३४) अच्प्रत्ययः। चित्त्वादन्तोदात्तश्च। 'असि'। 'येन' यादृशेन साधनेन त्वं 'देवेभ्यः' षष्ठ्यर्थे चतुर्थी। देवानां 'वेदः' वेदिता 'अभवः' अविद्यथाः 'तेन' तादृशेनैवाभ्युपायेन 'मह्यं' षष्ठ्यर्थे चतुर्थी, ममापि 'वेदः' ज्ञापकः 'भूयाः' भवेः। यद्वाऽत्र सर्वत्र विन्दतिः प्रयोक्तव्यः। 'देव वेद' त्वं 'वेदः' यज्ञसिद्धेर्लम्भकः, 'विद्लृ लाभे' (तु० उ० १४३२) 'असि'। 'येन' प्रकारेण 'देवेभ्यः' देवानामर्थाय 'वेदः' हविषो लम्भकः 'अभवः' भवसि 'तेन' प्रकारेण 'मह्यं' मदर्थमपि 'वेदः' यज्ञफलस्य स्वर्गादेः प्रापकः भूया इति।

तदनन्तरमध्वर्युर्जुह्वां ध्रौवं (ध्रुवाख्यायां स्रुचि निहितम्) आज्यमादाय जुह्वा वातोद्देशेन समिष्टयजुःसंज्ञकं होममाहवनीये जुहोति।[२] समिष्टदेवतोद्देशेन जायमानो होमः समिष्टयजुर्होमः। इह वातोद्देशेन होमः। 'या वा एतेन यज्ञेन देवता ह्वयति याभ्य एव यज्ञस्तायते, सर्वा वै तत् ताः समिष्टा भवन्ति। तद् यत्तासु सर्वासु समिष्टास्वथैतज्जुहोति, तस्मात् समिष्टयजुर्नाम' (श० ब्रा० १. ९. २. २६)। 'गातुविदः' हे यज्ञज्ञाः, गीयते प्रतिपाद्यतेऽनेकप्रकारकैर्वेदमन्त्रैरिति गातुर्यज्ञः। 'गै शब्दे' (भ्वा० प० ९१७) गातुं यज्ञं विदन्ति जानन्तीति गातुविदः 'देवाः' 'गातुं' यज्ञं 'वित्त्वा' ज्ञात्वा, छान्दस इडागमाभावः। अस्मदर्थं यजमानेन यज्ञः प्रवर्तित इति ज्ञात्वा 'गातुं' यज्ञम् 'इत' आगच्छत। यद्वा गातुः गन्तव्यो यज्ञमार्गः, तं विदित्वा यथास्थानं सन्तुष्टा मदर्पितेन हविषा प्रतिगच्छत।

देवान् प्रार्थ्य मनसस्पतिं प्रार्थयते—मनसस्पत इति। 'मनसस्पते' मनसस्पतिश्चन्द्रः। अथवा देवेज्यायां मनसः प्रेरकः ईश्वर एव मनसस्पतिस्तत्सम्बुद्धौ। सत्कार्येषु मनःप्रवर्तक परमेश्वर! 'देव' 'इमम्' अनुष्ठितं 'यज्ञं' 'स्वाहा' शुभफलावाप्त्यर्थं तुभ्यमर्पयामि। त्वमिमं यज्ञं 'वाते' वायौ 'धाः' निधेहि। वाते हि यज्ञावस्थानं श्रुत्योक्तम् 'वायुरेवाग्निस्तस्माद्यदैवाध्वर्युरुत्तमं कर्म करोत्यथैतमेवाप्येति' इति।

---

१. पत्नी वेदं प्रमुञ्चति 'वेदोऽसि' इति। (का० श्रौ० सू० ३. ८. २)

२. ध्रौवं समिष्टयजुर्जुहोति 'देवा गातुविद' इति। (का० श्रौ० सू० ३. ८. ४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

'देव वेद' द्योतनात्मक शब्दब्रह्म वा महावाग् वा । त्वं 'वेदः' ऋगाद्यात्मकः, यद्वा वेत्तीति वेदः ज्ञाता 'असि' त्वं 'येन' 'देवेभ्यः' इन्द्रियेभ्यः 'वेदः' ज्ञापकः 'अभवः' अभूः 'तेन' कारणेन 'मह्यं' 'वेदः' ज्ञापकः 'भूयाः' । 'गातुविदः' हे ज्ञानयज्ञस्य वेत्तारः ! गीयते नानाविधवैदिक-शब्दैः प्रतिपाद्यत इति गातुर्यज्ञस्तं विदन्ति जानन्तीति गातुविदः 'देवाः' परानरनारायणाः 'गातुं' यज्ञं 'वित्त्वा' विदित्वा ज्ञात्वा इडभावश्छान्दसः । 'गातुं' ज्ञानयज्ञम् 'इत' प्रत्यागच्छत प्रादुर्भवत, 'मनसस्पते' हे जितेन्द्रिय ! 'देव' देवभावं प्राप्त योगिन् ! 'इमं' 'देवयज्ञं' देवस्य यजनं येन तत् जीवरूपं हविः 'स्वाहा' महावाक्येन 'वाते' विष्णौ 'वातो वै यज्ञः' (श० ब्रा० ३. १. ३. २६) 'प्रजापतिर्यज्ञः' (श० ब्रा० १. १. १. १३) 'यज्ञो वै विष्णुः' (श० ब्रा० १. १. २. १३) 'धाः' स्थापयेति ।

सात्वतपक्षभाष्यम्

राजसूययागानुष्ठानानन्तरं कुरुवृद्धादीननुज्ञाप्यातिघोराणि निमित्तानि (भाग० १०. ७७. ७) अवलोक्य द्वारवतीं यास्यन्तं भगवन्तं कृष्णं युधिष्ठिर उवाच । अपि वा भगवत्पित्रा वसु-देवेनाधिकुरुक्षेत्रं विविधानग्निहोत्रादीन् यागाननुष्ठाप्य लक्ष्मीपतेः कृष्णस्यानुमत्या (भाग० १०. ८४. ५६) स्वाश्रमान् प्रति निवर्तमानो मुनिगणः, पृथा वा पुत्रवधूसुताभ्यां सहिता (भाग० १. ८. १७) युधिष्ठिरं राज्येऽभिषिच्य निजपुरीं द्वारवतीं प्रतिष्ठमानं भगवन्तं प्रति ब्रूते—वेदोऽसि इति ।

'देव' परमेश्वर ! दिव्यशक्तिसम्पन्न श्रीकृष्ण ! 'त्वं' 'वेदः' ऋगादिलक्षणवेदमूर्तिः 'असि' वर्तसे 'ऋक् साम यजुरेव च' इति (गीता ९. १७) वचनात् । अतः 'वेद' वेदमूर्ते भगवन् ! 'येन' यतः 'देवेभ्यः' षष्ठ्यर्थे पञ्चमी, देवानां ब्रह्मसूर्येन्द्रादीनां 'वेदः' ज्ञापकः शिक्षकः उपदेष्टा 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वेताश्व० ६. १८), 'इमं विवस्वते योगम्' (गीता ४. १), 'मया तेऽकारि मघवन्' (भाग० १०. २७. १५) इति श्रुतिस्मृति-पुराणेभ्यः 'अभवः' अभूः । 'तेन' ततो हेतोः 'मह्यं' मम 'वेदः' ज्ञापकः उपदेष्टा मार्गदर्शकः 'भूयाः' भव । युधिष्ठिराभ्यर्थितः कृष्ण उपदिशति 'देवाः' देवांशत्वाद् यूयं पाण्डवाः 'गातुविदः' गीयते अधीयते विधिवत् स गातुर्वेदः, तद्विदः वेदज्ञास्तस्माद् 'गातुं' गम्यत इति गातुर्मार्गस्तं 'वित्त्वा' ज्ञात्वा, अवगत्य 'गातुं' मार्गम् 'इत' गच्छत । वेदोपदिष्टवर्त्मना वर्तितव्यमिति भावः । 'कुर्वन्नेवेह कर्माणि' (शु० यजु० ४०. २) इति वेदोपदिष्टनिष्कामकर्मयोगं मनसि निधाय युधिष्ठिरो ब्रूते—'इमं' 'यज्ञं' भवत्सहकारेण यथाविध्यनुष्ठितं राजसूयं 'स्वाहा' भवते ददामि । त्वञ्च मया श्रद्धापुरस्सरं समर्पितं यज्ञं 'वाते' वाति वाजयति गमयति प्रेरयतीति वातस्तस्मिन्, सर्वान्तर्यामिनैजपरमेश्वरस्वरूपे 'धाः' धेहि स्थापय । छान्दसो लुङ् अडागमा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावश्च । वातशब्दः परमेश्वरवाची 'उत वात पिताऽसि नः' (ऋ० १०. १८६. २) इत्यादौ तथा दर्शनात् ।

ऋषिगणपक्षे—अत्रागतानामस्माकं भूयान् कालः संवृत्तः सम्प्रति गन्तुमनुमन्यतामित्युक्तः कृष्ण आह—भवद्भिर्निजागमनेन पुण्यभाजनतां नीता वयं, भवतां करुणया मम तातपादानां विविधो यागः समाप्तिमगान्निर्विघ्नम् । अधुना यथेच्छं 'देवाः' स्वात्मानन्दसाक्षात्कारेण मोदमानाश्चिरमरण्यवासाद् 'गातुविदः' वनमार्गस्य वेत्तारः दिङ्मोहादिभ्रान्तिवर्जिताः सावधानाः 'गातुं' मार्गं 'वित्त्वा' सम्यङ् निश्चित्य 'गातुं' स्वाश्रममार्गम् 'इत' गच्छत । यथागतं तथा साधुना मार्गेण प्रस्थातव्यमित्यर्थः । एतेन मार्गे काचिद् बाधा मा भूदिति व्यज्यते । भगवत्तातो वसुदेवः परमात्मानं प्रार्थयते—'मनसस्पते' सर्वान्तर्यामिन् 'देव' प्रभो 'इमं' यज्ञं मया अनुष्ठितं 'स्वाहा' तुभ्यं ददे । त्वञ्च 'वाते' स्वस्मिन् स्वप्रीत्यर्थं 'धाः' धेहि, स्थापय । नाहं किञ्चित्कामये, कर्मणाऽनेन परमेश्वरो भवान् प्रीयतामित्यर्थः ।

पृथापक्षः—प्रथमपक्षान्न विशिष्यते, केवलं वक्तृभेदः । प्रथमे युधिष्ठिरो द्वितीये प्रथा तन्माता वक्ति ।

सं बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः । समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहा ।। २२ ।।

बर्हिर्होमः ।

देवयाजिपक्षभाष्यम्

अस्यां द्वाविंश्यां कण्डिकायां 'सं बर्हिः' इत्येक एव मन्त्रो बर्हिर्होमार्थः । अस्य परमेष्ठी प्राजापत्य ऋषिः, विराड्रूपा त्रिष्टुप् छन्दो बर्हिर्देवता (श० ब्रा० १. ९. २. २९-३१; का० श्रौ० ३. ८. ५) ।

वेद्यां स्तृतं सर्वं बर्हिरादाय जुह्वां निधायाहवनीये जुहोति—संबर्हिरिति ।[१] अग्रे मन्त्रे 'समिन्द्रो विश्वदेवेभिरङ्क्ताम्' इत्यत्र कर्तृत्वेनोपात्त 'इन्द्रः' इति शब्द इहापि सम्बध्यते । इन्द्रः 'बर्हिः' दर्भमिमं 'हविषा' हवीरूपेण 'घृतेन' आज्येन 'समङ्क्ताम्' सम्यग् घृताक्तं करोतु । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु० उ० १४५८) । इन्द्रो न केवलः 'आदित्यैः' आदित्याख्यदेवैरुपेतः 'सं' समङ्क्ताम्, 'वसुभिः' वस्वाख्यदेवैः 'मरुद्भिः' चोपेतः 'सं' समङ्क्ताम् । 'विश्वदेवेभिः' तदाख्यैर्गणदेवैः सहितः 'इन्द्रः' 'समङ्क्ताम्' । 'दिव्यं' दिवि भवं दिवि स्थितं

१. बर्हिः 'संबर्हिः' इति । (का० श्रौ० सू० ३. ८. ५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'नभः' आदित्यलक्षणं ज्योतिः, नभ इत्यादित्यनाम (निघ० १. ४. ६), 'गच्छतु' प्राप्नोतु। तद् बर्हिः 'यत्' देवोद्देश्यकं तत् 'स्वाहा' सुहुतमस्तु इति।

आत्मयाजिपक्षभाष्यम्

'इन्द्रः' यजमानः 'इन्द्रो वै यजमानः' (श० ब्रा० ५. २. ५. ७)। 'यत् बर्हिः' मानसं कमलम्। 'अयं लोको बर्हिः' (श० ब्रा० १. ४. १. २४)। 'घृतेन' इन्द्रियशक्तिरूपेण 'हविषा' 'समङ्क्ताम्'। 'वसुभिः' अपराविकारैर्देहान्तर्गतात्मांशुभिः 'सं' समङ्क्ताम्। 'मरुद्भिः' प्राणैः 'सं' समङ्क्ताम् 'विश्वदेवेभिः' परानरनारायणैः 'समङ्क्ताम्' तद् बर्हिः, मानसं कमलं मानस-सूर्यं इत्यर्थः। 'दिव्यं' दिवि प्रादुर्भूतं 'नभः' आदित्यलक्षणं ज्योतिः 'गच्छतु' 'स्वाहा' सुहुतमस्तु इति।

सात्वतपक्षभाष्यम्

न केवलं मुनीन् बन्धूंश्च, किंतर्हि यज्ञे अधिकुरुक्षेत्रं समागतान् देवानपि भगवान् गन्तु-मनुमन्यते—संबर्हिरिति। 'हविषा' 'घृतेन' घृतादिलक्षणेन हूयमानद्रव्येण। 'बर्हिः' वर्धमानः पावकः 'बर्हिः पुंसि हुताशने' इत्यमरकोशव्याख्या (१. १. ५४)। 'समङ्क्तां' सम्यग् गच्छतु, 'अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु' (रु० प० १४५९)। न केवलं स एव अपितु 'आदित्यैः' आदित्यैः द्वादशभिः सह समङ्क्तामिति सम्बन्धः। 'वसुभिः' अष्टभिः 'मरुद्भिः' एकोनपञ्चाशता 'सं' समङ्क्तामिति सम्बन्धः। वसुमरुन्मध्ये पठितः सम्शब्द उभयान्वितः। तथा 'इन्द्रः' देवराजः 'विश्वदेवेभिः' विश्वाख्यैः गणदेवैः सह समङ्क्ताम्। समुपसर्गस्यावृत्त्या क्रियापदमावर्तनीयम्। किञ्च 'स्वाहा' सुहुतं द्रव्यं 'यत्' 'दिव्यं नभः' नाकं तद् गच्छतु, अग्न्यादि-देवप्रसादाद् यज्ञाहुतिः स्वर्गं प्राप्य सोमात्मना परिणमतु इत्यर्थः। बर्हिः शब्दः 'बृहि वृद्धौ' (भ्वा० प० ७३६) धातोः 'बृंहेर्नलोपश्च' इत्युणादिसूत्रेण (२. १०९) इसिप्रत्यये साधुः। 'बृहू उद्यमने' (तु० प० १३४८), तस्मात् इसिः बाहुलकात् वकारस्य वकारः। मतान्तरेण धातुरेवायं पवर्गीयादिर्वेति।

कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति। पोषाय रक्षसां भागोऽसि ॥ २३ ॥

१. प्रणीतानिनयनम्, २. उत्करे कणप्रक्षेपः।

देवयाजिपक्षभाष्यम्

त्रयोविंश्यां कण्डिकायां द्वौ मन्त्रौ। 'कस्त्वा' इत्यादिः वेद्यां प्रणीतानिनयनः। अस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याजुषी गायत्री छन्दः, प्रजापतिर्देवता। 'रक्षसां भागोऽसि' इत्युत्करे कणप्रक्षेपणार्थः। छन्द उक्तम्। रक्षो देवता। ऋषिः परमेष्ठी प्राजापत्यो द्वयोः समः (श० ब्रा० १. ९. २. ३२-३३; का० श्रौ० ३. ८. ६-७)।

प्रागयं मन्त्रः प्रथमाध्यायस्य षष्ठ्यां कण्डिकायां 'कस्त्वा युनक्ति' इत्येवं यज्ञयोगे विनियुक्तः। इह तु 'कस्त्वा विमुञ्चति' इतिरूपेण यज्ञविमोके इति विशेषः। अविमुक्तो यज्ञो यजमानं न हिंस्यादिति। 'पराङ् उ हाविमुक्त एव यज्ञो यजमानं प्रक्षिणीयात्' (श० ब्रा० १. ९. २. ३२) इति।

अध्वर्युर्वेद्यां प्रणीता अप आनीयाहवनीयं परीत्य वेदेर्दक्षिणभागे उदङ्मुख उपविश्य ताः प्रणीता अपो भूमौ निनयति नीचैः क्षिपति कस्त्वेति।[१] हे प्रणीताधारक पात्र! 'कः' पुरुषः 'त्वा' त्वां 'विमुञ्चति' बहिर्निनयति, इति प्रश्ने 'सः' असौ प्रसिद्धः प्रजापतिः 'त्वा' त्वां 'विमुञ्चति' भूमौ निनयति, इत्युत्तरम्। 'कस्मै' किं प्रयोजनं मनसिकृत्य 'त्वा' त्वां 'विमुञ्चति' निनयति, इति प्रश्ने 'तस्मै' तस्य प्रजापतेः स्वस्य प्रीत्यै 'त्वा' त्वां 'विमुञ्चति' इत्युत्तरम्। 'पोषाय' सपुत्रकलत्रस्य यजमानस्य पुष्टयै समृद्धयै, त्वा निनयामीति शेषः। 'यो वै यज्ञं प्रयुज्य न विमुञ्चति, अप्रतिष्ठानो वै स भवति' इति श्रुतेर्यजमानस्य प्रतिष्ठित्यै प्रणीता विमुञ्चामीति भावः।

ततः फलीकृतान् तण्डुलकणान् पुरोडाशकपाले निधाय, उत्करसमीप एव सव्येन कृष्णाजिनं धारयित्वा, तस्य कृष्णाजिनस्याधस्तात् पुरोडाशकपालेनैव तान् कणानुत्करे क्षिपति—रक्षसाम् इति।[२] हे तण्डुलकणसमूह! त्वं 'रक्षसां' निकृष्टजातीनामसुराणां 'भागः' अंशः 'असि' निकृष्टभागधेयत्वादध उत्करदेश एव तवावस्थितिर्युज्यत इत्याशय इति।

अस्मिन् स्रुग्ग्रहानुवाकाख्ये पञ्चमेऽनुवाके चतसृषु कण्डिकासु अष्ट मन्त्राः (विंश्यां त्रयः, एकविंश्यां द्वौ, द्वाविंश्यामेकः, त्रयोविंश्यां द्वौ) व्याख्याताः। तेषु प्रतिपादिताः क्रिया इमाः— १. स्रुक्स्रुवग्रहणम्, २. अग्निदेवत्यो दक्षिणाग्निहोमः, ३. सरस्वतीदेवत्यो दक्षिणाग्निहोमः, ४. वेदविमोकः, ५. समिष्टयजुर्होमः, ६. बर्हिर्होमः, ७. प्रणीतानिनयनम्, ८. उत्करे कणप्रक्षेपः। पञ्चस्वनुवाकेषु त्रयोविंशत्यां कण्डिकासु समुदिता मन्त्रसंख्या षट्षष्टिः (६६)।

आत्मयाजिपक्षभाष्यम्

हे आत्मप्रतिबिम्ब! 'शिरो ह वा एतद्यज्ञस्य यत् प्रणीताः' (श० ब्रा० ११. २. ६. १), 'यजमानो यज्ञः' (श० ब्रा० १३. २. २. १), 'त्वा' त्वां 'कः विमुञ्चति' 'सः' योगारूढः 'त्वा विमुञ्चति'। 'कस्मै' प्रयोजनाय 'त्वा' त्वां 'विमुञ्चति' 'तस्मै' 'पोषाय' पूर्णब्रह्मप्राप्तये 'त्वा विमुञ्चति'। हे इन्द्रियसमूह! त्वं 'रक्षसां' देहाभिमानिनां 'भागः असि' इति।

---

१. वेद्यां प्रणीता निनयति परीत्य 'कस्त्वा' इति। (का० श्रौ० सू० ३. ८. ६)

२. पुरोडाशकपालेन कणानपास्यत्यधः कृष्णाजिनं 'रक्षसाम्' इति। (का० श्रौ० सू० ३. ८. ७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

कृष्णार्जनसंवादात्मकः कर्मयोग एव मोक्षहेतुरित्यभिप्रायकोऽयं मन्त्रः। कृष्णः पृच्छति अर्जुन! 'कः' संन्यासः कर्मयोगो वा 'त्वा' त्वां 'विमुञ्चति' परस्सहस्रक्लेशाक्रान्तात् संसृतिबन्धनात् मुक्तं करोति, इति किं त्वं जानासि? अहं निर्णेतुमक्षमस्त्वमेव ब्रूहि, इत्यर्जुनेन कथितः स्वयं समाधत्ते भगवान्—'सः' प्रसिद्धः 'न कर्म लिप्यते नरे' (शु० य० ४०. २) इत्यादिवेदवाक्येषु प्रतिपादितः कर्मयोगः, निष्कामकर्मानुष्ठानं 'त्वा' त्वां 'विमुञ्चति' मोचयितुं क्षमते। स हि स्वान्तशुद्धयादिद्वारा तत्त्वदर्शनमुत्पाद्य स्वात्मसच्चिदानन्दघनपरब्रह्मणि सदावस्थानलक्षणं मोक्षं प्रयच्छति। 'कस्मै' प्रयोजनाय इति प्रश्नस्य उत्तरं 'तस्मै' 'न स पुनरावर्तते' 'यद् गत्वा न निवर्तन्ते तद् धाम परमं मम' (गीता १५. ६) 'अनावृत्तिः शब्दाद् अनावृत्तिः शब्दात्' (ब्र० सू० ४. ४. २२) इति श्रुतिस्मृतिसूत्रोक्तापुनरावृत्तिलक्षणप्रयोजनाय, प्रेत्यभावापरनामधेयाय जनिमृतिपरम्परालक्षणसंसृतेर्विनाशाय। तदेव स्पष्टयति 'पोषाय' कर्मयोगस्तत्त्वदर्शनोत्पादनेन नित्यनिरतिशयस्वात्मानन्दस्याखण्डत्वाय, अखण्डैकरसस्वात्मानन्दानुभवाय, अतः सततं स मुमुक्षुभिरुपादेयः। सकामस्तु कर्मकलापः 'रक्षसां' दुर्जनानां भगवत्प्राप्तिसाधनविमुखानां विषयप्रवणचेतसां पुंसां, भोगैकसर्वस्वानां प्राणिनां 'भागः' भजनीयः 'असि' अस्ति, वर्तते। छान्दसः पुरुषव्यत्ययः। अथवा वचोभङ्ग्या भोगं सम्बोध्य वक्ति—हे भोग! विषयासक्तिहेतो! त्वं 'रक्षसां' स्वार्थं परपीडकानां मनुष्याणां 'भागः' भजनीयः समाश्रयणीयः 'असि' वर्तसे, तदुक्तं योगभाष्ये—'नानुपहत्य भूतानि भोगः सम्भवति' इति।

६. याजमानानुवाकः

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सँ शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ २४ ॥

पूर्णपात्रनिनयनम्।

देवयाजिपक्षभाष्यम्

चतुर्विंश्यां कण्डिकायां 'सं वर्चसा' इत्यादिरेक एव मन्त्रः पूर्णपात्रनिनयनः। अस्य परमेष्ठी प्राजापत्य ऋषिः, त्रिष्टुप् छन्दः, त्वष्टा देवता (श० ब्रा० १. ९. ३. ३-६; का० श्रौ० ३. ८. ८)। अध्वर्युः पूर्णपात्रं गृहीत्वाऽऽहवनीयं प्रदक्षिणीकृत्योदङ्मुख उपविष्टो यजमानस्याञ्जलौ पूर्णपात्रस्थितमुदकं धारया निनयति। यजमानश्च तदञ्जलिना प्रतिगृह्य मन्त्रं पठति—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सवर्चसेति ।[1] 'वर्चसा' ब्रह्मवर्चसेन 'पयसा' गोदुग्धादिरसेन 'तनूभिः' यज्ञानुष्ठानप्रवृत्तैः शरीरावयवैः अथवा स्वतनूपलक्षितभार्यापुत्रादिभिर्वयं 'समगन्महि' समयुञ्ज्महि, संयुक्ता अभूम। 'व्यवहिताश्च' (पा० १. ४. ८२) इति व्यवहितस्यापि समः क्रियया योगः। समगंस्महि इति प्रयोक्तव्ये समगन्महि इति छान्दसं रूपम्। किं च 'शिवेन' शन्तमेन श्रद्धान्वितेन 'मनसा' चित्तेन वयं 'सम्' समगन्महीति। अनेन गृहीतेन पूर्णपात्रोदकेन यज्ञं प्रारब्धवतो यजमानस्य ममायासेन चिन्तया वा नष्टं वर्चआदिकं पुनराप्यायतामिति भावः।

गृहीतेनोदकेन मुखं विमार्ष्टि—'सुदत्रः' शोभनदानः, दानं दत्रम्। 'डुदाञ् दाने' (जु० उ० १०९१) भावे 'सर्वधातुभ्यः ष्ट्रन्' (उ० सू० ४. १५९) इति ष्ट्रन् प्रत्ययो धातोः ह्रस्वत्वं च। नित्त्वादाद्युदात्तो दत्रशब्दः। 'आद्युदात्तं द्व्यच् छन्दसि' (पा० ६. २. ११९) इत्यनेन बहुव्रीहिसमासेऽपि सोरुत्तरमाद्युदात्तत्वश्रुतिः। 'त्वष्टा' तदाख्यो देवः 'रायः' वित्तानि 'विदधातु' करोतु, ददात्वित्याशयः। 'तन्वः' शरीरस्य 'यत्' 'विलिष्टं' विश्लिष्टं न्यूनमित्यर्थः। तत् 'अनुमार्ष्टु' शोधयतु। समर्धयत्वित्यर्थः। त्वष्टा देवो देवानां सम्वन्धिनो न्यूनाधिकान् पदार्थान् निर्मिमीते। स एवात्र देवकर्मणि प्रवृत्तस्य मम यजमानस्य सर्वां न्यूनतां मर्षयित्वा समृद्धं मां करोत्वित्याशय इति।

आत्मयाजिपक्षभाष्यम्

आत्मप्रतिबिम्बोऽभिनिवेशत्यागपूर्वकं प्रार्थयते—'वर्चसा' ब्रह्मवर्चसेन वयं 'समगन्महि' संगता भवामः 'पयसा' प्राणेन 'पयः प्राणः' (श० ब्रा० १२. ८. १. २०) 'सं' समगन्महि 'तनूभिः' इन्द्रियैः 'सं' समगन्महि 'शिवेन' शान्तेन 'मनसा' 'सं' समगन्महि। किं च 'सुदत्रः' सु विष्णुः, उः शिवः, दः ब्रह्मा तेषां त्राता रक्षकः सुदत्रो महानारायणः 'रायः' योगलक्ष्मीः 'विदधातु' 'तन्वः' मदीयस्य शरीरस्य 'यत्' 'विलिष्टं' विशेषेण न्यूनमङ्गं योगानुष्ठानाक्षमं, तत् 'त्वष्टा' ईश्वरः 'अनुमार्ष्टु' न्यूनत्वपरिहारेणानुकूलं कृत्वा शोधयतु।

सात्वतपक्षभाष्यम्

व्रजवासिनः सखायो गोपबालाः, अन्ये वा दावानलपानकालियदमनतद्विषदूपितजलपानमृतप्राणिजीवनादिभिः सञ्जातभगवत्प्रत्ययाः प्रार्थयन्ते। भगवन्! वयं सर्वे 'वर्चसा' तेजसा 'समगन्महि' संगताः स्याम। अग्रेऽपि एवमेव। 'पयसा' अन्नेन उदकेन वा, पय इति अन्ननाम (निघ० २. ७. ३) पयः प्यायतेः (भ्वा० आ० ४८८) पोषणात्, पोषकमन्नम्। उदकनामापि (निघ० १. १२. ३७) पयः पिबतेः 'पा पाने' (भ्वा० प० ९२५) तद्धि

१. पूर्णपात्रं निनयति परीत्य सन्ततं यजमानोऽञ्जलिना प्रतिगृह्णाति 'संवर्चसा' इति। (का० श्रौ० सू० ३. ८. ८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पिपासुभिः पीयते 'तनूभिः' शरीरैः, बहुवचनं साकल्यसूचकम्। अथवा शरीरावयवहस्तपादाद्यवयवानां बहुत्वाद् बहुवचनम्। 'अवयवे अवयविनः प्रयोग उपचारात्' 'शिवेन' शान्तेन कल्याणकरेण 'मनसा' 'सं' सम्यग् अगन्महि। 'त्वष्टा' तूर्णमश्नुते सर्वत्र सर्वव्यापको भवान् 'सुदत्रः' शोभनं ददाति इति तथाभूतः अतिशयेन वदान्यः। सुपूर्वाद् ददातेः 'सर्वधातुभ्यः ष्ट्रन्' (उ० सू० ४. १५९) इति ष्ट्रन् प्रत्ययः, बाहुलकाद् धातोराकारस्य ह्रस्वः। 'रायः' धनानि 'विदधातु' करोतु ददात्विति यावत्। किञ्च 'तन्वः' तनोः शरीरस्य 'यद्विलिष्टं' न्यूनं 'लिश् अल्पीभावे' (दि० अ० ११७९) अथवा 'विलिष्टं' विगतं विनष्टं,'लिश् गतौ' (तु० प०१४२२) 'अनुमार्ष्टु' आनुकूल्येन शोधयतु। न्यूनतापरिहारेण साकल्यं सम्पादयतु। विनष्टस्य स्थाने वाऽभिनवं समानयतु। अयं मन्त्रः चान्द्रभाष्ये रञ्जितजलादिना मूर्तिनिर्माणपरतया व्याख्यातः। तद्भाष्यं मदीयकृतौ श्रौतमुनिचरितामृते समुद्धृतं तत एवावसेयम्।

दिवि विष्णुर्व्यक्रँस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रँस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रँस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः सं ज्योतिषाभूम ॥ २५ ॥

१–३. विष्णुक्रमाः, ४. यजमानस्य स्वभागावेक्षणम्, ५. वेदिभूम्यवेक्षणम्, ६. प्राच्यां दिशि प्रेक्षणम्, ७. आहवनीयप्रेक्षणम्।

देवयाजिपक्षभाष्यम्

अस्यां पञ्चविंश्यां कण्डिकायां सप्त मन्त्राः। 'दिवि विष्णुः' इत्यादिः, 'अन्तरिक्षे विष्णुः' इत्यादिः, 'पृथिव्यां विष्णुः' इत्यादिश्चेति त्रयो मन्त्रा विष्णुक्रमाख्याः। अत्र प्रथमस्य याजुषी, द्वयोरन्ययोश्च याजुषी गायत्री छन्दः, त्रयाणां विष्णुर्देवता। 'अस्मादन्नात्' इति चतुर्थो मन्त्रो यजमानस्य स्वभागावेक्षणः। अस्य दैवी बृहती छन्दः, भागो देवता। 'अस्यै प्रतिष्ठायै' इति पञ्चमो वेदिभूमीक्षणः। अस्य याजुषी गायत्री छन्दः, भूमिर्देवता। 'अगन्म स्वः' इति षष्ठः प्राग्दिक्प्रेक्षणः। अस्य दैवी बृहती छन्दः, देवा देवताः। 'सं ज्योतिषाभूम' इति सप्तमो मन्त्र आहवनीयप्रेक्षणः। अस्य याजुषी गायत्री छन्दः, आहवनीयो देवता। सप्तानां मन्त्राणां ऋषिः परमेष्ठी प्राजापत्यः (श० ब्रा० १. ९. ३. ८–१४, का० श्रौ० ३. ८. १०–१४)।

विष्णुपादबुद्धया भूमौ स्वपादेन क्रमणं विष्णुक्रमः। यजमानः स्वासनादुत्थाय दक्षिणवेदिश्रोणेरारभ्याऽऽहवनीयाग्निपर्यन्तमेकैकमन्त्रेण विष्णुबुद्धया क्रमते। अथवा पूर्वं 'पृथिव्याम्'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति मन्त्रेण पृथिव्याम्, 'अन्तरिक्षे' इत्यनेनान्तरिक्षे, 'दिवि' इत्यनेन च दिवि क्रमते—दिवीति ।[1] 'दिवि' द्युलोके 'विष्णुः' मदीययज्ञस्वरूपो विष्णुः 'जागतेन छन्दसा' जगतीच्छन्दःस्वरूपेण स्वीयेन पादेन 'व्यक्रंस्त' विशेषेण क्रान्तवान् । 'क्रमु पादविक्षेपे' (भ्वा० प० ४७३) 'वेः पादविहरणे' (पा० १. ३. ४१) इत्यनेन विपूर्वकादात्मनेपदत्वे लुङि प्रथमपुरुषैकवचने रूपम् । तेन विक्रमणेनासौ शत्रुः 'निर्भक्तः' भागरहितः कृतः, द्युलोकान्निष्कासितः 'योऽस्मान्द्वेष्टि' य आक्रान्ता शत्रुः 'यं च वयं द्विष्मः' यश्चाऽऽक्रम्यः शत्रुः । अर्थात् योऽस्मान् हिनस्ति, अस्मान् दृष्ट्वा न प्रीयते वा, यं च वयं हिंस्मः, यं दृष्ट्वा वयं न प्रीयामहे वा, द्विविधोऽपि शत्रुः द्युलोकान्निर्भक्त इति । एवं विष्णुपादबुद्धया द्वितीयेन पादक्रमेणान्तरिक्षस्थमुभयविधं शत्रुं निस्सारयति—'अन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छन्दसा' इति । त्रिष्टुप्छन्दस्को हि विष्णोरन्तरिक्षचारी क्रमस्तेन 'निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' । एवं तृतीयेन मन्त्रेण 'विष्णुः' यज्ञपुरुषः 'गायत्रेण छन्दसा' गायत्रीच्छन्दस्केन 'पृथिव्यां' पृथिवीलोके 'व्यक्रंस्त' तत्र विद्यमानः 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' उभयविधः शत्रुः 'निर्भक्तः' निःसारितः ।

अनन्तरं यजमान उत्थायैव स्वकीयं भागं पश्यन् पठति—अस्मादन्नादिति ।[2] 'अस्मात्' सुरक्षितात् 'अन्नात्' मम यजमानस्य भागात् 'निर्भक्तः' इत्याद्यंश आवर्त्य प्रसक्तेन मन्त्रेण, अग्रिमेण 'अस्यै प्रतिष्ठायै' इत्यनेन मन्त्रेण[3] च सम्बद्धव्यः । एवं च 'अस्मादन्नाद् निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' इति, 'अस्यै प्रतिष्ठायै निर्भक्तः' इत्यादि च मन्त्रद्वयस्वरूपमवगन्तव्यम् । 'अस्यै प्रतिष्ठायै' इति मन्त्रेण भूमिमवेक्षते । पञ्चम्यर्थे उभयत्र चतुर्थी । 'अस्याः' दृश्यमानायाः 'प्रतिष्ठायाः' प्रतितिष्ठन्त्यत्रेति प्रतिष्ठा स्थितिसम्पादिका भूमिस्तस्या यज्ञभूमेरपि मया द्विविधः शत्रुर्निर्भक्त इति तत्त्वार्थः ।

प्राच्यां दिश्युदितं सूर्यं पश्यन् यजमानः स्वीयं स्वर्लोकगमनं भावयन्नाह—अगन्मेति ।[4] 'अगन्म' अगमाम इति वक्तव्ये छान्दसं रूपम् । प्राप्तवन्तः । 'स्वः' स्वर्लोकम्, अनेन यज्ञानुष्ठानेनेति । अथवा 'स्वर्' इत्यव्ययमनेकार्थम् 'यज्ञो वै स्वरहर्देवाः सूर्यः' (श० ब्रा० १. १. २. २१) इति श्रुतेः । अगन्म 'स्वः' सूर्यं, यज्ञं, देवान् वा । सर्वेषां तादात्म्यं वयं लब्धवन्तः । तत आहवनीयमग्निं प्रेक्षमाणो वदति—सं ज्योतिषेति ।[5] 'ज्योतिषा' अनेन पुरःस्थितेन ज्योतिषाऽऽहवनीयाग्निलक्षणेन 'समभूम' संगताः एकीभावमापन्ना इति ।

१. विष्णुक्रमान्क्रमते 'दिवि विष्णुरि'ति प्रतिमन्त्रं 'पृथिव्या'मितीत ऊर्ध्वो वा । (का० श्रौ० सू० ३. ८. १०)
२. 'अस्मादन्नात्' इति भागमवेक्षते । (का० श्रौ० सू० ३. ८. ११)
३. 'अस्यै प्रतिष्ठाया' इति भूमिम् । (का० श्रौ० सू० ३. ८. १२)
४. 'अगन्म स्वः' इति प्राङ् । (का० श्रौ० सू० ३. ८. १३)
५. 'सं ज्योतिषा' इत्याहवनीयम् । (का० श्रौ० सू० ३. ८. १४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

योगिन इन्द्रियाणि प्रार्थयन्ते—'विष्णुः' योगारूढो योगी, 'एतद् वै देवा विष्णुर्भूत्वेमाँल्लोकानक्रमन्त तथैवैतद् यजमानो विष्णुर्भूत्वेमाँल्लोकान् क्रमते' (श० ब्रा० ६. ७. २. १०)। 'जागतेन छन्दसा' अपानेन 'योऽयम् अवाङ् प्राण एष जगती' (श० ब्रा० १०. ३. १. १)। 'दिवि' भृकुटचां 'व्यक्रंस्त' विशेषेण क्रमणं कृतवान् तथा सति 'यः' कामः 'अस्मान् द्वेष्टि, च वयं यं द्विष्मः' 'ततः' भृकुटचाः (निर्भक्तः) भागरहितः कृत्वा निःसारितः। 'विष्णुः' आत्मा। 'योऽयमग्निरुखायामेतमेव तद्देवा आत्मानं कृत्वेमाँल्लोकानक्रमन्त' (श० ब्रा० ६. ७. २. ११), 'त्रैष्टुभेन छन्दसा' उदानेन, 'य एवायं प्रजननः प्राण एष त्रिष्टुप्' (श० ब्रा० १०. ३. १. १)। 'अन्तरिक्षे' हार्दान्तरिक्षे 'व्यक्रंस्त'। तथा सति 'यः' कामः 'अस्मान् द्वेष्टि, च वयं यं द्विष्मः' 'ततः' हार्दान्तरिक्षात् 'निर्भक्तः'। 'विष्णुः' योगी 'गायत्रेण छन्दसा' प्राणेन, 'प्राणो गायत्री' (१०. ३. १. १)। 'पृथिव्यां' मानसकमले 'व्यक्रंस्त'। तथा सति 'यः' कामः 'अस्मान् द्वेष्टि, च वयं यं द्विष्मः' 'ततः' मानसकमलात् 'निर्भक्तः'। हे मोक्षाभिमानिनि देवते ! वयम् 'अस्मात् अन्नात्' विराड्रूपदेहात् 'अन्नं वै विराट्' (श० ब्रा० १२. २. ४. ५)। 'अस्यै प्रतिष्ठायै' योगभूमेः 'स्वः' आदित्यलक्षणं ज्योतिः 'अगन्म'। 'ज्योतिषा' ब्रह्मज्योतिषा 'समभूम' सङ्गता अभूमेति।

सात्वतपक्षभाष्यम्

त्रिपदमितभूमियाचनमुखेन विश्वरूपमास्थाय हृतसर्वस्वं वलिं दैत्यराजं ससैन्यं सुतललोके प्रेषयामास भगवान् वामनः। ततः सपत्नवर्जितं वलिहृतपूर्वं स्वर्गराज्यं देवाः पुनः समासाद्य हृष्टचेतसः सिद्धं नः समीहितमिति व्याहरन्ति—दिवि विष्णुरिति। 'विष्णुः' व्यापकः परमात्मा धृतवामनविग्रहः 'दिवि' द्युलोके 'व्यक्रंस्त' विक्रमेण चरणन्यासेन द्युलोकं मितवान् 'जागतेन' जगद्धितकरेण 'छन्दसा' अभिप्रायेण। तथा सति 'ततः' तस्माद् द्युलोकात् 'निर्भक्तः' भागरहितः कृतः, बहिर्निष्कासितः। कः 'यः' दैत्यराजो वलिः दैत्यप्रेरणया 'अस्मान् द्वेष्टि' अस्मासु देवेषु न प्रीयते। 'यं च' दैत्यराजं 'वयं द्विष्मः' वयं देवा न प्रीयामहे। अन्योऽन्यद्वेषोक्तिः पारस्परिकद्वेषातिरेकसूचनाय। स सपत्नो भगवत्प्रसादाद् दूरे गमितः किमप्यनिष्टं कर्तुं न प्रभवेदिति भावः। एवमुत्तरत्रापि 'अन्तरिक्षे' द्यावापृथिव्योरन्तरालप्रदेशे 'त्रैष्टुभेन' त्रींल्लोकान् स्तोभते प्रतिवध्नाति 'ष्टुभु स्तम्भे' (भ्वा० आ० ३९४) स्तभ्नाति इति वा, त्रिष्टुभ् त्रिलोकीधारकः तद्व्यवस्थापकः सर्वशक्तिमान् परमेश्वरः। तस्येदं त्रैष्टुभं तेन। छन्दसा अभिलाषेण, त्रिलोकीपतेः परमेश्वरस्येच्छयेत्यर्थः। 'पृथिव्यां' भुवि 'गायत्रेण' गायत्री वेदमाता, उपलक्षणं वेदस्यापि, तत्सम्बन्धेन वेदस्य वेदमातुश्च उपदेशविषयेण 'छन्दसा' आकाङ्क्षया, वेदप्रतिपादितधर्मब्रह्मोपदेशेच्छया। एतेन त्रिलोक्यां शत्रुनिरास उक्तः। सम्प्रति बलिहृतं स्वर्गराज्यमस्माभिः पुनर्लब्धमित्याहुः—'अस्मात्' पुरोवर्तमानात् सर्वेषां दृष्टिपथमवतीर्णात् 'अन्नात्'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूलोकात् पृथिव्याः, अन्नशब्दः, पृथिवीवचनः, 'ता अन्नमसृजन्त' (छान्दो० ६. ४) इति श्रुतेः। ता आपः अन्नं पृथिवीमसृजन्त उदपादयन् इति च तदर्थः। तस्यैव विवरणम् 'अस्यै प्रतिष्ठायाः' चतुर्थी पञ्चम्यर्थे, अस्याः प्रतिष्ठायाः वसुन्धरायाः। प्रतितिष्ठन्ति निवसन्ति प्राणिनो यत्र सा प्रतिष्ठा। प्रतिपूर्वात् स्थाधातोः अधिकरणे 'आतश्चोपसर्गे' (पा० ३. ३. १०६) इति सूत्राद् अङ्। तत उपरि वर्तमानं 'स्वः' स्वर्गम् 'अगन्म' प्राप्तवन्तः, हृतं दैत्यैः स्वर्गराज्यं पुनर्लब्धवन्त इति भावः। अपि च 'ज्योतिषा' तेजसा सपत्नाभिभवजनितेन 'सं' सङ्गताः 'अभूम' संवृत्ताः।

अपि वा 'अस्मात्' स्वामित्वेन सर्वप्रपञ्चस्य भोक्तुः प्रभुरूपात् 'अन्नात्' भक्तवशंवदतया भक्तैर्भोग्यात्—

सदा मुक्तोऽपि बद्धोऽस्मि भक्तेषु प्रेमरज्जुभिः।
अजितोऽपि जितोऽहं तैरवशोऽपि वशीकृतः॥

इति वचनात्। 'अस्यै प्रतिष्ठायाः' इमां प्रतिष्ठां निःसपत्नस्वर्गराज्यप्राप्तिहेतुकां कीर्तिम् अगन्म इति सम्बन्धः। किञ्च 'स्वः' स्वर्गे 'ज्योतिषा' ज्ञानेन 'सं' सङ्गता 'अभूम' जाताः। भुक्तिमुक्ति-द्वयमस्माभिर्लब्धमिति भावः। कथैषा भागवते (८. १५-२३) स्फुटमुपवर्णिता।

स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि।
सूर्यस्यावृतमन्वावर्ते ॥ २६ ॥

१. सूर्यप्रेक्षणम्, २. सूर्यप्रार्थना, ३. सूर्यप्रदक्षिणम्।

देवयाजिपक्षभाष्यम्

षड्विंश्यां कण्डिकायां त्रयो मन्त्राः। 'स्वयंभूः' इत्यादिः सूर्यप्रेक्षणः। अस्य याजुषी छन्दः, सूर्यो देवता। 'वर्चोदाः' इत्यादिः सूर्यप्रार्थनः। छन्दोदेवते उक्ते। 'सूर्यस्य' इत्यादिः सूर्यप्रदक्षिणः। अस्य याजुषी बृहती छन्दः, सूर्यो देवता। परमेष्ठी प्राजापत्य ऋषिः समः (श० ब्रा० १. ९. ३. १५-१७; का० श्रौ० ३. ८. १५-१७)।

यजमानः सूर्यं प्रेक्षते—स्वयंभूरिति।[1] हे सूर्य! त्वं 'स्वयंभूः' स्वयंप्रादुर्भूतः स्वयंप्रकाशः। स्वयं सहायं विना भवति, उदेति, दीप्यते वा स्वयंभूः 'भुवः संज्ञान्तरयोः' (पा० ३. २. १७९) इति क्विप्, 'असि'। 'श्रेष्ठो रश्मिः' सूर्यस्य सप्त रश्मयः। चतसृषु दिक्षु चत्वारः, अधस्तादुपरिष्टा-च्चैकैकः। सप्तमो रश्मिर्मण्डलाभिमानी हिरण्यगर्भसंज्ञकः स श्रेष्ठः स त्वमसि। 'अथ यत् परं भाः प्रजापतिर्वा स स्वर्गो वा लोकः' (श० ब्रा० १. ९. ३. १०) इति श्रुतेः यथाकामी प्रेष्ठं वस्तु सूर्यं याचते—वर्चोदा इति।[2] हे सूर्य! त्वं 'वर्चोदाः' ब्रह्मवर्चसप्रदः। वर्चो ददातीति

१. 'स्वयंभूः' इति सूर्यम्। (का० श्रौ० सू० ३. ८. १५)
२. 'वर्चोदाः' इति यं वा कामं कामयते। (का० श्रौ० सू० ३. ८. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विच् प्रत्ययः। 'असि'। 'वर्चः' ब्रह्मवर्चसं 'मे' मह्यं 'देहि'। यं वा कामं कामयते तं 'वर्चोदाः' इति मन्त्रे ऊहेत। पुत्रकाम्यायां 'पुत्रदाः' इति पठेत्। अथ सवितारं प्रदक्षिणमावर्तते—सूर्यस्येति।[1] 'सूर्यस्य' भगवतः 'आवृतम्' आवर्तनम् आवृत्। 'वृतु वर्तने' (भ्वा० प० ७५८)। भावे क्विप् प्रत्ययः। भगवतो भास्करस्य क्रमणम् 'अनु' अनुसृत्य 'आवर्ते' प्रदक्षिणं गच्छामीति।

आत्मयाजिपक्षभाष्यम्

सगुणोपासनाया ऋते योगसिद्धिर्दुर्लभेत्याह—हे सूर्यान्तर्गतमार्गाख्यज्योतिःस्वरूप! नारायण! त्वं 'स्वयंभूः' अद्वैतः सन्नाश्रयाद् ऋते स्वयंप्रादुर्भवनशीलः 'असि'। 'श्रेष्ठः' अन्ये विद्याऽविद्याभ्यां विशिष्टाः, त्वं तु तद्विलक्षणस्तस्माच्छ्रेष्ठः 'रश्मिः' केवलं ज्योतिःस्वरूपः। 'वर्चोदाः' अन्ये ब्रह्मवर्चसदा न सन्ति प्रकृतिसम्बन्धात्, त्वं तु ब्रह्मवर्चसस्य दाता 'असि'। 'मे' मह्यं 'वर्चः' ब्रह्मवर्चसं 'देहि'। 'सूर्यस्य' नारायणावतारस्य 'आवृतं' पुनः पुनरभ्यस्तम् उदयास्तकर्म 'अनु' अनुसृत्य, अहमपि 'आवर्ते' समाध्युत्थानकर्मणी करोमीति।

सात्वतपक्षभाष्यम्

स्वहितैषिणं देवाः प्रशंसन्ति—स्वयंभूरिति। 'स्वयंभूः' स्वतः, कस्यचित् प्रेरणां विनैव भक्ताभीष्टं भावयति साधयति इति स्वयंभूः, भक्तसमीहितसाधने स्वतः प्रवर्तमानः 'असि' वर्तसे 'श्रेष्ठः' प्रशस्यतमः सर्वोत्तमः 'रश्मिः' नियामकः, व्यवस्थापकः, यथायथं स्वकार्यप्रवर्तकः। रश्मिशब्दः 'अश्नोतेरश्च' (उ० सू० ४. ४६) इति उणादिसूत्रेण अश्नोतेर्मिप्रत्यये रशादेशे च साधुः। अश्नुते सर्वं स रश्मिः सर्वव्यापकः। अथवा रश्मिशब्दो रज्जुवचनः, तद्वन्नियमन-हेतुत्वात्। विश्वनियन्तारमाचष्टे लक्षणया–वर्चोदा इति। 'वर्चोदाः' 'वर्चसः' ब्रह्मवर्चसस्य तेजसो वा 'दाः' दाताऽसि। अतः 'मे' मह्यं 'वर्चः' 'देहि' तत् प्रयच्छ। 'सूर्यस्य' सततलोकसेवानिर-तस्य भास्करस्य 'आवृतं' मार्गं पन्थानम् 'अनु' अनुसृत्य अहम् 'आवर्ते' सूर्यवत् सदा लोकसेवाव्रते तिष्ठेयमिति भावः। आह च ऋङ्मन्त्रः—

'स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसोरिव।'

(ऋ० ५. ५१. १५)

अग्ने गृहपते सुगृहपतिस्त्वयाऽग्नेऽहं गृहपतिना भूयासँ सुगृहपतिस्त्वं मयाऽग्ने गृहपतिना भूयाः। अस्थूरि णौ गार्हपत्यानि सन्तु शतँ हिमाः सूर्यस्या-वृतमन्वावर्ते ॥ २७ ॥

१. गार्हपत्याग्निप्रेक्षणम्, २. सूर्यप्रदक्षिणम्।

१. 'सूर्यस्य' इत्यावर्तते प्रदक्षिणम्। (का० श्रौ० सू० ३. ८. १७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

सप्तविंश्यां कण्डिकायां द्वौ मन्त्रौ। 'अग्ने गृहपते' इत्यादिर्गार्हपत्याग्निप्रेक्षणः। अस्य ब्राह्मी बृहती छन्दः, गार्हपत्योऽग्निर्देवता। 'सूर्यस्य' इत्यादिः सूर्यप्रदक्षिणः। अस्य याजुषी बृहती छन्दः, सूर्यो देवता। परमेष्ठी प्राजापत्य ऋषिः समः (श० ब्रा० १. ९. ३. १९-२०; का० श्रौ० ३. ८. १९-२०)।

यजमानो गार्हपत्यमग्निमुपतिष्ठते—अग्न इति।[1] 'गृहपते' हे गृहस्य पालक! 'ग्रह उपादाने' (क्र्या० उ० १५३३)। इत्यतः 'गेहे कः' (पा० ३. १. १४४) इति कर्तरि कः प्रत्ययः सम्प्रसारणं च। गृह्णाति धान्यादिकं तद् गृहम्। गृहस्य सद्मनः पतिरिति षष्ठीसमासः। 'अग्ने' 'अहं' यजमानः 'त्वया' त्वत्सदृशेन 'गृहपतिना' गृहस्य पालयित्रा 'पत्यावैश्वर्ये' (पा० ६. २. १८) इति पूर्वपदस्य प्रकृतेर्गृहशब्दस्यान्तोदात्तत्वम्। 'सुगृहपतिः' शोभनगृहपतियुक्तः। शोभनो गृहपतिर्यस्येति बहुव्रीहिसमासे 'नञ्सुभ्याम्' (पा० ६. २. १७२) इत्यन्तोदात्तत्वम्। 'भूयासं' भवेयम्। 'अग्ने' गार्हपत्याग्ने! 'त्वं' 'मया' मादृशेन श्रद्धालुना 'गृहपतिना' गृहपालकेन गृहस्थेन 'सुगृहपतिः' शोभनगृहपतिकः 'भूयाः' भवेः। एवं प्रकारेण 'नौ' आवयोर्द्वयोर्गृहपत्योः 'गार्हपत्यानि' गृहपतिसम्बद्धानि कर्माणि, 'गृहपतिना संयुक्ते ञ्यः' (पा० ४. ४. ९०) इत्यनेन ञ्यः प्रत्ययः। ञित्त्वाद् आद्युदात्तत्वं च। 'शतं हिमाः' शतं समाः, शतं वर्षाणि। 'कालाध्वनोरत्यन्तसंयोगे' (पा० २. ३. ५) इति सूत्रेण द्वितीया। 'अस्थूरि' लुप्तोपममेतत्। यथोभयधुर्योपेतं शकटमप्रतिहतं गच्छति, तथाऽस्माकं गार्हपत्यानि कर्माण्यप्रतिहतानि चलन्तु। एकपार्श्वेन बलीवर्देन युक्तं शकटं तिष्ठत्येव, न चलति, तस्मात् स्थूरि न स्थूरि अस्थूरि। एवं समासे अत्रान्तोदात्तत्वं न सिध्यति। अत एव तैत्तिरीयशाखायामाद्युदात्तस्यैवोपलब्धिः। तस्मात् अविद्यमानं स्थूरि यस्मिन् यथा स्यात्तथेति बहुव्रीहिसमासे क्रियाविशेषणं पदं बोध्यम्। एवं सति च 'नञ्सुभ्याम्' (पा० ६. २. १७२) इत्यन्तोदात्तत्वं सिध्यति। 'सन्तु' अप्रतिहतानि प्रचलन्तु। अत्र मन्त्रे 'अग्ने गृहपते सुगृहपतिस्त्वयाग्ने' इत्यत्राग्ने इत्यस्यावृत्तिरादरार्था।

गार्हपत्यमुपास्य यजमानः सूर्यप्रदक्षिणं करोति—सूर्यस्येति।[2] 'सूर्यस्य' सर्वप्रेरकस्य भगवतः सवितुः 'आवृतम्' आवृत्तिम् उदयास्तानुवृत्तिम् 'अनु' अनुसृत्य अहमपि प्रदक्षिणमावर्तनं करोमीति।

आत्मयाजिपक्षभाष्यम्

'गृहपते' देहस्य पते! 'अग्ने' अन्तर्यामिन्! 'त्वं मया' जीवेन 'गृहपतिना सुगृहपतिर्भूयाः' यस्माज्जीवेन हीश्वरस्य देहपतित्वं सम्भवति। 'अग्ने' हे परमात्मन्! 'नौ' आवयोः 'गार्ह-

---

१. गार्हपत्यमुपतिष्ठते 'अग्ने गृहपते' इति 'शतं हिमा' इति ब्रूयाद्वा। (का० श्रौ० सू० ३. ८. १९)

२. 'सूर्यस्य' इत्यावर्तते प्रदक्षिणम्। (का० श्रौ० सू० ३. ८. २०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्यानि' गृहपतिसाध्यानि योगकर्माणि 'शतं हिमाः' शतं वर्षाणि 'अस्थूरि' अः विष्णुः, स् ब्रह्मा, थ् पराशक्तिः, उः शिवः, र् ब्रह्माग्निः, तैः इः कामः काम्यस्तानि काम्यानि। विभक्तिलोपश्छान्दसः 'सन्तु' यस्मात् पञ्चैवोपासनाः पञ्चैव देवाः जीवस्याश्रयाः सन्ति। अहं 'सूर्यस्य' ब्रह्मावतारस्य 'आवृतं' पुनः पुनरभ्यस्ते उदयास्तकर्मणी 'अनु' अनुसृत्य 'आवर्ते' समाध्युत्थानकर्मणी करोमीति।

सात्वतपक्षभाष्यम्

कश्चिद् विश्वानरो मुनिः स्वभार्यया शुचिष्मत्या प्रयुतः कृच्छ्रं तपश्चरन् महादेवप्रसादात्तत्सन्निभं पुत्ररत्नं रुद्रावतारं लेभे। चतुराननश्च समागत्य तस्य शिशोर्गृहपतिरिति नामधेयश्चक्रे। अत्रान्तरे अस्य शिशोर्द्वादशे वर्षे किञ्चिदनिष्टं भवितेति नारदस्य भविष्यदुक्तिमुपश्रुत्य तत्पितरौ महतीं व्यथां लेभाते। सः शिशुः पितरौ! मृत्युञ्जयाराधनेन मृत्युरपि जेतुं सुशकः किमुतानिष्टान्तरमिति तौ समाश्वास्य वाराणस्यां तपश्चरितुं जगाम। तत्तपसा तुष्टः शङ्करस्तस्मै पूर्वदक्षिणयोरन्तराले आग्नेयकोणे विदिशि अग्निदिक्पालपदे अभिषिषेच। तस्मादसौ प्राच्यधिपतिरिन्द्र इव दक्षिणाधिपतिर्धर्मराज इव यावच्चन्द्रदिवाकरौ स्वस्या दिशः शासनायामरो बभूव। कथैषा शिवपुराणे शतरुद्रीयसंहितायां चतुर्दशपञ्चदशाध्याययोरुपवर्णिता। आकर्णिततद्वृत्तान्तस्तस्य तातो विश्वानरः स्वात्मानं बहु मन्यमानः सुतं प्राह—अग्ने गृहपत इति।

'अग्ने' शङ्करेणाग्निदिक्पालपदे अभिषिक्त! 'गृहपदे' चतुर्मुखदत्तगृहपतिसंज्ञ! 'अग्ने' अग्निदेव! अग्निपदस्य पुनर्वचनं शङ्करादग्निदेवस्य आग्नेयकोणे दिक्पालताप्राप्तिसूचनाय 'त्वया' 'गृहपतिना' गृहपतिसंज्ञेन पुत्ररत्नेन 'सुगृहपतिः' शोभनो गृहस्थः 'भूयासं' भवेयम्। गृहस्थस्य लोकोत्तरपुत्ररत्नप्राप्तिरेव शोभनत्वम्। किञ्च 'मया' गृहपतिना सह 'त्वं' मम पुत्रोऽपि 'सुगृहपतिः' शोभनगृहस्थः 'भूयाः' भव, अहमिव त्वमपि पुत्ररत्नं लभस्व। एतेन प्रजातन्तुं मा व्यवच्छेत्सीरिति श्रुतिसम्मतसन्ततेरविच्छेदो मम भूयादिति सूचितम्। तमेवार्थं दृढीकर्तुं किञ्चिच्छब्दविनिमयेन आचष्टे—सुगृहपतिरिति। 'अग्ने' मदात्मजतया अविनाभूत अग्निदेव! मम पौत्रस्य त्वत्पुत्रस्य जन्मना सुगृहपतिस्त्वं 'मया गृहपतिना' सह 'भूयाः' भव। आवयोर्गार्हपत्यं वंशवर्धनेन शोभनं भवतात्। वंशवृद्धिर्हि गृहस्थाश्रमभूषणमिति भावः।

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

इति महानुभावदृष्ट्या विश्वं स्वात्मानं मत्वा स्वमुखेन सर्वेषां स्त्रीपुरुषद्वन्द्वानां हितं कामयमानो व्याहरति—अस्थूरि णाविति। छान्दसं णत्वम्, 'नौ' आवयोः स्त्रीपुरुषयोः, सर्वस्य नरस्य सर्वस्याः नार्याश्चेत्यर्थः। 'गार्हपत्यानि' दाम्पत्यानि 'अस्थूरि' सदा अवतिष्ठमानानि स्थिराणि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवपूर्वात् स्थाधातोरिनि रुडागमे धातोराकारस्य ऊकारे वाहुलकाद् रूपसिद्धिः। अस्थूरीणीति प्राप्ते विभक्तेर्लुक् 'सन्तु' भवन्तु। 'शतं हिमाः' शतवर्षपर्यन्तं, यावज्जीवं कश्चिन्नरो विधुरः कांचिन्नारी वा विधवा न स्यादिति भावः। अथवा शतं हिमा इत्युत्तरान्वयि, तेन लोकसेवाव्रतस्य सततानुष्ठानं प्रतिजानीते। 'सूर्यस्य' भास्करस्य 'आवृतम्' आवर्तनं मार्गं पन्थानं सततलोकसेवालक्षणम् 'अनु' अनुसृत्य 'आवर्ते' सततलोकसेवाव्रतमनुतिष्ठेयं शिवप्रसादादिति भावः।

केचित्तु गृह्णाति निराश्रितान् भक्तान् वेति गृहः आश्रयदानात्, पतिः पालयति च अपेक्षितसम्पादनेन रक्षणात्, तत्सम्बोधने गृहपते! आश्रयदातृश्रेष्ठ परमेश्वर! यथा त्वमाश्रयदानात् निराश्रितान् गृह्णासि रक्षसि चापेक्षितसम्पादनात्, अतो मामप्युपासकं त्वत्सदृशं कुर्या इति व्याचक्षते।

राजसूये समागतं कृष्णमालक्ष्य युधिष्ठिरस्य वा उक्तिरियम्। 'पयसा कमलं कमलेन पयः' इतिवद् भवतो मम च गार्हपत्यमन्योन्यसंयोगेनातितरां चकास्ति, त्वद्गृहे गतस्य मम, मम गृहे समागतस्य तव यथाविध्यातिथ्यसमनुष्ठानात्, आतिथ्यं हि गृहस्थस्य मुख्यो धर्मः, तस्मात् सम्यगाचरितं तद् गार्हपत्ये चमत्कृतिमादधाति रन्तिदेवनिर्विशेषमिति तात्पर्यम्। अग्निपदावृत्तिरादरातिरेकार्था।

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे राधीदमहं य एवास्मि सोऽस्मि ॥ २८ ॥

१. व्रतविसर्जनम्, २. कर्मसमापनम्।

देवयाजिपक्षभाष्यम्

अष्टाविंश्यां कण्डिकायां द्वौ मन्त्रौ। 'अग्ने व्रतपते' इति व्रतविसर्जनः। अस्य साम्नी पङ्क्तिश्छन्दः, अग्निर्देवता। 'इदमहम्' इति कर्मसमापनः, अस्य याजुषी पङ्क्तिश्छन्दः, अग्निर्देवता। परमेष्ठी प्राजापत्य ऋषिः समः (श० ब्रा० १. ९. ३. २३; का० श्रौ० ३. ८. २५)।

यजमानो दर्शपूर्णमासयागं प्रारिप्सुः प्राक् प्रथमाध्याये पञ्चम्यां कण्डिकायाम् 'अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्' इत्येवमग्निप्रार्थनापूर्वकं प्रारब्धं व्रतमधुना कृतकृत्यः पुनरग्निं प्रार्थयमानो व्रतं विसृजते—अग्ने इति।[1] 'व्रतपते' मयाऽनुष्ठितस्य व्रतस्य पालक! 'अग्ने' 'व्रतम्' अनुष्ठेयं कर्म 'अचारिषम्' कृतवानस्मि। 'तत्' कर्म 'अशकम्' तवानुग्रहादेव

१. व्रतं विसृजते येनोपेयात्। (का० श्रौ० सू० ३. ८. २५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समापयितुं समर्थोऽभूवम्। 'मे' मया कृतं 'तत्' कर्म 'अराधि' समृद्धम्। 'राध संसिद्धौ' (स्वा० प० १२६३) कर्मणि रूपम्। एवं व्रतं विसृज्य कर्म समाप्नुवन् मनुष्यस्वरूपं स्वीयं ख्यापयति—इदमहमिति।[1] 'इदं' प्रसक्तं कर्म समाप्य 'अहं' यजमानः 'य एव' यादृश एव कर्मणः प्रारम्भे 'अस्मि' 'सः' तादृश एव सम्प्रति कर्मणः समाप्तावपि मनुष्य एव 'अस्मि' इति।

अस्मिन् याजमानाख्ये षष्ठेऽनुवाके पञ्चसु कण्डिकासु पञ्चदशभिर्मन्त्रैः (चतुर्विंश्यामेकः, पञ्चविंश्यां सप्त, षड्विंश्यां त्रयः, सप्तविंश्यां द्वौ, अष्टाविंश्यां द्वौ) निम्ननिर्दिष्टाः क्रिया व्याख्याताः—१. पूर्णपात्रनिनयनम्, २-४. विष्णुक्रमाः, ५. स्वभागावेक्षणम्, ६. वेदिभूम्यवेक्षणम्, ७. प्राक्प्रेक्षणम्, ८. आहवनीयप्रेक्षणम्, ९. सूर्यप्रेक्षणम्, १०. सूर्यप्रार्थना, ११. सूर्यप्रदक्षिणम्, १२. गार्हपत्याग्निप्रेक्षणम्, १३. सूर्यप्रदक्षिणम्, १४. व्रतविसर्जनम्, १५. कर्मसमापनम्।

द्वितीयाध्यायस्य षट्स्वनुवाकेषु अष्टाविंशत्यां कण्डिकासु च समुदिता मन्त्रसंख्या एकाशीतिः (८१)।

इति दर्शपूर्णमासयागः समाप्तः।

आत्मयाजिपक्षभाष्यम्

'व्रतपते' हे योगानुष्ठानपालक ! 'अग्ने' परमेश्वर ! अहं 'व्रतम्' इन्द्रियादीनां संस्कारम् 'अचारिषम्' अनुष्ठितवानस्मि 'तत् अशकम्' त्वत्प्रसादात् तत्कर्म कर्तुं शक्तोऽभवम्। त्वया च 'तत् मे' तन्मदीयं कर्म 'अराधि' साधितम्। 'इदमहं योऽस्मि' 'सः' देवः 'एव अस्मि'। यथा श्रुतिः—'अमानुष इव वा एतद् भवति यद् व्रतमुपैति' (श० ब्रा० १. ९. ३. २३) इति।

सात्वतपक्षभाष्यम्

एषा कण्डिका पूर्वत्र (शु० यजु० १. ५) व्याख्यातप्राया। इयांस्तु विशेषः यत् तत्र व्रतग्रहणे विनियुक्ता, अत्र च व्रतविसर्गे। अत एव भाविनं व्रतानुष्ठानमपेक्ष्य तत्र भविष्यत्-प्रयोगः। अत्र तु व्रतस्यातीतत्वाद् भूतस्य प्रयोगः।

'याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' (भाग० १०. २२. २७) इति भगवत्प्रतिज्ञातवरानुरूपं शरदि राकायां तेन समं विहितरासाः प्राप्तदिव्यानन्दा व्रजाङ्गना लब्धकात्यायनीव्रतफला रासलीलायां विरतायां स्मारं स्मारं लोकोत्तरं तं रसातिरेकं सम्प्रति वनाद् गृहमागत्य कार्यान्तरव्यापृता ऊचुः—अग्ने इति। गणाभिप्रायेण एकवचनम्। अहं

---

१. यदि व्रतग्रहणसमये पूर्वम् 'अग्ने व्रतपते' इति मन्त्रेण व्रतं गृहीतं तदा 'अग्ने व्रतपते' इति मन्त्रेण व्रतं विसृजेत। यदि पूर्वं 'इदमहम्' इति मन्त्रेण व्रतं गृहीतं तदा इदानीम् 'इदमहम्' इति मन्त्रेण व्रतं विसृजेत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोपिकागणः 'अचारिषं' व्रतमनुष्ठितवान्। भगवत्प्रसादात् 'अशकं' तथा कर्तुं शक्तश्चाभूवम्। 'अराधि' तद्व्रतं सिद्धं, सफलं संवृत्तं समीहितरासरमणात्। तत्र हि मधुरभावेन भगवत्सेवनात् कात्यायनीव्रतोद्देश्यं नः पूर्तिपथमगादिति हृदयम्। 'इदं' रासरमणं विदितमिति शेषः। तदनन्तरं गोदोहनादिगृहकृत्यव्यापृतिवेलायां रासरमणात् प्राक् 'यः' यादृशः 'एव अस्मि' 'सः' तादृशः 'अस्मि' वर्ते। निरतिशयभगवत्सेवाऽऽनन्दाननुभवात् समाध्यपगमे व्युत्थानावस्थायां योगी इवेति भावः।

अथ पिण्डपितृयज्ञः

७. पैतृकानुवाकः

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा। अपहता असुरा रक्षाꣳसि वेदिषदः॥ २६॥

१-२. मेक्षणाहुतिः, ३. उल्लेखनम्।

देवयाजिपक्षभाष्यम्

एकोनत्रिंश्यां कण्डिकायां त्रयो मन्त्राः। 'अग्नये' इति 'सोमाय' इति च द्वौ मन्त्रौ मेक्षणहवनार्थौ। अनयोर्याजुषी गायत्री छन्दः, देवो देवता। 'अपहताः' इति चोल्लेखनार्थः। अस्य उष्णिक् छन्दः, असुरो देवता। प्रजापतिः ऋषिः समः (श० ब्रा० २. ४. २. ११-१३, का० श्रौ० ४. १. ६)।

सारतण्डुलान् (ईषत्स्विन्नाँस्तण्डुलान्) चरुस्थाली यथा पूर्णा न स्यात् तथाऽपूर्णं श्रपयित्वा आज्येनाभिघार्य दक्षिणत आनीय कृतापसव्योऽध्वर्युर्मेक्षणेन (चरुमालोड्य येन काष्ठेन गृहीत्वा हूयते तन्मेक्षणम्) पूर्वम् एकामाहुतिम् अग्नये जुहुयात्—अग्नय इति।[1] कव्यवाहनाय कव्यं पित्र्यं हविः, कवयः क्रान्तदर्शिनः पितरस्तत्सम्बन्धि हविरित्युव्वटमहीधरौ। कव्यं वहतीति 'कव्यपुरीषपुरीष्येषु ञ्युट्' (पा० ३. २. ६५) इति सूत्रेण कव्ये उपपदे स्थिते वह्-धातोर्ञ्युट्प्रत्ययः। 'गतिकारकोपपदात् कृत्' (पा० ६. २. १३९) इत्यनेनोत्तरपदस्य प्रकृतेः

---

१. सारतण्डुलमपूर्णं श्रपयित्वाऽभिघार्योद्वास्य मेक्षणेन जुहोति, 'अग्नय' इति 'सोमाय' इति च। (का० श्रौ० सू० ४. १. ६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'वाहन' इत्यस्याद्युदात्तः स्वरः स्थितः। एवंभूताय कव्यवहनसमर्थाय 'अग्नये' वह्नये 'स्वाहा' इदं सुहुतमस्तु। अपराम् आहुतिं 'पितृमते' पितृसंयुक्ताय 'सोमाय' तदाख्यदेवाय दद्यात्। 'स्वाहा' इदं सुहुतमस्तु।

एवं हुत्वाऽध्वर्युर्मेक्षणमग्नौ प्रक्षिपेत्, दक्षिणाग्नेर्दक्षिणतः पश्चिमतो वा स्फ्येन सकृद् दक्षिणाग्रमुल्लिखेत्—अपहता इति। 'वेदिषदः' वेद्यां सीदन्ति निषीदन्ति वेदिषदः। 'षद्लृ विशरणगत्यवसादनेषु' (भ्वा० प० ८५४) 'सत्सूद्विषद्रुह०' (पा० ३. २. ६१) इत्यादिना कर्तरि क्विप् प्रत्ययः। 'असुराः' देवद्रुहः 'रक्षांसि' राक्षसाश्च। जातिद्वयं देवशत्रुः। 'अपहताः' वेदिस्थानाद् विनाशिताः। वेद्यां कृतया रेखया देवद्विषामसुररक्षसां विनाशमिच्छतीति।

आत्मयाजिपक्षभाष्यम्

'कव्यवाहनाय' कवयः, क्रान्तदर्शिनः पितरो मनोवृत्तयः। 'मनः पितरः' (श० ब्रा० १४. ४. ३. १३) तेषां सम्बन्धि हविः कव्यं तद् वोढुमधिकारो यस्यास्ति स कव्यवाहनः, तस्मै 'अग्नये' आत्माग्नये। 'अन्नाद एवाग्निरभवद् अन्नं सोमः' (श० ब्रा० ११. १. ६. १९) 'स्वाहा' इन्द्रियशक्तिरूपं हविर्दत्तम्। 'पितृमते' मनःसंयुक्ताय 'सोमाय' 'चन्द्रमा वै सोमो देवानामन्नम्' (श० ब्रा० ११. १. ५३) तस्मै देवाय चन्द्रमसे 'स्वाहा' इन्द्रियशक्तिरूपं हविर्दत्तम्। 'वेदिषदः' वेद्यां मनोहृदयरूपायां सीदन्ति वेदिषदः, तादृशाः 'असुराः' कामादयः 'रक्षांसि' मोहादयः 'अपहताः' वेद्याः सकाशादपगता इति।

सात्वतपक्षभाष्यम्

पिता विश्वानरः स्वसुतं पुनः स्तौति। 'कव्यवाहनाय' कव्यं कोतव्यं 'कुङ् शब्दे' (भ्वा० आ० ६५१) 'कु शब्दे' (अ० प० १०४२)। स्तोतव्यं स्वर्गं मोक्षं वा स्वोत्पत्त्या पितरौ वहति प्रापयति 'नापुत्रस्य गतिः' इति श्रुतेः। स्वात्मानं वा स्तोतव्यं दिक्पालत्वं रुद्रप्रसादान्नयति इति सः। 'काव्यपुरीषपुरीष्येषु ञ्युट्' (पा० ३. २. ६५) इति ञ्युटि सिध्यति। कव्यवाहनस्तस्मै 'अग्नये' पूर्वदक्षिणान्तरालवर्तिविदिशोऽधिपतये 'स्वाहा' सुष्ठु शोभनं स्तुतिवाक्यम् 'आह' ब्रुवे, पुरुषव्यत्ययश्छान्दसः। 'पितृमते' माता च पिता च पितरौ, तौ संसेवनीयत्वेन विद्येते यस्य तथाभूताय मातुः पितुश्च चरणारविन्देषु अनुरक्ताय जननीजनकपरमभक्ताय 'सोमाय' उमया पार्वत्या सह वर्तत इति सोमः शङ्करस्तस्मै रुद्रावताराय इति यावत्। 'स्वाहा' एष व्याख्यातपूर्वः। किञ्च 'असुराः' असुषु प्राणेषु रममाणा विलासिनो राजसा विषयभोगासक्ताः 'रक्षांसि' तामसानि क्रूरसत्त्वानि 'वेदिषदः' वेद्यां यज्ञभूमौ सीदन्ति, यज्ञं विहन्तुं समागत्योपविशन्ति तथाभूताः। उभयान्वयियज्ञविघातकत्वे समेऽपि राजसत्वतामसत्वाभ्यां विशेषः। असुरत्वरक्षस्त्वे यज्ञविघातकप्राणिनां जातिविशेषौ। 'अपहताः' बलवता त्वया दूरोत्सादिता व्यापा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिता वा । तव तेजोऽसहमानास्ते विनष्टा पलायिता वा । 'रक्षांसि' रक्षासाधनानि । रक्ष्धातोः करणे असुन् । 'वेदिषदः' वेदाध्येतृषु पुरुषेषु सीदन्ति, तेषां हृदि वर्तन्ते, सर्वे रक्षोपायाः वेदविद्भिर्विज्ञायन्ते याथातथ्येनेति कश्चिद् व्याचष्टे ।

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ ३० ॥

उल्मुकनिधानम् ।

देवयाजिपक्षभाष्यम्

त्रिंश्यां कण्डिकायामेक एव मन्त्रः 'ये रूपाणि' इत्यादिरुल्मुकस्थापनः । अस्य प्रजापतिः ऋषिः, त्रिष्टुप् छन्दः, कव्यवाहनोऽग्निर्देवता (श० ब्रा० २. ४. २. १४-१५, का० श्रौ० ४. १. ८) ।

अध्वर्युरेकमुल्मुकं (ज्वलत्काष्ठं) दक्षिणाग्नेरादाय रेखाया अग्रतो दक्षिणप्रदेशे निधत्ते—ये इति ।[1] 'ये असुराः' देवशत्रवः 'सन्तः' भवन्तः, अपि 'रूपाणि' पितृसदृशरूपाणि 'प्रतिमुञ्चमानाः' धारयन्तः । प्रतिपूर्वो मुञ्चतिर्बन्धनार्थः । यथा—उपानहौ प्रतिमुञ्चति, उपानहौ बध्नाति धारयतीत्यर्थः । अत्र पितृयज्ञे 'स्वधया' पित्रर्थं दीयमानेन कव्यादिनाऽन्नेन 'चरन्ति' विचरन्ति, किञ्च 'ये' असुराः 'परापुरः' परा परस्तरां प्रभूतमित्यर्थः पृणन्ति पूरयन्त्यात्मानं परकीयेनान्नेनेति परापुरः, 'पृ पालनपूरणयोः' (क्र्या० प० १४८९) अस्मात् कर्तरि क्विपि 'उदोष्ठ्यपूर्वस्य' (पा० ७. १. १०२) इत्य नेनऋकारस्य उदादेशः । 'निपुरः' नि नितरां पृणन्ति परकीयान्नेनात्मानमिति निपुरः । उभयत्रोत्तरपदप्रकृतिस्वरः । यत्तु सायणः (श० ब्रा० २. ४. २. १५) परापूर्वकात् निपूर्वकात् पृणोतेः 'पृ प्रीतौ' (स्वा० प० १२५८) इत्यतो भावे क्विपि बहुव्रीहिसमासे निष्पत्तिमाह, तदस्मभ्यं न रोचते । 'ॠत इद्धातोः' (पा० ७. १. १००) इत्यतो दीर्घस्य ॠकारस्यैवानुवृत्तस्य 'उदोष्ठ्यपूर्वस्य' इत्यनेनोत्त्वविधानात्, सौवादिके पृधातौ च ह्रस्वस्य ऋवर्णस्य सत्त्वात् । सति च बहुव्रीहिसमासेऽन्तोदात्तत्वानापत्तेश्च । एवमेव पक्षान्तरे सायणसम्मतः 'पराः' प्रभूताः 'पुरः' शरीराणि येषान्ते 'परापुरः' महाकायाः । 'नि' निकृष्टा अल्पाः 'पुरः' शरीराणि येषां ते 'निपुरः' अल्पकाया इत्यर्थोऽपि स्वरदोषादमान्यः । उव्वटमहीधरावपि—पराक्रान्ताः पुरः 'परापुरः' स्थूलदेहान् निकृष्टाः पुरो 'निपुरः' सूक्ष्मदेहान् इति तत्पुरुषसमासमभिमन्यमानौ स्वरदोषादेव अमान्यौ । 'भरन्ति' कव्यं हरन्ति, 'हृग्रहोर्भश्छन्दसि' (वा० ३. १. ८४) इति हस्य भः । 'तान्' उभयविधानपि असुरान् 'अग्निः'

---

१. उल्मुकं परस्तात् करोति 'ये रूपाणि' इति । (का० श्रौ० सू० ४. १. ८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उल्मुकरूपः 'अस्मात्' पितृस्थानात् 'प्रणुदाति' प्रेरयतु, नाशयत्वित्यर्थः। 'णुद प्रेरणे' (तु० उ० १२८२) अस्मात् लोडर्थे लेटि 'लेटोऽडाटौ' (पा० ३. ४. ९४) इत्याडागम इति।

आत्मयाजिपक्षभाष्यम्

'स्वधया' विषयभोगहेतुना 'रूपाणि' स्वीयरूपाणि 'प्रतिमुञ्चमानाः' मनोवृत्तिसमानरूपाणि स्वीकुर्वन्तः 'सन्तः' 'ये असुराः' कामादयः 'परापुरः' पराक्रान्ताः पुरः परापुरः स्थूलदेहान् कर्मेन्द्रियरूपान् 'निपुरः' निकृष्टाः पुरः निपुरः सूक्ष्मदेहान् ज्ञानेन्द्रियरूपान् 'भरन्ति' धारयन्ति। 'अग्निः' ज्ञानाग्निः 'तान्' कामादीन् 'अस्मात् लोकात्' मनोहृदयरूपात्, 'प्रणुदाति' प्रकर्षेणापसारयत्विति।

सात्वतपक्षभाष्यम्

अग्निनाऽसुराणामपहृतिं विवृणोति—ये रूपाणीति। 'ये' 'असुराः' 'रूपाणि' स्वकीयरूपाणि 'प्रतिमुञ्चमानाः' परित्यजन्तः पितृसमानरूपाणि स्वीकुर्वाणाः 'सन्तः' भवन्तः। 'स्वधा' पैतृकान्ननिमित्तं, तदस्माभिर्भोक्तव्यमिति भक्षणेच्छया 'चरन्ति' पितृयज्ञस्थाने इतस्ततः परिभ्राम्यन्ति। किञ्च 'परापुरः' उत्कृष्टान् स्थूलान् देहान् 'निपुरः' निकृष्टान् सूक्ष्मदेहान् स्थूलानि सूक्ष्माणि च शरीराणीति यावत्। 'भरन्ति' धारयन्ति स्वकीयासुरत्वगोपनाय, 'तान्' सर्वान् 'अस्माल्लोकात्' पितृयज्ञस्थानात् 'अग्निः' कव्यवाहनो भवान् अग्निदेवः प्रणुदाति प्रणुदतु दूरेऽपसारयतु। लिङर्थे लेट्। आडागमश्छान्दसः। 'असुरः' असुरमणः, प्राणेषु रममाणः, इन्द्रियारामः, विषयलम्पटः। असुपूर्वाद् रमेर्डः। अपि वा असून् प्राणान् रिणोति हिनस्ति इत्यसुरः, असुपूर्वाद् 'रि हिंसायां' (स्वा० प० १२७६) इत्यतो हिंसायां डः, प्राणापहारक इत्यर्थः। अथवा अस्यति प्रक्षिपति धर्मान् सद्गुणांश्चेत्यसुरः। 'असु क्षेपणे' (दि० प० १२१०) इत्यस्मात् 'असु उपतापे' (कण्ड्वादिः प० १९४८) अतो वा 'असेरुरन्' (उ० सू० १. ४२) इत्युरन् प्रत्ययः। रूपशब्दो रौतेः शब्दकर्मणः 'रु शब्दे' (अ० प० १०३४)। 'खष्पशिल्पशष्पवाष्परूपपर्णतल्पाः' (उ० सू० ३.२८) इति सूत्रेण पप्रत्ययान्तो निपातितः। तत्र 'रूपाणि' अपशब्दान् गालिकापरनामधेयान् 'प्रतिमुञ्चमानाः' प्रयुञ्जानाः अपि वा 'रुप विमोहने' (दि० प० १२३७) घञर्थे कः, छान्दसत्वान्नपुंसकत्वं दीर्घश्च। पृषोदरादित्वाद् वा साधु। 'रूपाणि' विविधानि विमोहनकौशलानीत्यर्थः।

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ३१ ॥

१-२ पिण्डाभिमुखो जपः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

अस्यामेकत्रिंश्यां कण्डिकायां द्वौ मन्त्रौ 'अत्र पितरः' इत्यादिः 'अमीमदन्त' इत्यादिश्च। द्वावेव पितृपिण्डाभिमुखजपार्थौ। उभयोः प्रजापतिः ऋषिः, साम्नी बृहती छन्दः, पितरो देवताः (श० ब्रा० २. ४. २. २०-२२, का० श्रौ० ४. १. १३-१४)।

अध्वर्युर्निम्नमन्त्रं संहितास्वरेण पठित्वा आ तमनात् श्वासं निरुध्य, यावद् ग्लानिर्नानुभूयते तावत्पर्यन्तमित्यर्थः, अप्रदक्षिणमावृत्योदङ्मुख उपविशति—अत्रेति।[1] 'पितरः' हे मम पूज्याः पितरः 'अत्र' बर्हिरासने यूयं 'मादयध्वम्' तृप्यत। 'यथाभागं' कव्ये स्वं स्वं भागमनतिक्रम्य, स्वस्वभागधेयानुसारेण। भागमनतिक्रम्य यथाभागम्। 'अव्ययं विभक्ति०' (पा० २. १. ६) इत्यादिना यथाऽव्ययेन अव्ययीभावसमासे 'समासस्य' (पा० ६. १. २२३) इत्यन्तोदात्तत्वम्। 'आवृषायध्वम्' वृष इव तृप्तिपर्यन्तं सर्वतोभावेनाश्नीत। आ समन्ताद् वृष इवाचरतेति विग्रहे 'कर्तुः क्यङ् सलोपश्च' (पा० ३. १. ११) इत्यनेन आचारार्थे वृषशब्दात् क्यङि 'अकृत्सार्वधातुकयोर्दीर्घः' (पा० ७. ४. २५) इति दीर्घे च 'आवृषाय' इत्यस्य 'सनाद्यन्ता धातवः' (पा० ३. १. ३२) इति धातुत्वे लोटि मध्यमपुरुषवहुवचने रूपम्।

मुहूर्तं पिण्डसमीप उपविश्याध्वर्युः प्रदक्षिणमावृत्य संहितास्वरेण पुनः पठति—अमीमदन्तेति।[2] 'पितरः अमीमदन्त' मत्प्रार्थनया पितरो मदर्पितं पिण्डं स्वीकृत्य तृप्ता अभूवन्। 'यथाभागं' स्वं स्वं भागम् 'आवृषायिषत' आङ्पूर्वो वृषायतिरभ्यवहारे वर्तते। ततो लुङि प्रथमपुरुषबहुवचने रूपम्। आशिषुरिति।

आत्मयाजिपक्षभाष्यम्

'पितरः' हे मनोवृत्तयः ! यूयम् 'अत्र' ज्ञानयज्ञे 'मादयध्वं' ब्रह्मानन्दमय्यो भवत 'यथाभागं' स्वं स्वं भागम् इन्द्रियशक्तिरूपमनतिक्रम्य 'आवृषायध्वम्' समन्ताद् वृषवदाचरत। यथा वृषः स्वाभीष्टं घासं प्राप्य तृप्तिपर्यन्तं स्वीकरोति, तद्वत् स्वीकुरुत। 'पितरः' मनोवृत्तयः 'अमीमदन्त' ब्रह्मानन्दमय्यः सत्यः 'यथाभागं' स्वभागमनतिक्रम्य 'आवृषायिषत' वृषवत् स्वीचक्रुः, स्वं भागं जक्षुरिति।

सात्वतपक्षभाष्यम्

अधिचित्रकूटं भरतः सराजपरिवारः स्वगुरुणा वशिष्ठेन च संयुतः सप्रणयं भगवता

१. 'अत्र पितरः' इत्युक्त्वोदङ्ङास्त आतमनात्। (का० श्रौ० सू० ४. १. १३)

२. आवृत्त्या 'अमीमदन्त' इति जपति। (का० श्रौ० सू० ४. १. १४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामेण सङ्गन्तुं जगाम। तदा समाकर्णितपितृनिधनवृत्तान्तः शोकाकुलस्वान्तः कृतोपवासः श्रीरामः स्वगुरोर्निदेशात् पितृयज्ञं (रामचरितमानसे अयोध्याकाण्डे २४७ दोहानन्तरम्) समनुतिष्ठन् श्रद्धातिरेकसाक्षात्कृतपितृगणः सविनयमुवाच—अत्र पितर इति। 'पितरः' दिवंगताः मम पूर्वजाः समाहूताः पितृयज्ञस्थानेऽत्र समागताः 'मादयध्वं' हृष्टा भवत। तत्र हेतुमाह 'यथाभागमावृषायध्वम्' मया दत्ते पिण्डभोजनादौ स्वं भागमनतिक्रम्य समन्ताद् वृषवदाचरत, यथा वृषः स्वाभीष्टं घासादिकं लब्ध्वा आ तृप्तेर्भुङ्क्ते, तथा तृप्तिपर्यन्तं भुञ्जीध्वम्। वृषशब्दात् 'कर्तुः क्यङ् सलोपश्च' (पा० ३. १. ११) इति क्यङ् अकृत्सार्वधातुकयोरिति दीर्घः। अपिवा 'आवृषायध्वम्' वृषो मेघस्तद्वदाचरत, अर्थिसार्थे अमोघमेघव्रतं धत्त। याचकानां दारिद्र्यं दूरीकर्तुं तेभ्यो यथाकामं प्रकामं धनादिकं प्रयच्छत इत्याकूतम्। श्रद्धातिरेकात् प्रभुरामेण दत्तं पिण्डादिकं प्रत्यक्षीभूय भुक्तवतः पितॄन् दर्शं दर्शं प्रसन्नचेताः प्रभुराह—अमीमदन्तेति। अहो महान् हर्षातिरेकः। यान् पितॄन् प्रति मादयध्वमित्युक्तं, ते पितरस्सर्वे मद्वचसि विहितादराः 'यथाभागं' स्वभागानतिक्रमेण 'आ' समन्ताद् 'वृषायिषत' मद्दत्तं पिण्डादिकं बलीवर्दवदातृप्तेर्भुक्तवन्तः। अपिवा 'वृषायिषत' वृषो मेघः तद्वद् आचरितवन्तः। मेघ इव याचकेभ्यो यथेच्छं धनादिवृष्टिमकार्षुः। अतिवदान्या भूत्वा यद् यत् प्रार्थितं तत् सर्वं दातुमुत्सुका जाताः, सस्नेहं भक्षयामासुरित्यर्थः। अत एव 'अमीमदन्त' हृष्टा जाताः। तृप्ताः सन्तश्च आशीराशिं मह्यं प्रयच्छन्तीति भावः।

नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास आधत्त ॥ ३२ ॥

१–६. पुटाञ्जलिनमस्कारः, ७. पितृप्रार्थना, ८. पिण्डोपरि सूत्रनिधानम्।

देवयाजिपक्षभाष्यम्

अस्यां द्वात्रिंश्यां कण्डिकायां तावदष्ट मन्त्राः। तेषां 'नमो वः पितरः' इत्यारभ्य 'पितरो नमो वः' इति पर्यन्तं षण्मन्त्राः[1] पुटाञ्जलिपूर्वकं नमस्कारार्थाः। एष्वाद्यानां पञ्चानां याजुषी वृहती च्छन्दः, षष्ठ्या आर्षी उष्णिक् छन्दः, लिङ्गोक्ता देवताः। 'गृहान्नः' इत्यादिः सप्तमो

१. (१) 'नमो वः पितरो रसाय' (२) 'नमो वः पितरः शोषाय' (३) 'नमो वः पितरो जीवाय' (४) 'नमो वः पितरः स्वधायै' (५) 'नमो वः पितरो घोराय' (६) 'नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः' इति षण्मन्त्राः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्त्रः पितृप्रार्थनः। अस्य साम्नी अनुष्टुप् छन्दः, पितरो देवताः। 'एतद् वः' इत्यादिर्मन्त्रोऽष्टमः सूत्रनिधानः। अस्य प्राजापत्या गायत्री छन्दः, पितरो देवताः। सर्वेषां प्रजापतिः ऋषिः (श० ब्रा० २. ४. २. २४, का० श्रौ० ४. ४. १५–१६)।

अध्वर्युः पिण्डेषु प्रत्यवनेजनं जलं निषिच्य नीविं विस्रंस्य 'नमो वः' इत्यादिभिः षड्भिर्मन्त्रैर्नमस्कारार्थं षट् पुटाञ्जलीन् करोति। 'षड् वा ऋतवः पितरः' (श० ब्रा० २. ४. २. २४) इति श्रुतेः पितर ऋतुस्वरूपाः। ऋतवश्च सन्ति षट्। तस्मात् षड्ऋतुस्वरूपाणां पितॄणां प्रसादार्थं षड् नमस्कारान्[1] कुर्यात्। एकैकनमस्कारेण पितॄणां षड्ऋतुस्वरूपत्वमभिव्यञ्जन्नाह— नमो व इति।[2] 'पितरः' 'वः' युष्मत्सम्बन्धिने 'रसाय' रसस्वरूपाय वसन्ताय ऋतवे। वसन्ते मधुकट्वम्लादयो रसा ओषधिवनस्पतिषु प्रादुर्भवन्ति तस्माद् वसन्तो रसः। 'नमः' अयं नमस्काराञ्जलिंरस्तु। 'पितरः' 'वः' युष्मत्सम्बन्धिने 'शोषाय' शोषस्वरूपाय ग्रीष्मर्तवे 'नमः' अस्तु। ग्रीष्मे ह्यतिमात्रनिदाघादोषधिवनस्पतयः शुष्यन्ति। 'पितरः' 'वः' युष्मत्सम्बन्धिने 'जीवाय' जीवरूपाय वर्षर्तवे 'नमः'। वर्षासु निदाघसन्तप्तं प्राणिमात्रं सरसं सञ्जीवति। 'पितरः' 'वः' युष्मत्सम्बन्धिन्यै 'स्वधायै' स्वधेति अन्ननाम (निघ० २. ७. १७)। अन्नस्वरूपायै शरदे 'नमः' 'स्वधा वै शरत् स्वधा वै पितॄणामन्नम्' (श० ब्रा० १३. ८. १. ४) इति श्रुतेः। शरदि प्रायेणान्नं जायते। 'पितरः'! 'वः' युष्मत्सम्बन्धिने 'घोराय' घोरस्वरूपाय हेमन्तर्तवे 'नमः'। अतिशैत्यात् सर्वेषां कष्टप्रदत्वाद् हेमन्तर्तुर्घोरः। 'पितरः'! 'वः' युष्मत्सम्बन्धिने 'मन्यवे' मन्युः क्रोधः तत्स्वरूपाय शिशिरर्तवे 'नमः'। यथा मन्युः क्रोधः क्रोद्धारं दहति, तथा शिशिरे सर्वेषामोषधिवनस्पतीनां दाहस्वरूपं शातनं जायते। एवं षड्भ्य ऋतुस्वरूपेभ्यः पितृभ्यो मम षट् नमस्काराः सन्तु। 'नमो वः पितरः पितरो नमो वः' इति पुनरुक्तिरादरातिशयद्योतनार्था। 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १०. ४२) इति।

ततः पितॄन् आशिषः प्रार्थयते—गृहान्न इति।[3] 'पितरः' 'नः' अस्मभ्यं 'गृहान्' गृहोपलक्षितपुत्रकलत्रादीन् दत्त। 'गृहाणां ह पितर ईशते' (श० ब्रा० २. ४. २. २४)। भवतां पितॄणां प्रसादान्मम सर्वं भवत्विति। 'सतः' विद्यमानान् एव गृह्यपदार्थान् 'पितरः' 'वः' युष्मभ्यं वयं 'देष्म' ददाम, दातुं समर्था इति 'गृहान्नो दत्त' इति। ददाम इत्यस्य स्थाने देष्म इति छान्दसं रूपम्। प्रतिपिण्डमध्वर्युस्त्रीणि त्रीणि सूत्राणि वासोऽर्थे निदधाति—एतद्व इति।[4] 'पितरः'! 'वः' युष्माकं परिधानाय 'एतद्' त्रिसूत्ररूपम् 'वासः' वस्त्रं समर्पितम् 'आधत्त' परिधत्तेति।

१. 'षड् वा नमस्कारान्'। (का० श्रौ० सू० ५. ९. १९)
२. अवनेज्य पूर्ववन्नीविं विस्रंस्य 'नमो वः' इत्यञ्जलिं करोति। (का० श्रौ० सू० ४. १. १५)
३. 'गृहान्नः' इति जपति। (का० श्रौ० सू० ४. १. १६)
४. 'एतद्व' इत्युपास्यति सूत्राणि प्रतिपिण्डम्। (का० श्रौ० सू० ४. १. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्राभावे प्रतिपिण्डमूर्णा वा वस्त्रदशा[१] वा निदध्यात्। सर्वाऽभावे यदि यजमानः पञ्चाशत्तम-वर्षादूर्ध्वः स्याद् हृदयलोमान्येव[२] निदध्यादिति।

आत्मयाजिपक्षभाष्यम्

'पितरः' हे मनोवृत्तयः! 'नमः' ज्ञानयज्ञः 'यज्ञो वै नमः' (श० ब्रा० २. ६. १. ४२)। 'वः' युष्माकं सम्बन्धिने 'रसाय' आनन्दमयकोषाय, तस्य संस्काराय, आनन्दो हि रसः सारस्तस्य प्राप्तौ ब्रह्मण्यभयं प्रतिष्ठां विन्दते 'पितरः' हे मनोवृत्तयः! 'नमः' ज्ञानयज्ञः 'वः' युष्माकं 'शोषाय' प्राणमयकोषाय, तस्य संस्काराय। शोषयतीति शोषः प्राणवायुस्तस्मै। यद्वा शुष्यन्ति जलाभावात् प्राणिन इत्यम्मयः प्राणस्तस्मै। 'आपो वै प्राणाः' (श० ब्रा० ३. ८. २. ४) इति श्रुतेः। हे 'पितरः' 'नमः' ज्ञानयज्ञः 'वः' युष्माकं 'जीवाय' जीवसंस्काराय, 'पितरः' हे मनोवृत्तयः। 'नमः' ज्ञानयज्ञः 'वः' युष्माकं 'स्वधायै' अन्नमयकोषाय, तस्य संस्काराय, 'पितरः' हे मनोवृत्तयः! 'नमः' ज्ञानयज्ञः 'वः' 'घोराय' संसारभयदायकाय विज्ञान-मयकोषाय तस्य संस्काराय 'पितरः' हे मनोवृत्तयः! 'नमः' ज्ञानयज्ञः 'वः' युष्माकं 'मन्यवे' मन्युः क्रोधः, तद्रूपाय मनोमयकोषाय तस्य संस्काराय 'पितरः' हे मनोवृत्तयः! 'नमः' योगयज्ञः 'वः' युष्माकं 'पितरः' हे मनोवृत्तयः! 'नमः' ज्ञानयज्ञः 'वः' युष्माकम्। यूयमेव कर्तारः स्थ। 'पितरः' हे मनोवृत्तयः! 'नः' अस्मभ्यं 'गृहान्' कमलरूपाश्रयान् 'दत्त'। मनसः स्थैर्याय हि योगिजनाः प्राणायामं कुर्वन्तीत्यर्थः। 'पितरः' हे मनोवृत्तयः! 'वः' युष्मभ्यं 'सतः' प्राप्तमिन्द्रि-यसमूहं 'देष्म' ददाम। 'पितरः' 'एतद्' 'वासः' मानसकमलं 'वः' युष्माकमस्ति, 'आधत्त' स्वीकुरुत, अन्तर्मुखा भवतेति।

सात्वतपक्षभाष्यम्

'षड् वा ऋतवः पितरः' इति श्रुतेः समाहूतान् षड्ऋतुरूपान् पितॄन् 'मन्यवे' इत्यन्तैः षड्भिर्वाक्यैः प्रत्येकं प्रणमति भगवान् रामः—नमो वः पितरो रसाय इति। रस-शोष-जीव-स्वधा-घोर-मन्युशब्दाः योगशक्त्या क्रमेण षण्णाम् ऋतूनां वाचकाः। नमो वः पितरः इति सप्तमवाक्येन समुदितनमस्कारः। पितरो नमो वः इत्यष्टमवाक्येन पुनर्वचनमादरातिरेक-सूचनाय 'गृहान्नः पितरो दत्त' इति नवमं वाक्यम्।

भो पितरः! 'नः' अस्मभ्यं 'गृहान्' पुत्रभार्यादिपदार्थान् 'दत्त' प्रयच्छतेति तदर्थः। 'सतो वः पितरो देष्म' इति दशमं वाक्यम्। 'पितरः' पितरः! 'सतः' विद्यमानान् पदार्थान् 'वः' युष्मभ्यं 'देष्म' वयं देयास्म। ददातेः आशीर्लिङि उत्तमबहुवचने 'लिङ्याशिष्यङ्' (३. १. ८६)

---

१. 'ऊर्णा दशा वा'। (का० श्रौ० सू० ४. १. १७)

२. 'वयस्युत्तरे यजमानलोमानि वा'। (का० श्रौ० सू० ४. १. १८.)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यङि आतो लोपे, यासुटि 'छन्दस्युभयथा' (३. ४. ११७) इति सूत्रेण मस आर्धधातुकसंज्ञां समाश्रित्य सलोपाभावः। सार्वधातुकसंज्ञाञ्चाश्रित्य 'अतो येयः' इति इयादेशे देष्म इति रूपम्। 'एतद् वः पितरो वास आधत्त' इति एकादशं वाक्यम्। 'पितरः'! 'एतत्' श्रद्धापुरस्सरं भवतां पुरः समुपस्थापितं सूत्रात्मकं 'वासः' परिधानं वस्त्रम् 'आधत्त' परिधत्त। विशिष्य शब्दार्थस्तु देवयाजिपक्षे स्पष्टीकृत एवेति न पुनर्निर्दिश्यते।

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत्॥ ३३॥

पत्न्या मध्यमपिण्डप्राशनम्।

अस्यां त्रयस्त्रिंश्यां कण्डिकायां 'आधत्त' इत्यादिरेक एव मन्त्रः पत्न्या मध्यमपिण्ड-प्राशनार्थः। अस्य प्रजापतिः ऋषिः, गायत्री छन्दः, पितरो देवताः (का० श्रौ० ४. १. २२)।

ऋतुस्नाता यजमानपत्नी पुत्रकाम्यया मध्यमं पितामहपिण्डं प्राश्नाति—आधत्तेति।[१] 'पितरः' 'कुमारं' पुत्रस्वरूपं 'गर्भं' भ्रूणम् 'आधत्त' मम गर्भाशये स्थापयत 'पुष्करस्रजं' पुष्करस्य कमलस्य स्रग् माला यस्य तथाविधम्। अश्विभ्यामत्र कुमार उपमेयः। यथा अश्विनीकुमाराभिधौ देवानां भिषजौ पुष्करमालिनौ सुन्दरौ नीरोगौ च तथा मदीयमपि कुमारं गर्भं सुन्दरं नीरोगं चाश्विनीकुमारसदृशं कुरुतेत्यर्थः। 'यथा' येनानुष्ठितेन 'इह' अस्मिन्नेवर्तौ 'पुरुषः' जायमानः कुमारो देवपितृमनुष्यसम्बन्धिनां सर्वेषां कार्याणां पूरयिता 'असत्' भवतु। 'अस भुवि' (अ० प० १०६५ अकर्मकः)। लोडर्थे लेटि 'लेटोऽडाटौ' (पा० ३. ४. ९४) इत्यडागमः। तिङ इकारस्य 'इतश्च लोपः परस्मैपदेषु' (पा० ३. ४. ९७) इति लोपः। 'तिङ्ङतिङः' (पा० ८. १. २८) इत्यनेन प्राप्तस्य 'असत्' इति तिङन्तस्याऽनुदात्तत्वस्य 'यावद्-यथाभ्याम्' (पा० ८. १. ३६) इति सूत्रेण प्रतिषेधात् 'तास्यनुदात्तेत्' (पा० ६. १. १८६) इत्यादिना लसार्वधातुकस्य निघातत्वे परिशिष्यमाणाद् धातुस्वराद् 'असत्' इति क्रियापदम् आद्युदात्तम्।

आत्मयाजिपक्षभाष्यम्

'पितरः' हे मनोवृत्तयः! 'यथा इह' समाधौ 'पुरुषः' सर्वव्यापी विष्णुः 'असत्' विद्यमानोऽस्ति, तथा 'पुष्करस्रजम्' बहुब्रह्माण्डानां 'गर्भं' गः लयः र् स्थितिः भः प्रकाशः अभिव्यक्तिरुत्पत्तिर्वा यस्मिन् तत् 'कुमारं' शुद्धं ब्रह्म 'आधत्त' धारयतेति।

सात्वतपक्षभाष्यम्

कश्चिद् धार्मिकोऽप्यपुत्रो नरपतिर्विशालः स्वविशालानगरीवास्तव्यानां वेदविदां

---

१. 'आधत्त' इति मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा। (का० श्रौ० सू० ४. १. २२)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विप्राणामादेशाद् गयां जगाम। तत्रासौ भूपतिः पितृयज्ञेन श्राद्धेन स्वपूर्वजान् पितॄन् प्रसादयामास। प्रहृष्टास्तस्य पितृपितामहप्रपितामहास्त्रयः पूर्वजाः तस्य राज्ञो दृष्टिपथमवतेरुः। ते च सितरक्तकृष्णवर्णाः क्रमेण सात्त्विक-राजस-तामसाः नरकयातनातः पारतन्त्र्याच्च विमुक्ताः। तत्तेष्वेकः सितो राज्ञस्तातः कृत्स्नं सर्वेषां तेषां वृत्तान्तमावेद्य सस्नेहमाभाष्य आशीराशिं तस्मै ददे। तान् सर्वान् करुणया समागतान् पुरो वर्तमानो विशालो राजा प्रार्थयते। अपिवा स्वपितरं सितमेव प्रार्थयते। बहुवचनमादरार्थम्—'आधत्त पितरः' इति। 'पितरः' मम पूर्वजाः यूयम्, अपि वा मम पितः! त्वं 'कुमारं गर्भं' पौत्ररूपं स्वपुत्रवध्वा उदरस्थं पुत्रमित्यर्थः 'आधत्त' तथा सम्पादयत सम्पादय वा यथा येन प्रकारेण 'इह' कर्मभूमौ पुरुषः पितृदेवमनुष्याणां मनोरथानां पूरयिता 'असत्' भूयात्। किंभूतं 'पुष्करस्रजम्' पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पद्ममालिनौ देवानां वैद्यौ अश्विनौ तत्तुल्यं, भवत्प्रसादाद् मद्गृहे अश्विनीकुमारसदृशो नीरोगः सुन्दरश्च सुतो भूयात्। त्वरितं भवत्पुत्रवधूः सगर्भा स्यात्, सद्यः पुत्ररत्नं वंशकीर्तिवर्धनं सुखं प्रसुवीतेति भावः। पितृप्रसादात् स राजा पुत्ररत्नं लेभे। दत्ताशिषस्तदीयाः पूर्वजाः पितृलोकं सहर्षमगच्छन्। कथैषा वराहपुराणस्य सप्तमाध्याये पूर्वार्धे सविस्तरं वर्णिता, मत्कृतौ श्रौतमुनिचरितामृते च समुद्धृतेति तत एवावसेया।

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्।
स्वधा स्थ तर्पयत मे पितॄन्॥ ३४॥

पिण्डोपर्यवनेजननिषेकः।

देवयाजिपक्षभाष्यम्

चतुस्त्रिंश्यामस्यां कण्डिकायाम् 'ऊर्जम्' इत्यादिरेक एव मन्त्रोऽवनेजनावशिष्टेन जलेन पिण्डनिषेकार्थः। अस्य प्रजापतिः ऋषिः, त्रिपदा विराट् छन्दः, आपो देवताः (का० श्रौ० ४. १. १९)।

अध्वर्युरवनेजनावशिष्टं जलं पिण्डमूले पिण्डसमीपे पृथिव्यां वा निषिञ्चति—हे आपः! यूयं 'स्वधा' पित्र्यहविःस्वरूपाः। 'स्वधा वै पितॄणामन्नम्' (१३. ८. १. ४) इति श्रुतेः। 'स्वम्' आत्मीयं पितॄणां 'धानं' धारणं स्वधा। 'डुधाञ् धारणपोषणयोः' (जु० उ० १०९२) स्वशब्दस्याप्युपसर्गवद् वृत्त्या 'आतश्चोपसर्गे' (पा० ३. ३. १०६) इत्यनेन दधातेरङ्प्रत्ययः। 'स्थ' भवथ। 'मे' मम 'पितॄन्' पितृपितामहप्रपितामहान् त्रीन् 'तर्पयत' तृप्तान् कुरुत। किंविधा आपः, 'ऊर्जं' बलकरं रसं 'वहन्तीः' वहन्त्यः धारयन्त्यः। विभक्तिव्यत्ययश्छान्दसः। ऊर्जमिति शब्दस्यैव विवरणं 'घृतं पयः परिस्रुतम्' इति। इमे त्रयोऽपि रसा बलवीर्यवृद्धि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कराः। तत्र घृतपयसी प्रसिद्धे। 'परिस्रुतम्' आसवम्, परिस्रवति ओषधिवनस्पतिभ्य आसूयते इति परिस्रुत् आसवस्तम्। 'स्रु गतौ' (भ्वा० प० ६४०) द्राक्षासव इत्यादिः। त्रिविधमपि रसं पुनः कीदृशम् 'अमृतं' मृत्युरहितम्, अविद्यमानं मृतं मरणं यस्मिन् इति बहुव्रीहिसमासे 'नञो जरमरमित्रमृताः' (पा० ६. २. ११६) इत्यनेनोत्तरपदस्य मृतशब्दस्याद्युदात्तत्वम्। 'कीलालं' कीले कीलने बन्धने सर्वरोगप्रशमने 'अलं' पर्याप्तिः सामर्थ्यं यस्य तम्, बहुव्रीहिसमासे पूर्वपद-प्रकृतिस्वरः। 'कील बन्धने' (भ्वा० प० ५२४) 'अल भूषणपर्याप्तिवारणेषु' (भ्वा० प० ५१५)। 'पुंसि संज्ञायां घः प्रायेण' (पा० ३. ३. ११८) इति भावे घः प्रत्ययः। स्वरदोषाद् महीधरेष्टा कृद्वृत्त्या व्युत्पत्तिर्विचार्येति।

अस्मिन् पैतृकानुवाके षट्सु कण्डिकासु षोडश मन्त्रा यथाऽर्थं (एकोनत्रिंश्यां त्रयः, त्रिंश्यामेकः, एकत्रिंश्यां द्वौ, द्वात्रिंश्यामष्टौ, त्रयस्त्रिंश्यामेकः, चतुस्त्रिंश्यामेकः) व्याख्याताः। तेषु प्रतिपादिताः क्रिया इमाः—१. अग्निदेवत्या मेक्षणाहुतिः, २. सोमदेवत्या मेक्षणाहुतिः, ३. उल्लेखनम्, ४. उल्मुकनिधानम्, ५. पिण्डाभिमुखजपः, ६. पुटाञ्जलिनमस्कारः, ७. पितृ-प्रार्थना, ८. पिण्डोपरि सूत्रनिधानम्, ९. पत्न्या मध्यमपिण्डप्राशनम्, १०. पिण्डोपर्यवनेजन-निषेकः। पुटाञ्जलिनमस्काररूपायां क्रियायामेकस्यामेव षड्ऋतुरूपपितृभेदेन षट् मन्त्राः, पिण्डा-भिजपरूपायामेकस्यां क्रियायां च कालभेदेन मन्त्रद्वयमिति मन्त्राणां षोडशत्वेऽपि क्रिया दशैव सिध्यन्ति। सप्तस्वनुवाकेषु चतुस्त्रिंशत्कण्डिकासु मन्त्राणां समुदिता संख्या सप्तनवतिः (९७)।

आत्मयाजिपक्षभाष्यम्

'ऊर्जम्' अन्नस्वरूपम् 'अमृतं' जीवं, 'जीवं वै देवानां हविरमृतममृतानाम्' (श० ब्रा० १. २. १. २०)। तथा 'परिस्रुतं' परि समन्ताद् इन्द्रियालयेभ्यः स्रुतं निःसृतं 'घृतम्' इन्द्रिय-शक्तिसमूहं तथा 'कीलालं' कीलनं कीलो बन्धस्तमलति वारयतीति तत् कीलालम्। 'अल' इति वारणार्थको धातुः। सर्वबन्धनिवर्तकम्। 'पयः' प्राणम् 'प्राणः पयः' (श० ब्रा० ६. ५. ४. १५) 'वहन्तीः' वहन्त्यः, हे आपः ! 'आपो ज्योती रसोऽमृतम्' (ऐ० आ० १०. १५. १) इति श्रुतिः कथिता। यूयं 'स्वधा' पित्र्यहविःस्वरूपाः 'स्थ' अतो 'मे' मम 'पितॄन्' मनोवृत्तीः 'तर्प-यत' इति।

सात्वतपक्षभाष्यम्

रामेण विशालेन च कृतमद्भिः पितृतर्पणमयं मन्त्रोऽभिधत्ते—ऊर्जमिति। आपः ! पितृ-तर्पणाय मया गृहीतानि जलानि 'स्वधा' पितृदत्तद्रव्यस्वरूपाः 'स्थ' भवथ। अतः 'मे पितॄन्' दिवङ्गतान् मम पूर्वजान् 'तर्पयत' तृप्तान् हृष्टान् प्रसन्नचेतसः कुरुत। कीदृश्य आपः 'परिस्रुतं' पुष्पादिनिःसृतसाररूपं 'वहन्तीः' वहन्त्यः धारयन्त्यः। कीदृशं परिस्रुतम् ? 'अमृतं' रोग-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाशकं मृत्युवारकञ्च । न विद्यते मृतिर्मृत्युरस्मात् तथाभूतं 'कीलालं' कीलनं कीलो बन्धस्तमलति वारयतीति तत् कीलालं सर्वबन्धनिवारकं 'कील बन्धने' (भ्वा० प० ५२४)। 'अल भूषण-पर्याप्तिवारणेषु' (भ्वा० प० ५१५)। त्रिविधम् 'ऊर्जम्' ऊर्क् शब्दो अन्नगतस्वादुत्वमाचष्टे । 'घृतं पयः' इति द्वे अतिरोहितार्थे । अन्नघृतपयोभेदेन त्रिविधं पुष्पसारमिति भावः ।

अस्मिन् समन्वये भाष्ये नैकपक्षाः प्रदर्शिताः ।
यो यस्मै रोचते पक्षो बुधस्तेन स मोदताम् ।।

।। इति द्वितीयोऽध्यायः ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिशिष्टम्

अनुवाकसूत्राणि

कृष्णोऽसि षड्[६], अग्ने वाजजित् तिस्रः[३], मयीदमग्नी-
षोमयोः पञ्चकौ[५], अग्नेऽदब्धायो चतस्रः[४], संवर्चसा
पञ्च[५], अग्नये कव्यवाहनाय षट्[६]। सप्तानुवाकाः,
चतुस्त्रिंशत् कण्डिकाः।

संग्रहश्लोकाः

सप्ताऽनुवाकेऽध्यायेऽस्मिन् द्वितीयेऽर्थस्तु वर्ण्यते।
स्रुक्समासादनं[१] स्रुच्याघारो[२] ब्रह्मार्षमन्त्रकाः[३] ॥
स्रुग्व्यूहाद्याः[४] स्रुग्ग्रहाश्च[५] याजमानश्च[६] पैतृकः[७] ॥

प्रथमे स्रुक्समासादनानुवाके कण्डिकाः ६, मन्त्राश्च २४, तद्यथा—

कृष्ण इध्मं[१] वेदि वेदिं[२], बर्हि बर्हिः[३] समुक्षति।
अदि सिञ्चेद् दर्भमूले[४], विष्णोः प्रस्तरधारणम्[५] ॥
ऊर्णेति स्तृणुते[६] वेदिं, स्कन्नमर्शो[७–९] भुवत्रिभिः।
गन्धेन्द्रमित्त्रत्रयतः परिधीन् दिक्त्रये[१०–१२] क्षिपेत् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[१३–१४] आघारसमिधौ वीति-समिद्-आभ्यां क्षिपेत् पुरः ।
सूर्यो [१५] जपेत् सवि स्थाप्यं [१६] तिरश्चीनं तृणद्वयम् ॥
[१७] प्रस्तरास्तरणं तूर्णम्रा त्वा तस्य [१८] प्रसारणम् ।
घृतत्रिभिः स्रुचः [१९–२१] स्थाप्याः प्रियेणहविषां [२२] स्थितिः ॥
[२३] हविरालम्भनं ध्रुवा [२४] पाह्यात्मालम्भनं मतम् ।
प्रथमे त्वनुवाकेऽस्मिंश्चतुर्विंशतिरुच्यते ॥

द्वितीये स्रुच्याघारानुवाके कण्डिकाः ३, मन्त्राश्च ८, तद्यथा—

[१] अग्ने परिधिसंमार्गो [२–३] ह्यञ्जली द्वौ नमः स्वधा ।
सुय स्रुचौ [४] समादायाऽङ्घ्रिणा [५] दक्षिणदिग्गतिः ॥
वसु [६] स्थित्वेत इन्द्रेति [७] होमः संज्यो [८] ध्रुवाञ्जनम् ।
अनुवाके द्वितीयेऽस्मिन्नष्ट मन्त्रा उदीरिताः ॥

तृतीये ब्रह्मार्षमन्त्रानुवाके कण्डिकाः ५, मन्त्राश्च ९, तद्यथा—

मयि [१] स्वामिजपः प्रोक्तोऽग्नीत् [२–३] प्राश्नात्युपद्वयात् ।
देव ब्रह्मा [४] प्रतिगृह्य [५] प्राश्नात्यग्नेरिति स्वकम् ॥
एतं ते [६] प्रार्थयेदीशं ब्रह्माऽ[७]नुज्ञा मन इति ।
एषा [८] होतामन्त्रयेत चाऽग्ने [९] संमार्जनं ततः ॥
अनुवाके तृतीयेऽस्मिन्नव मन्त्रा उदीरिताः ॥

चतुर्थे स्रुग्व्यूहानुवाके कण्डिकाः ५, मन्त्राश्च १७, तद्यथा—

अग्नीद्वयात् [१–२] स्रुचौ व्यूहेतेन्द्राग्नीद्वयतोऽ[३–४]पि च ।
[५–७] वसुत्रयेण परिधीनञ्ज्यात् सं [८] प्रस्तरग्रहः ॥
[९] तमञ्ज्याद् व्यन्तु मरुतां [१०] प्रहरेद् चक्षुरित्यतः ।
[११] संस्पृशेत्स्वं यं परिधिं मध्यमं [१२] प्रहरेदथ ॥
इतरौ [१३] प्रहरेदग्नेः संस्रव [१४–१५] स्रुच्यहोमकः ।
घृता [१६] धुरि स्रुचौ [१७] स्पर्शश्चतुर्थे समुदीरिताः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमे स्रुग्ग्रहानुवाके कण्डिकाः ४, मन्त्राश्च ८, तद्यथा—

स्रुक्स्रुव[१]प्रगृहस्त्वग्ने होमो [२–३]ह्यग्न-सर-द्वयात् ।
वेदोऽसि पत्न्या वेदस्य [४]विमोचनमथेरितम् ॥
समिष्ट[५]होमो देवेति सं बर्हिराहु[६]तिर्भवेत् ।
प्र[७]णीता निनयेत् कस्त्वा कणान् रक्षेति [८]संत्यजेत् ॥
अनुवाके पञ्चमेऽस्मिन्नष्ट मन्त्रा उदीरिताः ॥

षष्ठे याजमानानुवाके कण्डिकाः ५, मन्त्राश्च १५, तद्यथा—

मुखं संवर्चसा मार्[१]ष्टि [२–४]क्रमा दिवित्रयेण च ।
अस्माद् अवेक्ष[५]ते भागम् अस्यै चावेक्ष[६]ते भुवम् ॥
[७]अगन्म प्रेक्षते प्राचीम् अ[८]ग्नि संज्योति चेक्षते ।
स्वयं सूर्य[९]मवेक्षेत वर्चः प्रार्थयते [१०]रविम् ॥
[११]सूर्यप्रदक्षिणावृत्तिरग्ने पश्येद् [१२]गृहाग्निकम् ।
सूर्यं प्रदक्षि[१३]णावृत्तिरग्ने त्यागो [१४]व्रतस्य च ॥
इदं कर्म[१५]समाप्तिश्च मन्त्राः पञ्चदशेरिताः ॥

सप्तमे पैतृकानुवाके कण्डिकाः ६, मन्त्राश्च १६, तद्यथा—

[१–२]अग्निसोमद्वयाद्धोमोऽपहता दक्षिणोल्लि[३]खेत् ।
ये रू[४]पोल्मुकमाधाय चाऽत्राऽमीति[५–६]द्वयं जपेत् ॥
[७–१२]षड्भिः पुटाञ्जलिं कुर्याद् गृहान् पितृं[१३]श्च वन्दते ।
एतत् सूत्र[१४]निधानं च प्राश्ना[१५]त्याधत्त मध्यमम् ॥
वधूः पिण्डमूर्ज[१६]मपः सिञ्चेन्मन्त्रास्तु षोडश ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री शंकराचार्य संस्कृत महाविद्यालय
भारतीय विद्या भवन, नई दिल्ली

1631

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राप्तिस्थानम्—
'श्रौत मुनि निवास'
वृन्दावन, मथुरा.
भारत

Funding by IKS-MoE